Digitization by Arya Samaj Charitable Foundation, Chennai

रजत जयन्ती ग्रन्थ माला - ६

शब्दलक्षणप्रामाण्यविमर्शः

एन. एस. रामानुजताताचार्यः

राष्ट्रिय-संस्कृत-संस्थानम्

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

रजतजयन्तीग्रन्थमाला —६

शब्दलक्षणप्रामाण्यविमर्शः

एन्. एस्. रामानुजताताचार्यः

BVB Sri Sankaracharya Sanskrit Mahavidyalaya
२०५

राष्ट्रिय-संस्कृत-संस्थानम्
नई दिल्ली

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकाशकः—
डॉ. कमलाकान्तमिश्रः
निदेशकः
राष्ट्रिय-संस्कृत-संस्थानम्
ए-४०, विशाल एन्क्लेव, राजा गार्डन
नई दिल्ली-११००२७

© राष्ट्रिय-संस्कृत-संस्थानम्

रजतजयन्तीग्रन्थमाला ।

वर्षः १९९५

Bhavan's Sri Sankaracharya
204
Bharatiya Vidya ... Mahavidyalaya

विक्रम संवत् २०५२

मूल्यम्: Rs 50-00

मुद्रकः—
नागप्रकाशकः
११ ए/यू. ए. जवाहर नगर, दिल्ली-११०००७

Digitization by Arya Samaj Charitable Foundation, Chennai

28.1.98

प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्यागमस्योद्घोषं परिदधत् स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं रजतजयन्तीवर्षं पूरयतीति विज्ञाय समेषां विदुषां संस्कृतानुरागिणां च चेतोऽवश्यं मोमुद्येत ।

प्राचीनशास्त्राणां ज्ञाननिधीनां संरक्षणे संवर्धने संस्कृतपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारार्थं संस्थानेनानेन निरन्तरं विहितं योगदानं संस्कृतलोकः सर्वथाभिनन्दति ।

अस्मिन् रजतजयन्तीशुभावसरे राष्ट्रस्यास्य विभिन्नप्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः नानाशास्त्रविषयानालम्ब्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य संग्रथ्य च **रजतजयन्तीग्रन्थमालात्वेन** तत्रभवतां समक्षमुपस्थाप्य महानानन्दः सन्तोषश्च सञ्जायेते ।

तत्रेदं कुसुमं **शब्दलक्षणप्रामाण्यविमर्शः** नामा ग्रन्थः शब्दस्य लक्षणं प्रामाण्यं च सरलया शैल्या सुबोधया भाषया आधुनिकदृष्टिसम्पन्नया च प्रस्तुत्या साधु समुपस्थापयति । वैयाकरणनैयायिकमीमांसकानां विचारान् यथायथमुपन्यस्य युक्तिप्रमाणाभ्यां स्वमतपोषणं परमतनिराकरणं च विधाय विद्यावैशद्यमात्मनः प्रख्यापयति लेखकः । कृतिरियं विदुषामन्तेवासिनां चोपकाराय कल्पिष्यत इति मम विश्वासः ।

राष्ट्रपतिसम्मानेन रामकृष्णडालमियाश्रीवाण्यलङ्करणपुरस्कारेण च विभूषितैः विद्वन्मणिमालायाः सुमेरुरूपेण विराजमानैः तिरुपतिस्थ राष्ट्रिय संस्कृत-विद्यापीठस्य कुलपतिचरैः **डॉ. एन. एस. रामानुजताताचार्यमहाभागैरयं** ग्रन्थः महतावधानेन व्यलेखीति तेभ्यो हार्दिकं नमोवाकं कार्तज्ञं च निवेद्येते ।

अस्य ग्रन्थमालायाः सम्पूर्णं कार्यभारं निर्वहन्तोऽस्माकं सहयोगिनः विशेषेण डॉ. सवितापाठक, डॉ. आर. देवनाथन प्रभृतयः सन्त्यत्र साधुवादार्हाः ।

नागप्रकाशकाधिकारिणः स्वल्पीयसि काले ग्रन्थममुं सम्मुद्र्य यथासमयं विमोचनाय च प्रस्तुतवन्त इत्यस्माकं संकल्पसिद्धौ विशिष्टसहयोगाय धन्यवादार्हाः ।

कमलाकान्तमिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्

११.१०.९५
कार्तिककृष्णतृतीया २०५२

Bhagwan Sri Sankaracharya Sanskrit Mahavidyalaya
२०५

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

विषयनुक्रमणिका

विषयः	पृष्ठसंख्या
शब्दलक्षणविचारः	**१-१७**
न्यायसूत्रानुसारेण शब्दलक्षणम्	१
न्यायमञ्जर्युक्तं शब्दलक्षणम्	३
उपदेशशब्दार्थविचारः	३
न्यायभूषणोक्तं शब्दलक्षणम्	५
परिशुद्धौ भूषणोक्तलक्षणदूषणम्	६
मण्युक्तं शब्दप्रमाणलक्षणम्	७
तर्कसंग्रहतद्व्याख्यानेषु शब्दलक्षणम्	१०
शब्दशक्तिप्रकाशिकोक्तं शब्दलक्षणम्	११
मीमांसाशास्त्रोक्तं शब्दप्रमाणलक्षणम्	१२
वेदान्तपरिभाषोक्तं शब्दप्रमाणलक्षणम्	१३
द्वैतवाद्युक्तं शब्दलक्षणम्	१३
न्यायपरिशुद्ध्युक्तं शब्दलक्षणम्	१४
सांख्यदर्शनोक्तं शब्दलक्षणम्	१४
नागेशोक्तं शब्दप्रमाणलक्षणम्	१५
खण्डनखण्डखाद्योक्तदूषणपरामर्शः	१५
चित्सुखीयदूषणानुवादः	१६
शब्दप्रामाण्यविचारः—	**१८-९४**
चार्वाकमतं तन्निरासश्च	१८
शब्दखण्डमणौ चार्वाकनिरासः	१९

Digitization by Arya Samaj Charitable Foundation, Chennai

शब्दस्य पृथक्प्रमाणत्वम्	२०
दिङ्नागमतेन शब्दस्यानुमानेऽन्तर्भावः	२१
तद्दूषणप्रकारः न्यायवार्तिके	२२
शब्दस्यानुमानान्तर्भाववादिकणादमतम्	२३
लीलावतीकारोक्तिपरिशीलनम्	२६
न्यायमञ्जर्यां शब्दस्यानुमानेऽन्तर्भावखण्डनम्	२७
न्यायभूषणे शब्दानुमानत्वनिरासः	३३
उदयनाचार्येण शब्दस्यानुमानत्वनिरसनप्रकारः	३४
वैशेषिकमतम्	३५
तन्निरासः	३६
आकाङ्क्षाविचारः	३८
प्राभाकरमतनिरासः	४०
तत्त्वचिन्तामण्यनुसारेण शब्दस्यानुमानगतार्थतानिरसनम्	४५
लीलावत्युक्तानुमानपरिशीलनम्	४८
मणौ उक्तानुमानदूषणम्	५०
मणिग्रन्थरीत्या वैशेषिकोक्तपदार्थपक्षकानुमानोपन्यासः	५१
अवान्तरशङ्का तत्परिहारश्च	५३
वैशेषिकोक्तसंसर्गानुमानदूषणम्	५५
न्यायकौस्तुभोक्तरीत्या शब्दस्यानुमाना तिरिक्तत्वम्	५७
नागेशोक्तरीतिः	५८
नव्यनैयायिकरीत्या शाब्दप्रमितेः अनुमितिविलक्षणत्वं शब्दस्य प्रमाणान्तरत्वं च	५९
निष्कर्षः	६४
शब्दशक्तिप्रकाशिकोक्त्रीतिः	६४
मथुरानाथोक्तरीत्या नव्यवैशेषिकमतानुवादः तत्खण्डनम् च।	७१

Digitization by Arya Samaj Charitable Foundation, Chennai

उक्तनव्यवैशिषिकमतखण्डनम् ७३

जरन्मीमांसकमतम् ७५

तत्खण्डनम् ७५

प्रकारान्तरेण प्राभाकरमतोपन्यासः ७८

उक्तप्राभाकरमतनिरासः ८४

वैशेषिकैकदेशिमतम् ८८

निगमनम् ९०

पदार्थतात्पर्यग्रहस्यैव शाब्दधीहेतुत्वं न तु वाक्यार्थतात्पर्यग्रहस्येतिमतोपन्यासः ९१

मथुरानाथीये विशेषाः ९३

अनुशीलितग्रन्थानां सूची ९७-९८

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

I

शब्दलक्षणविचारः

शब्दजन्या प्रमितिः शाब्दबोध इत्युच्यते। तत्करणतया शब्दः प्रमाणम्। तत्र शब्दस्य प्रामाण्यविषये च मतभेदसद्भावात् तत्परीक्षणात् पूर्वं शब्दलक्षणं विचार्यते।

न्यायसूत्रानुसारेण शब्दलक्षणम्

तत्रभवान् सूत्रकारः— "आप्तोपदेशः शब्दः" (१-१-७) इति सूत्रेण शब्दस्य लक्षणं प्रोवाच। अत्र शब्द इति लक्ष्यनिर्देशः। आप्तोपदेश इति लक्षणम्। उपदिश्यतेऽनेनेत्युपदेशः वाक्यज्ञानं वा तदर्थज्ञानं वा अभिधीयते। आकाङ्क्षायोग्यतासत्तिमत्पदकदम्बकं वाक्यम्, तस्य ज्ञानं, ज्ञायमानं तदित्यर्थः। तत्र वाक्यं ज्ञायमानं प्रमाणमिति पक्षे वाक्यार्थज्ञानं फलम्, पदार्थस्मृत्यादयस्तु आन्तरालिका इतिकर्तव्यताः। तदर्थज्ञानं प्रमाणमिति पक्षे तु हानादिबुद्धिः फलम्। यद्यपि विधिरुपदेशः प्रवर्तनमिति पर्यायाः, तथापि अप्रवर्तकभूतार्थपरोपनिषदादिव्यापकत्वात् (तत्राव्याप्तिवारकतया) उत्कृष्टप्रयोजनवद्वचनमात्रमत्र उपदेशशब्देन विवक्षितम्। यद्यपि 'सदेव सोम्येदमग्र आसीत्' इत्यादिवाक्यं न क्वचित् प्रवर्तयति कुतश्चिद्वा निवर्तयति पुरुषम्, तथापि पुरुषश्रेयोऽभिधत्त इति उपदेशशब्देन तद्वाक्यं संगृहीतं भवति। तथापि 'चैत्यं वन्देत' इत्यादिवाक्येष्वतिव्याप्तिः, तेषामप्युक्तोपदेशरूपत्वात्। तद्वारणयोक्तम् आप्तेति। आप्तानाम् ऋष्यार्यम्लेच्छानामुपदेशः शब्दः न तु अनाप्तानां मायामोहनिर्मितानां बुद्धर्षभादीनां प्रमाणविरुद्धक्षणिकनैरात्म्यादिवादिनामिति। तथा च भाष्यम् — "ऋष्यार्यम्लेच्छानां समानं लक्षणम्"इति। वार्तिककारोप्याह — 'आप्तोपदशः शब्दः, न शब्दमात्रमिति सूत्रार्थः' इति। सूत्रस्थाप्तलक्षणपरं भाष्यम्—

> **"आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्य आप्तिः, तया प्रवर्तत इत्याप्तः"**

इति। सुदृढेन प्रमाणेनावधारिताः साक्षात्कृताः धर्माः — हिताहितप्राप्तिपरिहारप्रयोजनाः पदार्थाः येन स तथोक्तः। तथापि पदार्थतत्त्वं विद्वान् अकारुणिकतया

Digitization by Arya Samaj Charitable Foundation, Chennai

वा अलसतया वा अनुपदिशन्, मत्सरितया वा विपरीतमुपदिशन् आप्तः स्यादित्यत आह — **यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त इति।** यथादृष्टस्य इत्यनेन मत्सरितया विपरीतोपदेष्टुर्व्युदासः। चिख्यापयिषयेत्यनेन अकृपा-स्वार्थ-कामत्वयोर्निरासः। प्रयुक्त इत्यस्य उत्पादितप्रयत्न इत्यर्थः। अनेनालसत्व-निरासः। तथापि स्थानकरणपाटवाभावेन वर्णनिष्पादनासमर्थस्य आप्तत्वं स्यात्, अत उपदेष्टेति स्थानकरणपाटववानित्यर्थः।

"मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्"(न्या.सू. २-१-६८) इति सूत्रस्थं —

"किं पुनराप्तानां प्रामाण्यम् ? साक्षात्कृत् धर्मता भूतदया यथाभूतार्थ-चिख्यापयिषेति" इति भाष्यमप्यत्रानुसन्धेयम्। "दर्शनाद् ऋषिः, करतलामलकफलवत् साक्षात्कृतत्रैकाल्यवर्तिसकलप्रमेयः। आराद्दूरात् यातः पातकेभ्यः इत्यार्यः मध्यमो लोकः। म्लेच्छः प्रसिद्धः। म्लेच्छा अपि हि परिपथमवस्थिताः पान्थानामहृतसर्वस्वानां मार्गाख्याने हेतुदर्शनशून्या भवन्त्याप्ताः" इति तात्पर्य-टीकाकाराः।

म्लेच्छानामाप्तत्वोपपादकोक्तटीकाव्याख्यानरूपा **औदयनी परिशुद्धिः** इयम्—

अयमाशयः — द्विविधो हि पुरुषः सर्वज्ञः असर्वज्ञश्चेति। तत्र पूर्वस्य तावत् सत्त्वसाधकात् प्रमाणादेव रागद्वेषमोहविरहसिद्धावनाप्तत्वं निरस्तम्। उत्तरस्यापि ज्ञानेच्छाप्रयत्नस्थानकरणपाटवानि तावदुपदेशमात्रेणैव निश्चीयन्त इति तत्र सर्वेषामविवाद एव। ज्ञानं तु तस्य यथार्थमयथार्थं वा स्यात्। इच्छापि प्रतिपिपादयिषा विप्रलिप्सा वा स्यादिति सन्देहोऽवशिष्यते। तत्राभ्यासदशापन्नोऽयमर्थोऽस्येति सामान्यतो निश्चये भवत्येव तज्ज्ञानस्य यथार्थत्वनिश्चयः; यथा अभ्यासदशापन्नमिदमरण्यममीषां म्लेच्छानाम्, अतः अस्मिन्नेते मार्गामार्गविभागज्ञा इति पान्थानामेवं निश्चयः। विप्रलिप्सा च हेतुदर्शनेन व्याप्ता हेतौ सति स्यात्। स च विप्रलिप्साहेतुः द्विरूपः स्वोपकारः परोपकारो वा। तत्र तावत् पान्थेषु विमार्गेण प्रतिष्ठमानेषु म्लेच्छादीनां न कश्चित् स्वोपकारः। नापि द्वितीयः, न ह्यनुन्मत्ता अनपकारिणमपकुर्वते। न वा परापकारमात्रं पुरुषार्थः। तथा हि सति सर्वः सर्वमपकुर्यादिति विप्रलिप्सापि निवार्यते। अनभ्यासदशापन्नविषये तु प्रवृत्तिसमार्थ्यात् प्रमाणान्तरसंवादाद्वा मोहविप्रलिप्सयोर्निवृत्तिः।

Digitization by Arya Samaj Charitable Foundation, Chennai

म्लेच्छा अप्याप्ता भवन्ति यतः (आप्तत्वेन) प्रतीतिगोचराः, ततः कः सन्देहो महाधियामार्याणां च तत्त्वावधारण इति अपिशब्दार्थः — इति।

एतावता हिताहितप्राप्तिपरिहारप्रयोजनकपदार्थतत्त्वनिश्चयवन्तः कारुणिकाः अंनलसाः अमत्सरिणः स्थानकरणपाटववन्तः आप्ताः इत्याप्तलक्षणमुक्तं भवति। ते च ऋषयः आर्याः म्लेच्छा वा भवितुमर्हन्ति। तेषामुपदेशः तैः उच्चरितं आकाङ्क्षायोग्यतासत्तियुक्तपदसमूहात्मकं वाक्यं शब्दः इति शब्दलक्षणमुक्तं भवति।

न्यायज्जर्युक्तं शब्दलक्षणम्

आप्तोपदेशः शब्दः (न्या.सू. १-१-७)

उपदेशः शब्दः इत्युच्यमाने पर्यायमात्रोच्चारणात् अकारके = बोधाजनके शब्दमात्रे प्रामाण्यप्रसङ्ग इति तन्निवृत्त्यर्थं पूर्वसूत्रात् साध्यसाधनपदमाकृष्यते। साध्यसाधनमित्यस्य करणमित्यर्थात् अकारके शब्दे नातिव्याप्तिः। तदुपादानेऽपि वीचीतरङ्गन्यायेन शब्दान्तरजनके पूर्वशब्देऽतिव्याप्तिः। अतः प्रत्यक्षसूत्रात् ज्ञान-पदस्य, स्मृतिजनकेऽतिप्रसङ्गवारणाय अर्थग्रहणस्य संशयविपर्ययजनकनिराकर-णाय च व्यवसायात्मकाव्यभिचारिपदयोरनुवृत्तिः इत्येवम् अव्याभिचारि-व्यवसायात्मक-अर्थविषयकज्ञानं यतः भवति स उपदेशः शब्दः इति फलति। वस्तुतस्तु उपदिश्यतेऽनेनेत्युपदेश इति उपदेशशब्देनैव अव्यभि-चारादिविशेषणकार्थप्रतीतिजनकत्वं लभ्यत इति अनुवृत्त्यादिक्लेशो न कार्यः। अपि च प्रमाणसामान्यलक्षणे अव्यभिचारादिविशेषणसद्भावात् प्रमाणविशेष-लक्षणे तद्विशेषणमनावश्यकम्। सामान्यलक्षणविरहिते विशेषलक्षणप्रसक्त्यभा-वात्। अनाप्तोपदेशेगतिव्याप्तिवारणाय तु आप्तपदमावश्यकमेव। न चैतिह्यस्य अज्ञातप्रवक्तृकत्वेन आप्तोपदेशरूपत्वाभावात् शब्देऽनन्तर्भावापत्तिरिति वाच्यम्। तत्रापि यथार्थप्रतीतिहेतुत्वेन आप्तोपदेशत्वस्यानुमानात्।

उपदेशशब्दार्थविचारः

उपदिश्यतेऽनेनेत्युपदेश इत्युक्तम्। तत्र उपदिश्यत इत्यस्य कोऽर्थः ? अभिधानक्रिया क्रियते इत्यर्थ इति चेत् ? केऽयमभिधानक्रिया नाम ? प्रतीतिरिति चेत् - तर्हि प्रतीतिकरणमुपदेशः। तथा च चक्षुरादेरपि प्रतीतिकर-णत्वाद् उपदेशत्वप्रसङ्गः। न च स्वज्ञानपूर्वकं प्रतीतिकरणमुपदेशः, चक्षुरादिकम्

Digitization by Arya Samaj Charitable Foundation, Chennai

अज्ञायमानं सत् प्रतीतिकरणमिति नातिप्रसङ्गः, शब्दस्तु ज्ञातः सन् प्रातीतिकरणमिति समन्वय इति वाच्यम्। एवमपि धूमादेरपि उपदेशताप्रसङ्गात्। तस्य ज्ञातस्य सतः वह्न्यादिप्रतीतिकरणत्वात्।

अत्रोच्यते। श्रोत्रग्राह्यवस्तुकरणिका तदर्थप्रतीतिरभिधानक्रिया तत्करणभूतं श्रोत्रग्राह्यं वस्तु शब्दप्रमाणम्। लोके तथैव व्यवहारात्। उक्तः, अभिहित इति च स एवार्थो लोके व्यपादिश्यते यः श्रोत्रग्राह्यवस्तुकरणकप्रतीतिविषयतां प्राप्तः। श्रोत्रग्राह्यस्य वर्णराशेरेवार्थप्रतीतिकरणत्वात्। न तु श्रोत्रजन्यज्ञानविषयः स्फोटात्मा शब्दः। श्रोत्रग्रहणे ह्यर्थे शब्दशब्दः प्रसिद्धः। "यतोऽर्थप्रतीतिः स शब्द"इति तूच्यमाने धूमादिरपि शब्दः स्यात्। अगृहीतसम्बन्धे शब्दे च शब्दत्वं न स्यात्, अर्थप्रतीतेरकरणात्। वस्तुतस्तु अर्थप्रतीतिकरणस्वरूपयोग्यताविवक्षणे नायं पश्चिमो दोषः। श्रोत्रग्राह्यवस्तुकरणकार्थप्रतीतिकरणत्वस्य शब्दलक्षणत्वेऽपि अगृहीतसम्बन्धे शब्दे स्वरूपयोग्यताघटनयैव लक्षणस्य सङ्गमनीयत्वात्। आप्तलक्षणपरभाष्यमित्थं व्याख्यातं **जयन्तभट्टेन** —

धर्म इत्युपदेष्टव्यः कश्चिदर्थो विवक्षितः।
साक्षात्करणमेतस्य यथार्थमुपलम्भनम्॥

न तु प्रत्यक्षेणैव ग्रहणमिति नियमः, अनुमानादिनिश्चितार्थोपदेशिनोऽप्याप्तत्वानपायात्।

चिख्यापयिषया युक्त इत्युक्ता वीतरागता।
उपदेष्टेत्यनेनोक्तं प्रतिपादनकौशलम्॥
तस्य च प्रतिपाद्येऽर्थे वीतरागत्वमिष्यते।
सर्वथा वीतरागस्तु पुरुषः कुत्र लभ्यते॥
ऋष्यार्यम्लेच्छासामान्यं वक्तव्यं चाप्तलक्षणम्।
एवं हि लोकेऽप्याप्तोक्त्या व्यवहारो न नङ्क्ष्यति॥

येऽप्याप्तिं दोषक्षयमाचक्षते तैरपि दोषक्षयः प्रतिपाद्यार्थेष्वेव वर्णनीयः। अन्यथा लोके वृश्यमानस्य अयमाप्तोक्त इति व्यवहारस्य निह्नवः स्यात्।

अथवा वेदप्रामाण्यसिद्ध्यर्थत्वाच्छास्त्रस्य तत्प्रणेतुः आप्तस्य ईश्वरस्य यथाश्रुतमेवेदं लक्षणम्। स हि साक्षात्कृतधर्मा, धर्मस्येश्वरप्रत्यक्षगोचरत्वात्। चिख्यापयिषाप्रयुक्त इति। कारुणिक एव भगवान्। उपदेष्टा च, वेदाद्यागमानां

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्प्रणीतत्वात्। वीतरागता स्वार्थकामनाराहित्यम्। प्रतिपादनकौशलम्-करणादि-पाटवम्। वीतरागोऽपि मूकादिरुपदेष्टुमशक्तः किं कुर्यात् ? वक्तुं शक्तोऽपि साक्षात्कृतधर्मापि अवीतरागो न वक्ति, तूष्णीमास्त इति। वीतरागः प्रतिपाद्यार्थविषयकपक्षपातरहित इत्याहुः।

न्यायभूषणोक्तं शब्दलक्षणम्

न्यायसारे भासर्वज्ञः — "समयबलेन सम्यक्परोक्षानुभवसाधनमागमः" इति शब्दलक्षणं प्रोवाच। समयबलेनेत्यस्य संकेतज्ञानसहकारेणेत्यर्थः। तेन अविनाभावबलेन परोक्षानुभवसाधनेऽनुमाने नातिव्याप्तिः। समयबलेन संशय-विपर्ययसाधने शब्दप्रमाणलक्षणातिव्याप्तिवारणाय सम्यक्पदम्। "सविकल्पक-प्रत्यक्षव्यवच्छेदार्थं परोक्षग्रहणम्" इति न्यायभूषणम्। परं तु सविकल्पकप्रत्यक्षसाधने संकेतग्रहसहकारविरहादेव अतिव्याप्तिवारणसंभवादिदं चिन्त्यम्। वस्तुतस्तु चेष्टादिना संकेतपूर्वकं यत्र प्रत्यक्षं तत्रातिप्रसङ्गवारणाय तदिति उपरि स्पष्टं भविष्यति।

ननु "आप्तोपदेशः शब्दः" इति हि सूत्रोक्तं शब्दलक्षणम्; कथं तद्विरुद्धतया समयबलेनेत्यादिलक्षणमुच्यत इति चेत् न। तत्सूत्रस्याप्यस्मिन्नेव लक्षणे तात्पर्यात्। तथा हि - उपदिश्यतेऽनेनेत्युपदेशे इति समयापेक्षमर्थप्रतीतिसाधनमुच्यते। न हि प्रत्यक्षादनुमानाद्वा अवगतोऽर्थः उपदेशतः प्रतिपन्न इत्युच्यते। नापि संदिग्धो वा विपर्यस्तो वार्थः उपदिष्टः इत्युच्यते।

अथवा प्रत्यक्षसूत्राद् अव्यभिचारिव्यवसायात्मकपदयोः इहाप्यनुवृत्तिर्द्रष्टव्या। ततो न संशयविपर्ययसाधनयोरतिव्याप्तिः। एवं चाप्तग्रहणं न लक्षणघटकम्; तेन व्यवच्छेद्याभावात्। किं तु अदृष्टार्थानां वाक्यानां प्रामाण्य-सिद्धौ आप्तोक्तत्वं हेतुरिति सूचनार्थं तत्। अदृष्टार्थानि वाक्यानि प्रमाणानि आप्तोक्तत्वाद् दृष्टार्थवाक्यवद् इति।

अस्तु वा लक्षणघटकम्। यदा अव्यभिचारिव्यवसायात्मकपदयोरिहानुवृत्तिर्नेष्यते, उपदेशशब्दश्च मिथ्योपदेशेऽपि दृष्टः तदा आप्तपदं सार्थकमिति। आप्तो हि अज्ञानरागादिदोषरहित उपदेष्टा भण्यते। तदुपदेशः प्रमाणमेव। तथा चोक्तम् —

Digitization by Arya Samaj Charitable Foundation, Chennai

आगमो ह्याप्तवचनमाप्तिं दोषक्षयं विदुः।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसंभवात्॥ - इति।

हेत्वसम्भवादिति। अज्ञानरागादिरूपहेत्वसम्भवादित्यर्थः। म्लेच्छादिवाक्येऽव्याप्तमिदमिति चेन्न। परापरभेदेन दोषक्षयस्यापि द्विविधत्वात्। तत्रापरस्याप्तस्य आर्यम्लेच्छादेरपरो दोषक्षयः। प्रतिनियतविषयत्वादज्ञानादिनिवृत्तेः। **न्यायमञ्जर्यामप्ययं** पक्ष उपन्यस्तः—

"येऽप्याप्तिं दोषक्षयमाचक्षते, तैरपि दोषक्षयः प्रतिपाद्यार्थेष्वेव वर्णनीयः। अन्यथा लोके दृश्यमानस्य व्यवहारस्य निह्नवः स्यात्" इति।

पराप्तस्य त्वीश्वरादेः परो दोषक्षयः, तेषां सर्वेष्वप्यर्थेषु अज्ञानादेरत्यन्तविरहात् इति। अनेन आप्तत्वं दोषराहित्यमिति पक्षसमर्थकेन भूषणेन "तदनेन—"आप्तिं दोषक्षयं विदुः" इति परेषामप्तलक्षणमव्यापकमित्युक्तं भवति" इति **तात्पर्यटीकाग्रन्थः** (१-१-७-पृ.३६९) खण्डितो भवति। वाचस्पत्यनन्तरकालिकः भूषणकार इत्यत्रेदं प्रमाणम्।

अथ वा अप्तश्चासावुपदेशः आप्तोपदेशः। यथा वक्ता ज्ञानमकुर्वन् संशयं विपर्ययं वा कुर्वन् न लोकेऽप्याप्त उच्यते, किं त्वविपरीतमर्थं निश्चाययन्नेव आप्तः प्रसिद्धः, तथा शब्दोऽप्यविपरीतमर्थनिश्चयं कुर्वन् आप्त इत्युच्यते। नन्वेवमाप्तवागिति लघु लक्षणं कर्तव्यम्। न। अशब्दात्मकस्य चेष्टादेरसंग्रहप्रसङ्गात्। उपदेशग्रहणे तु संकेतपूर्वकेण अङ्गुलिचेष्टादिनापि येनार्थ उपदिश्यते तत्सर्वं शब्दाख्यं प्रमाणं लभ्यते। स्मृतिप्रत्यक्षव्यच्छेदोऽप्यत एव लभ्यते। न हि शब्द श्रवणानन्तरं स्मृतोऽर्थः सविकल्पकप्रत्यक्षोपलब्धो वा क्वचिदाप्तेनोपदिष्ट इति प्रसिद्धिरस्ति। तस्मात् समयबलेन सम्यक्परोक्षानुभवसाधनमागम इत्ययमेव सूत्रस्यार्थ इति न्यायभूषणकाराः।

परिशुद्धौ भूषणोक्तलक्षणदूषणम्

तदेतत् भूषणकारोक्तं लक्षणमनूद्य **तात्पर्यटीकापरिशुद्धावुदयनाचार्यैः** दूषितम् (१-१७ पृ. ३७२-७३) तत्तथैव यथासम्भवं शब्दतोऽर्थतश्चानूद्यते—

तत्र समयबलेन सम्यक्परोक्षानुभवसाधनं शब्द इत्येके (न्यायभूषणकाराः)। समयबलेनेत्यनेन अनुमानम्, सम्यगित्यनेन शब्दाभासः, परोक्षेत्यनेन सविकल्पकप्रत्यक्षं, अनुभवेत्यनेन पदार्थस्मरणं निरस्यते, साधनपदेन कर्तृकर्मणी निर-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्येते। अपरे तु चेष्टायामापि गतमेतदित्यतिव्यापकं मत्वा शब्दत्वसमवाये सति इति विशेषणान्तरं प्रक्षिपन्ति। अत्र प्राच्यानां भूषणकाराणामयमाशयः—यदि चेष्टा न प्रमाणम्, तर्हि तत्रातिव्याप्त्यप्रसङ्गात् किं शब्दत्वसमवाये सतीत्यनेन। प्रमाणं चेत्, तस्याः प्रत्यक्षादिषु अनन्तर्भावे पञ्चमप्रमाणस्वीकारप्रसङ्गः। तस्मात् शब्दे एव चेष्टायाः प्रवेशः समयबलस्य प्रवृत्तेः। चेष्टापि हि शब्दवत् संकेत बलेनैनार्थं बोधयति। शब्दे एव शब्दशब्दप्रयोगः प्राचुर्यात्, चाक्षुषे ज्ञाने दर्शनव्यवहारवत्—इति।

एतद् भूषणमतं न युक्तम्। चेष्टा हि अभिप्रायस्थशब्दस्मरणमात्रोपयोगिनी लिपिवत्, नार्थबोधिका। चेष्टया स्मृतः शब्द एवार्थबोधकः सन् प्रमाणम्। न च शब्दस्मरणमस्याः अर्थबोधनेऽवान्तरव्यापारः, शब्दस्यार्थस्मृतिवद् इति वाच्यम्। यदि चेष्टामन्तरेणावगतोऽपि शब्दो नार्थं गमयेत्, तदैवं वक्तुं शक्येत। न चैवमस्ति।

नन्वेवं सति चेष्टया मूकबधिरादीनामर्थबोधानुपपत्तिः, तेषां संकेतग्रहाभावेन शब्दस्मृत्यभावाद् इति चेत्-तान् प्रति शब्द इवार्थेऽपि चेष्टायाः कुण्ठत्वमेव। अन्धबधिरादीनां चेष्टया प्रवृत्तिनिवृत्ती तु अभिप्रायानुमानादेव। अतश्चेष्टा न प्रमाणम्। अत एव सूत्रकारः सम्भावितप्रामाण्यमैतिह्यादिकं यथायथं चतुर्षु अन्तर्भावयन् चेष्टा-अपभ्रंश-लिपि-पदैकदेश-ध्वनीन् सांव्यवहारिकानप्यकीर्तयन् तेषां प्रामाण्यं नानुमन्यते। अतस्तस्य शब्दप्रमाणेऽन्तर्भावकथनं न योयुज्यते इति।

मण्युक्तं शब्दप्रमाणलक्षणम्

मणिकारास्तु शब्दखण्डारम्भे— "अथ शब्दो निरूप्यते। प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्" इति शब्दप्रमाणस्य निरूपणीयतया प्रतिज्ञातस्य लक्षणमाहुः। प्रयोगहेतुभूतं प्रयोगकारणीभूतं यद् अर्थतत्त्वज्ञानम्-अर्थविषयकतत्त्वज्ञानम्, तज्जन्यः प्रमाणं शब्दः इत्यन्वयः। प्रमाणं शब्द इति लक्ष्यनिर्देशः। अन्यथा शब्द-शब्दस्य लक्षणान्तर्गतत्वे प्रमाणसामान्यस्य लक्षणत्वापत्तौ अर्थान्तराव्याप्ती प्रसज्येयाताम्। अर्थान्तरमनाकाङ्क्षिताभिधानम्। प्रमाणसामान्यस्य लक्ष्यत्वे अनाकाङ्क्षितस्य शब्दातिरिक्तप्रमाणस्य अभिधानापत्तिः। एवं प्रमाणसामान्यान्तर्गतप्रत्यक्षादौ प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यशब्दत्वाभावाद् अव्याप्तिः। प्रमाणमिति लक्ष्यविशेषणानुपादाने शब्दसामान्यस्य लक्ष्यत्वे ध्वन्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्मकशब्दे अव्याप्तिः। अत्रायं क्रमोऽभिप्रेतः—प्रथमतो येन केनापि प्रमाणेन वक्तुर्वाक्यार्थज्ञानम्, ततो वाक्यार्थज्ञानज्ञानम्, ततः परस्य वाक्यार्थज्ञानं भवतु इति वाक्यार्थज्ञानेच्छा, ततो वाक्यार्थज्ञानरूपेष्टसाधनताज्ञानाद् वाक्ये इच्छा, ततो वाक्यरूपेष्टसाधनताज्ञानात् कृतिसाध्यताज्ञानसहकृतात् कण्ठाभिघातादौ चिकीर्षा, ततः कण्ठाभिघातादिसाधिका कण्ठाद्युपादानकप्रवृत्तिः, ततः कण्ठादिचेष्टाविभागादिक्रमेण कण्ठाभिघाताद्युत्पत्तिः ततो वाक्योत्पत्तिरिति। अनया च प्रणाल्या प्राचां नये परम्परया वक्तृगतवाक्यार्थबुबोधयिषापूर्वकवाक्यत्वावच्छिन्नं प्रति वक्तृवाक्यार्थज्ञानस्य हेतुतया सर्वेषु प्रमाणभूतेषु वाक्येषु लक्षणं सङ्गमनीयम्।

'वह्निना सिञ्चति' इत्यप्रमाणशब्देऽतिव्याप्तिवारणाय **तत्त्वेति**। यथार्थेत्वर्थः।

ननु प्रयोगहेतुभूतेति ज्ञाने विशेषणं व्यर्थम्। न हि प्रयोगाहेतुभूतेनापि ज्ञानेन शब्दो जन्यते, यदिदं व्यावर्तयेत्। शब्दाहेतुभूतम् अथ च शब्दं जनयतीति वदतो व्याघातात्। किं च अर्थपदमपि व्यर्थम्, अर्थत्वस्य ज्ञानविषयत्वरूपस्य केवलान्वयितया ज्ञानमात्रस्यैवार्थविषयकत्वेनाव्यावर्तकत्वात्। उच्यते। इदं हि न प्रमाणशब्दसामान्यलक्षणम्। शब्दमात्रस्यैव प्रमाणत्वेन साकाङ्क्षशब्दत्वस्य शब्दत्वस्य वा तल्लक्षणत्वात्। वह्निना सिञ्चतीत्यस्यापि किंचिदर्थे प्रमाणत्वेन अर्थतत्त्वेत्यादेर्व्यर्थत्वापत्तेश्च। किं तु यस्मिन्नर्थे यद्वाक्यं प्रमाणं तस्यैव लक्षणम्। तथा च तद्विशेष्यकतत्संसर्गकतत्प्रकारकयथार्थज्ञानजन्यो यः सः तद्विशेष्यकतत्संसर्गकतत्प्रकारकप्रमाजनकः शब्द इत्यर्थः। एतल्लाभायैवार्थपदम्। वह्निना सिञ्चतीत्याद्ययोग्यवाक्यस्य सेके वह्निकरणकत्वांशे प्रमाणत्ववारणाय **यथार्थेति**। तादृशज्ञानजन्यसंस्कारेच्छादावतिव्याप्तिवारणाय **प्रयोगहेतुभूतेति** जन्यविशेषणम्। प्रयोगहेतुभूतत्वं च वर्णसामग्रीजन्यत्वम्। प्रयोगस्य-वर्णस्य,हेतुः-सामग्री, ततो भूतः उत्पन्न इति व्युत्पत्तेः तथा च वर्णसामग्रीजन्यत्वे सति निरुक्ततत्त्वज्ञानजन्यत्वं निरुक्तप्रमाणशब्दत्वमिति लक्षणं फलितम्। संस्कारेच्छादिश्च न वर्णसामग्रीजन्यः, इतरसामग्र्याः इतरत्राजनकत्वाद् इति नातिव्याप्तिः। ध्वनिवारणाय शब्दत्वमपहाय वर्णत्वेनोपादानम्।

प्रयोगहेतुभूतेन्यादिमणिकृदुक्तशब्दप्रमाणलक्षणस्य न्यायसूत्राल्लाभप्रकारः न्यायकौस्तुभे(पृ.७) प्रदर्शितः—""तत्र आप्तोपदेशः शब्दः। तत्र आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान्, तस्योपदेशः तज्जन्योपदेशः। विशिष्टजन्यत्वं च विशे-

Digitization by Arya Samaj Charitable Foundation, Chennai

ष्यस्याव्यावर्तकतया विशेषणजन्यत्वपर्यवसन्नम्। तथा च प्रकृतवाक्यार्थयथार्थज्ञानजन्यशब्दत्वं लक्षणं फलितम्। अत एव तदनुसारिणा मणिकृतापि—प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम् इत्युक्तम्। अस्यार्थः प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम् इत्युक्तम्। अस्यार्थः प्रयोगहेतुभूतं यद् अर्थतत्त्वज्ञानं-प्रमारूपमर्थज्ञानं तज्जन्यत्वम्। तथा चोक्त एवार्थः" इति।

केचित्तु—प्रयोगो हेतुभूतो यस्येति व्युत्पत्त्या प्रयोगाद्धेतोरुत्पन्नमिति व्युत्पत्त्या वा प्रयोगहेतुभूतपदं शाब्दत्वरूपजातिविशेषविशिष्टपरम्। तादृशं यद् अर्थतत्त्वज्ञानं तदेव जन्यं यस्येति रीत्या शाब्दप्रमाकरणत्वं लक्षणं पर्यवसितम्। अर्थपदं च स्वरूपकथनम्। न चैवं लक्ष्यतावच्छेदकलक्षणयोरभेद इति वाच्यम्। लक्ष्यप्रविष्टस्य विलक्षणप्रमाकरणत्वस्य लक्षणेऽनिवेशात्। तयोरभेदेऽपि क्षतिविरहाच्च। प्रमात्वं च पूर्ववत् तत्तत्संसर्गकतत्पदार्थघटितं बोध्यमिति प्राहुः।

ननु मौनिश्लोकेऽव्याप्तिः, यदा कदाचित् येन केनचित् क्रमव्युत्क्रमोच्चरितानामेव तत्तत्पदानां मौनिनार्थक्रमेणानुसन्धीयमानानां मौनिश्लोकत्वम्। तत्र च यस्मिन्नर्थे यदर्थांशे प्रमाणशब्दत्वं तदर्थविशेष्यकतदर्थप्रकारकयथार्थज्ञानजन्यत्वं नास्ति। तादृशज्ञानवता मौनिना अनुच्चरितत्वाद्, उच्चारकस्य च तादृशज्ञानाभावाद् इति। एवं यत्र वक्त्रा यदर्थबुबोधिषया वाक्यमुच्चरितं, श्रोत्रा तात्पर्यभ्रमेण लक्षणादिना वा तदितरयोग्यार्थोऽवगतः, तत्र श्रोतुरवगतार्थे तद्वाक्यस्याप्रामाण्यापत्तिः, तद्विशेष्यकतत्प्रकारकज्ञानजन्यत्वाभावात्। एवं शुकाद्युच्चरिते पयसा सिञ्चतीत्यादिवाक्येऽव्याप्तिः। शुकादेः प्रकृतवाक्यार्थानभिज्ञतया इदं वाक्यं सुखसाधनमिति सुखसाधनताज्ञानादेव तेन तद्वाक्यप्रयोगादिति चेत्—न। तेषामपि ईश्वरीयतादृशज्ञानजन्यतया लक्षणसमन्वयात्।

प्रयोगहेतु भूतेत्यादिशब्दप्रमाणलक्षणव्याख्यानावसरे रूचिदत्तमिश्राः प्राहुः—

अत्रार्थतत्त्वज्ञानं वाक्यार्थतत्त्वज्ञानम्। तथा चान्यवाक्यार्थतत्त्वज्ञानरूपपरमेश्वरज्ञानजन्यतया अयोग्ये शब्देऽतिव्याप्तिवारणाय प्रयोगहेतुभूतेति विशेषणम्। तदर्थोऽपि प्रयोगहेतुतावच्छेदकावच्छिन्नत्वम्। तथा च स्वसमानविषयकवाक्यार्थज्ञानत्वेन तद्धेतुत्वाद् वाक्यार्थज्ञानत्वं यत्र जनकतावच्छेदककोटिप्रविष्टम्, तादृशतत्त्वज्ञानजन्यत्वं पर्यवस्यति। एवं च नोक्तातिप्रसङ्गः। ईश्वरज्ञानस्य तेन रूपेण तत्राजनकत्वात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

यद्वा स्वार्थज्ञानत्वेन प्रयोगहेतुत्वात् स्वार्थतत्त्वज्ञानजन्यत्वमेव विवक्षितमिति नोक्तदोषः।

स्वार्थत्वं च स्वप्रतिपाद्यवाक्यार्थत्वम्। तेन स्वरूपायोग्ये घटः कर्मत्वम्, आनयनं कृतिरिति निराकाङ्क्षे नातिव्याप्तिः। स्वरूपयोग्यस्य च तस्य संग्राह्यत्वमेव। प्रमाणशब्दत्वेन प्रमाजननस्वरूपयोग्यस्यैव लक्ष्यत्वात्। एवमनासन्नादेरपि स्वरूपयोग्यत्वात्संग्राह्यत्वमेव।

केचित्तु काकाक्षिगोलकन्यायेन लक्षणेऽपि शब्दपदं ज्ञानजननस्वरूपयोग्यशब्दपरम्। तेन स्वरूपायोग्यनिरासः। तावन्मात्रं चायोग्येऽपीति पूर्वप्रतीकम्। न च तथापि तत्त्वपदमफलं, स्वार्थाभावादेव तत्राप्रसङ्गादिति वाच्यम्। स्वज्ञाप्यस्यैव स्वार्थत्वात् तस्य च तत्रापि सत्वात् इत्याहुः।

केचित्तु प्रयोगो हेतुभूतो ज्ञापको यस्यार्थस्य तत्तत्त्वज्ञानजन्यत्वं तदित्याहुः।

नव्यास्तु—प्रमाणशब्दव्यवहारार्थमिदं लक्षणम्। योग्येऽप्याकाङ्क्षारहिते प्रमाजनके शब्दे तान्त्रिकाणां तदव्यवहारात् तस्यासंग्राह्यत्वमेव। एवं चाकाङ्क्षा-आसत्त्याद्युपेतपदकदम्बकात्मकवाक्यरचना प्रयोगः तद्धेतुभूतं तज्जननानुकूलसहकारिविशिष्टं यत् स्वार्थतत्त्वज्ञानं तज्जन्यशब्दत्वं लक्षणम्। अत एवाकाङ्क्षा-योग्यतासत्तिमान् शब्दः प्रमाणमित्याहुः—इति।

तर्कसङ्ग्रहतद्व्याख्यानेषु शब्दलक्षणम्

तर्कसंग्रहे तु—आप्तवाक्यं शब्द इत्युक्तम्। आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम्। प्रमाणशब्दत्वं लक्ष्यतावच्छेदकम्। वाक्यत्वमात्रोक्तावनाप्तोच्चरितवाक्येऽतिव्याप्तिः। अत आप्तोच्चरितत्वनिवेशः। तावन्मात्रोक्तौ निरर्थकजबगडदशादावतिव्याप्तिः, अतो वाक्यत्वं निवेशितम्। आप्तत्वं च प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम्। तथा च प्रयोगहेतुभूतयथार्थज्ञानजन्यशब्दत्वमिति पर्यवसन्नार्थः इति न्यायबोधिनी। मणिच्छायामनुकरोति।

नीलकण्ठप्रकाशिकायाम्—' मूले आप्तवाक्यं शब्द इति। शब्द इति लक्ष्यनिर्देशः। प्रमाणशब्द इति तदर्थः। आप्तवाक्यमिति लक्षणम्। भवति हि पयसा सिञ्चतीत्यादिशब्दः आप्तोक्तवाक्यम्। न तु वह्निना सिञ्चतीत्यादिशब्दः, तदुच्चारणकर्तुः यथार्थवक्तृत्वरूपाप्तत्वाभावात्। प्रकृतवाक्यार्थगोचरयथार्थज्ञा-

Digitization by Arya Samaj Charitable Foundation, Chennai

नजन्यवाक्यं प्रमाणशब्द इति तु निष्कर्षः। वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात् लक्षणसंङ्गतिः। स्फुटमेतत् शब्दमणौ इत्युक्तम्।

तर्कसंग्रहव्याख्यायां **वाक्यवृत्तौ** तावत्—**यथार्थवक्तेति**। प्रकृतवाक्यार्थविषयकयथार्थशाब्दबोधविषयकतात्पर्यवानित्यर्थः। तथा चैतादृशतात्पर्यजन्यवाक्यत्वं प्रमाणशब्दत्वं पर्यवसितम्। वाक्यं प्रति वाक्यार्थबुबोधयिषायाः कारणत्वादित्युक्तम्।

नृसिंहप्रकाशिकायां तु— (पृ. ३१३) **आप्तवाक्यमिति**। आप्तोच्चारितवाक्यमित्यर्थः। शब्द इति। शब्द प्रमाणमित्यर्थः। इदं च ज्ञायमानशब्दस्य प्रमाणत्ववाद्याचार्यमतानुसारेण। सिद्धान्ते तु वाक्यज्ञानं शब्दप्रमाणम्। एतेन वाक्याभावेऽपि मौनिकर्तृकलिप्यादिज्ञानजन्यवाक्यज्ञानात् शाब्दबोधोत्पत्त्या व्यतिरेकव्यभिचारेण वाक्यस्य शब्दप्रमाणत्वं न सङ्गच्छत इति दूषणमपास्तम्। **यथार्थवक्तेति**। प्रकृतार्थप्रमातैवेत्यर्थः। तादृशप्रमातृकवाक्यत्वं शब्दप्रमाणलक्षणमिति भावः। अत्र तादृशप्रमातृकर्तृकवाक्यत्वापेक्षया प्रकृतवाक्यार्थविषयकप्रमाजन्यवाक्यत्वस्य लघुतया तस्यैव शब्दप्रमाणलक्षणत्वमुचितम्। वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वाल्लक्षणसङ्गतिः—इत्युक्तम्।

दिपिकाव्याख्याने रामरूद्रीये—(पृ.३१३) —

आप्तवाक्यमिति। वाक्यज्ञानमित्यर्थः। तेन मौनिश्लोकादौ वाक्यविरहेऽपि शाब्दबोधोत्पत्त्या वाक्यस्य शाब्दबोधकारणत्वासंभवेऽपि न क्षतिः, तत्रापि वाक्यानुमानेन वाक्यज्ञानसत्त्वात्। अनाप्तोच्चरितत्वप्रकारकवाक्यज्ञानेऽतिव्याप्तिवारणाय आप्तपदनिवेशनम्। तथा च इदमाप्तोच्चरितमित्याकारकम् आप्तोच्चरितत्वप्रकारकवाक्यविशेष्यकज्ञानं शब्दप्रमाणमित्यर्थः। आप्तश्च यथार्थवक्ता—प्रकृतवाक्यार्थविषयकयथार्थज्ञानप्रयोज्यशब्दोच्चारणकर्ता। तद्वाक्यं तदुच्चरितवाक्यम्। अत्र च प्रकृतवाक्यार्थज्ञाने यथार्थत्वं च सर्वांशे भ्रमभिन्नत्वम्। तेन वह्निना सिञ्चतीति वाक्यजन्यज्ञानस्य किंचिदंशे प्रमात्वेऽपि न क्षतिः।—इत्याद्युक्तम्।

शब्दशक्तिप्रकारिकोक्तं शब्दलक्षणम्

मङ्गलश्लोकव्याजेन शब्दप्रमाणलक्षणमपि सूचितं **जगदीशतर्कालंकारैः शब्दशक्तिप्रकाशिकायाम्—**

Digitization by Arya Samaj Charitable Foundation, Chennai

अनुभवहेतुः सकले सद्यः समुपासिता मनुजे ।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी ॥ २ ॥

इति । अनेन अनुभवजनकसाकाङ्क्षासन्नयोग्यपदसमूहात्मकं ज्ञायमानं वाक्यं शब्दप्रमाणमिति लक्षणं सूचितं भवति ।

मीमांसाशास्त्रोक्तं शब्दप्रमाणलक्षणम्

"औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः" (जै.सू.१-१-५) इति सूत्रे प्रत्यक्षादिषट्प्रमाणानां लक्षणं वदन् भाष्यकारः शब्दप्रमाणलक्षणकथनावसरे शब्दविशेषस्य शास्त्रस्य लक्षणमुक्तवान्—

"शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानम्" इति । शास्त्रशब्देनात्र पङ्कजादिपदवद् योगरूढ्या धर्माधर्मोपदेशीनि चतुर्दश अष्टादश वा विद्यास्थानान्युच्यन्ते । शब्दविज्ञानादित्यत्र शब्दशब्देन सामान्यवाचिना प्रकृतत्वात् चोदनाभिधीयते । अर्थशब्देन धर्माधर्मावभिधीयेते । ततश्चायमर्थः—चोदनात्मकशब्दविज्ञानात् प्रमाणान्तरागम्यधर्माधर्मविषयकज्ञानजनकं शास्त्रम् इति । प्रमाणान्तरागम्यधर्माधर्मविषयकज्ञानजनकज्ञानविषयत्वे सति चोदनात्वं शांस्त्रलक्षणमिति फलितम् । शास्त्रपदं अपनीयशब्दपदनिक्षेपे शास्त्रतदितरशब्दसामान्यलक्षणमपि लभ्यते भाष्यात् । तथा हि—

असंनिकृष्टवाचा च द्वयमत्र जिहासितम् ।
ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वा ॥

इति वार्तिकोक्तरीत्या भाष्यस्थेन असंनिकृष्टपदेन प्रमाणान्तराप्राप्तत्वमबाधित्वं चोच्यते । एवं च यः शब्दः स्वविषयकज्ञानेन मानान्तराप्राप्ताबाधितार्थज्ञानं जनयति स शब्दप्रमाणमत्युक्तं भवति । मानान्तराप्राप्ताबाधितार्थविषयकज्ञानजनकज्ञानविषयत्वे सति शब्दत्वं शब्दप्रमाणलक्षणमिति फलितम् ।

अत एव **शास्त्रदीपिकायाम्**—(पृ.७२)

"शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानमिति । विज्ञातात् शब्दात् पदार्थाभिधानद्वारेण यद्वाक्यार्थविज्ञानं तच्छाब्दं नाम प्रमाणम् । तल्लोकसिद्धत्वान्न परीक्षितव्यम् । तच्च द्विविधम् पौरुषेयमपौरुषेयं चेति । तत्र पौरुषेयमाप्तवाक्यम् । अपौरुषेयं च वेदवाक्यम् । उभयमप्यनाप्तप्रणीतत्वदोषविरहात् स्वतश्च शब्दस्यादुष्टत्वात् प्रमाणम्" इत्युपपादितम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अनेन पदार्थाभिधानद्वारा वाक्यार्थज्ञानजनकज्ञानविषयत्वं शब्दप्रमाणलक्षणमित्युक्तं भवति। लोकवार्तिके—भाष्यकारेण 'शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानम्' इति शब्दविशेषस्य शास्त्रस्यैव लक्षणमुक्तम्, कुतः शब्दसामान्यस्य लक्षणं नोक्तम् इत्याशङ्क्य—लौकिकवाक्यलक्षणस्य वेदव्याख्याने नातीव उपयोगः। अपि च सामान्यमन्तरेण विशेषाभावाद् विशेषलक्षणे कथिते ततः सामान्यलक्षणं सुखग्राह्यमित्याशयेन भाष्यकारः शब्दप्रमाणसामान्यलक्षणं नोक्तवान् इति समाधाय—

'तस्माच्छब्देन या मतिः।

तस्याः स्वतः प्रमाणत्वं न चेत् स्याद्दोषदर्शनम्।' (पृ.२९७).

इति ग्रन्थेन दोषदर्शनरहितशब्दविज्ञानाद् असन्निकृष्टेऽनधिगतेऽबाधिते च वाक्यार्थे यद् ज्ञानं तत्साधनं शब्दप्रमाणमिति प्रदर्शितम्। आप्तोपदेशः शब्द इति लक्षणं तु अपौरुषेये वेदेऽव्याप्तमिति च न्यरूपि।

वेदान्तपरिभाषोक्तं शब्दप्रमाणलक्षणम्

"यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते, तद्वाक्यं प्रमाणम्" इति शब्दप्रमाणलक्षणमुक्तम्। मानान्तराबाधिततात्पर्यविषयीभूतपदार्थसंसर्गबोधकवाक्यत्वं शब्दप्रमाणलक्षणमिति निष्कर्षः। शब्दसमानार्थके प्रमाणान्तरेऽतिव्याप्तिवारणाय वाक्यत्वनिवेशः। पदार्थसंसर्गबोधकवाक्यत्वस्य 'अग्निना सिञ्चेत्' इत्ययोग्यवाक्येऽपि सत्त्वात् तत्रातिव्याप्तिवारणाय अबाधितेति संसर्गविशेषणम्। ब्रह्मपरवाक्यातिरिक्तसकलवाक्येषु स्वार्थसंसर्गस्य 'नेह नानास्ति किंचन' इत्यादिना बाधितत्वाद् अव्याप्तिरित्यत उक्तं मानान्तराबाधितेति। सजातीयमानान्तराबाधितेत्यर्थः। तथा च पारमार्थिकतत्त्वावेदकैर्वेदान्तैः घटानयनादिसंसर्गस्य यागस्वर्गादिसाध्यसाधनभावस्य च बाधेऽपि सजातीयैर्व्यावहारिकतत्त्वावेदकैः प्रमाणान्तरैर्बाधाभावान्नाव्याप्तिः। अर्थवादवाक्ये "स प्रजापतिरात्मनो वपामुदखिदत्" इत्यादौ श्रूयमाणपदार्थसंसर्गस्य व्यवहारदशायामपि बाधात् तात्पर्यविषय इत्युक्तम्।

द्वैतवाद्युक्तं शब्दलक्षणम् (तर्कताण्डवे भा. II पृ.२)

प्रमाणपद्धतौ निर्दोषशब्दत्वं निर्दोषवाक्यत्वं वा आगमलक्षणमित्युक्तम्। अत्र आद्यं 'निर्दोषः शब्द आगमः' इति प्रमाणलक्षणानुसारि। निष्प्रयोजनत्वा-

Digitization by Arya Samaj Charitable Foundation, Chennai

दिदोषनिरासार्थमावश्यकेन निर्दोषत्वविशेषणेनैव निरभिधेये अनन्विते चाप्यतिव्याप्तिनिरासेन वाक्यग्रहणस्यानपेक्षितत्वात्। द्वितीयं तु "आगमोऽदुष्टवाक्यं च" इति ब्रह्मतर्कानुसारि। अत्र वा वाक्यग्रहणम्, शिष्याणां पदवाक्यादिस्वरूपज्ञापनार्थम्। अत एव पद्धतौ "द्वितीयपक्षे विभक्त्यन्ता वर्णाः पदम्। आकाङ्क्षायोग्यतासन्निधिमन्ति पदानि वा वाक्यम्" इत्यादिना पदादीनां लक्षणमुक्तम् इति तर्कताण्डवकाराः। आप्तवाक्यं शब्द इति तु अपौरुषेयवेदाव्यापनादयुक्तमिति तैरेवोक्तम्।

न्यायपरिशुद्ध्युक्तं शब्दलक्षणम्

अनाप्तानुक्तवाक्यं शब्द इति **न्यायपरिशुद्धौ** वेदान्तदेशिकैः लक्षणमभिहितम्। इदं च पौरुषेयापौरुषेयप्रमाणशब्दसामान्यलक्षणम्। वेदे आप्तोक्तत्वमिव अनाप्तोक्तत्वमपि नास्तीति अनाप्तानुक्तवाक्यत्वसत्त्वात् समन्वयः। आप्तोक्ते पौरुषेयवाक्ये अनाप्तानुक्तत्वसत्त्वात् समन्वयः। अनाप्तोक्ते शब्दाभासे च अनाप्तानुक्तत्वविरहान्नातिव्याप्तिरिति तदाशयः।

सांख्यदर्शनोक्तं शब्दलक्षणम्

सांख्यकारिकायां—(४)

"दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।

त्रिविधं प्रमाणमिष्टं"

इति प्रमाणत्रैविध्यमुक्त्वा,

'आप्तश्रुतिराप्तवचनं तु'(५)

इति आप्तवचनस्य लक्षणमुक्तम्।

"आप्ता-प्राप्ता, युक्तेति यावत्। आप्ता चासौ श्रुतिश्चेत्याप्तश्रुतिः। श्रुतिः—वाक्यजनितं वाक्यार्थज्ञानम्"

इति तद्व्याख्यायां **कौमुद्यामुक्तम्**।

श्रुतिशब्दः जहदजहल्लक्षणया शब्दसामान्यपरः। आप्तपदस्य युक्ता सत्यार्थबोधनसामर्थ्येन समीचीना, दोषविहीनेति वा अर्थः। बुद्धिवृत्तेरेव सांख्यमते प्रमाणशब्देन व्यवह्रियमाणत्वात् वाक्यजनितं वाक्यार्थज्ञानमित्युक्तम्। तथा

Digitization by Arya Samaj Charitable Foundation, Chennai

च निर्दोषवाक्यजन्यं वाक्यार्थज्ञानम् आगमप्रमाणमित्युक्तं भवति। शब्दस्य प्रमाणत्वे तु निर्दोषवाक्यं शब्द इति फलति।

नागेशोक्तं शब्दप्रमाणलक्षणम् (लघुमञ्जूषायाम्)

तत्तद्वाक्यव्यङ्ग्यस्फोटस्यैवार्थबोधकत्वेन वस्तुतः प्रमाणत्वेऽपि लोकव्यवहारदृष्ट्या व्यञ्जकशब्देऽपि प्रमाणत्वमस्तीति समालोच्य नागेशेन—तत्राप्तोपदेशरूपः शब्दः प्रमाणम्। आप्तो नाम अनुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान्, रागादिवशादपि नान्यथावादी यः सं इति चरके पतञ्जलिः—इत्युक्तम्। आप्तोपदेश इत्यस्य आप्तश्चासावुपदेशः, आप्तस्योपदेश इति द्वेधा निग्रहाद् आप्तत्व-आप्तोक्तत्वान्यतरवानुपदेश इत्यर्थः। अपौरुषेयस्य वेदस्य स्वत एवाप्तत्वम्, पौरुषेयस्य वाक्यस्य तु आप्तोक्तमिति उभयानुयायीदं लक्षणम्।

खण्डनखण्डखाद्योक्तदूषणपरामर्शः[पृ.४३७]

आप्तवाक्यं शब्दः प्रमाणमिति न युक्तम्। विकल्पानुपपत्तेः। तथा हि कोऽयमाप्तो नाम ? यथादृष्टवादीति चेत् न। भ्रान्तिप्रतिपन्नवादिवाक्येऽतिव्याप्तेः। देहात्मनोरैक्यं भ्रान्त्या प्रतिपद्य यो वक्ति देह एवात्मेति सोऽप्याप्तः स्यात्, यथादृष्टवादित्वात्, तद्वाक्यं चाप्तवाक्यतया प्रमाणं स्यादिति यावत्। प्रमाणंदृष्टार्थवादी आप्त इत्युक्ते उक्तदोषवारणेऽपि प्रमाणेनार्थमुपलभ्य तस्यैवान्यथात्वं यो वक्ति स आप्तः स्यात् तद्वाक्यं च प्रमाणं स्यात्। यथाप्रमाणदृष्टार्थवादी आप्त इत्युक्ते येन प्रकारेण प्रमाणतोऽर्थो दृष्टः तस्य तथावादी आप्तः इति पर्यवसानात् पूर्वोक्तदोषवारणेऽपि अंशे तथाभूतवादिवाक्यस्यायथार्थस्यापि प्रमाणत्वं स्यात्। 'ते ग्रावाणः प्लवन्ते' इति यो वक्ति स आप्तः स्यात् तद्वाक्यं च प्रमाणं स्यात्। ते ग्रावाण इत्यंशे यथाप्रमाणदृष्टार्थवादित्वात्। ननु यथाप्रमाणदृष्टार्थवादीत्यस्य नायमर्थः प्रमाणदृष्टयत्किञ्चिदर्थवादीति, येनोक्तदोषः स्यात्। अपि तु यावद्यथाप्रमाणदृष्टवादीत्यर्थः। प्रमाणतो येन प्रकारेण यावद् दृष्टं तावद् एव तथा वादीति यावत्। अतो नोक्तदोषः, प्रमाणतोऽदृष्टस्यापि प्लवनस्य कथनाद् इति चेन्न। आप्तत्वेन सम्मतेष्वव्याप्तेः। न ह्याप्ताः प्रमाणदृष्टं सर्वं वदन्ति। ननु यथाप्रमितस्यैव वक्ता आप्त इत्युक्तौ नोक्तदोषः। प्रमितस्यैव वक्तारः आप्ता इति। नापि ग्रावाणः प्लवन्त इति वक्तर्यतिव्याप्तिः, अप्रमितस्यापि प्लवनस्य कथनेन प्रमितस्यैवेति विशेषणाभावाद् इति चेत्-न।

Digitization by Arya Samaj Charitable Foundation, Chennai

युधिष्ठिरवाक्येऽव्याप्त्यापत्तेः। युधिष्ठिरः खलु सत्यवादित्वेन सर्वलोकप्रसिद्धः। तस्यापि क्वचिदनृतवादित्वं भारते स्मर्यते यथा 'अश्वत्थामा हतः' इति। अतो युधिष्ठिरः अनाप्तः स्यात्।

ननु यं विषयं यथा प्रमिनोति तं विषयं तथा वक्ता आप्तः तद्वाक्यं तस्मिन् विषये प्रमाणमिति विषयविशेषनियन्त्रितलक्षणकथने न दोष इति चेत्-लक्षणस्याननुगतत्वापातात्। तथा चाव्याप्तिः।

निर्दोषः (अज्ञानसंशयविपर्ययरागद्वेषादिहीनः) आप्तः तद्वाक्यं शब्दः इत्यपि न। सदोषस्य नास्ति घटः इत्यभिधातुमिच्छतः पुरुषस्य मुखाद् दैववशनिर्गते अस्ति घट इति यथार्थवाक्येऽव्याप्तेः।

किं च निर्दोषपदेन किं सकलदोषराहित्यं विवक्षितम्? उत किंचिद्दोषराहित्यम्। आद्येऽसम्भवः, युधिष्ठिरस्यापि किंचिद्दोषदर्शनेन निर्दोषत्वस्य कुत्राप्यभावात्। द्वितीये लक्षणाननुगमः।

यथार्थवाक्यं शब्द इत्यपि न। आंशिकयथार्थवाक्येऽतिव्याप्तेः। दैवान्निर्गतवाक्येऽव्याप्तेश्च इत्यादिदूषणानि श्रीहर्षेण प्रदर्शितानि।

एतेषां दूषणानां परिहारः पूर्वमेवोक्तप्रायः। विषयभेदेनैव विशिष्यैव तत्तद्वाक्यस्य लक्षणमिष्टम्। अतोऽननुगमो न दोषाय। तद्विशेष्यकतत्संसर्गकतत्प्रकारकप्रमाजनकः शब्दः लक्ष्यः, तद्विशेष्यकतत्संसर्गकतत्प्रकारकयथार्थज्ञानजन्यत्वं लक्षणमिति मणिकृता निष्कृष्टत्वान्न कोऽपि दोषः प्रसजतीति।

चित्सुखीयदूषणानुवादः

एतेन यत् चित्सुखमुनिना तत्त्वप्रदीपिकायां दूषितम्—(पृ. २६५) तथा आप्तवाक्यं शब्दप्रमाणमिति नैयायिकोक्तं लक्षणमप्यलक्षणम्।

आप्तोदीरितवाक्येषु मालतीमाधवादिषु।
व्यभिचारान्न तद्युक्तमाप्तत्वस्यानिरुक्तितः॥

स्वकपोलकल्पितमालतीमाधवादिवाक्येषु प्रमाण्याभावादतिव्याप्तिः। न हि पुरा आप्त एव सन् नाटकनाटिकादिप्रबन्धविरचनमात्रेणानाप्तो भवति भवभूतिः। उक्तं चैतदुम्बेकेन—

Digitization by Arya Samaj Charitable Foundation, Chennai

> **यदाप्तोऽपि कस्मैचिदुपदिशति न त्वयाननुभूतार्थ-विषयं वाक्यं प्रयोक्तव्यं यथाङ्गुल्यग्रे हस्तियूथ-शतमास्ते इति तत्रार्थव्यभिचारः स्फुटः—**

इति।

कश्चायमाप्तो नाम, यथादृष्टार्थवादीति चेन्न। भ्रान्तवाक्येऽपि प्रसङ्गात्। प्रमाणदृष्टेति विशेषणेऽपि प्रमाणदृष्टस्य प्रमादादिना अन्यथाकथनेऽपि प्रसङ्गात्।

प्रमाणेन यथा दृष्टं तथा वादीति चेत् मैवम्। एकदेशे तथाभूतवादित्वेऽप्यंशान्तरेऽन्यथाभूतवादिन्यपि प्रसङ्गात्।

यावत् प्रमाणदृष्टं तावद् एव वक्ता आप्त इति चेन्न। अज्ञातसंदिग्धानुवादादिवाक्यप्रयोक्तुरनाप्तत्वप्रसङ्गात्।

अथ निर्दोष आप्त इति चेत् मैवम्। आप्तानामपि क्वचिद् रागादिदोषसम्भवात्। यत्र विषये यो निर्दोषः स तत्र आप्त इति चेन्न। यत्तच्छब्दयोर्विशेषविषयत्वेन असाधारण्यादव्याप्तेः। तस्माद् आप्तवाक्यमागम इत्यप्यलक्षणम्।

यथार्थवाक्यं शब्दप्रमाणमित्यपि न। यथार्थत्वस्य प्रमितिखण्डनावसर एव खण्डितत्वात्।

एतेन समयबलेन सम्यक् परोक्षानुभवसाधनं शाब्दम् इति भूषणोक्तलक्षणमप्यपास्तम्। यत्र हि वणिजां समयबलेन ऊर्ध्वीकृता तर्जन्यङ्गुलिः दशसंख्यामनुमापयति तत्रानुमाने त्वदुक्तलक्षणमतिव्याप्तम्। अनुविधेयः प्रभुः। प्रभोः सेनोद्योगपरावृत्त्याद्यभिप्रायं समयबलेन शङ्खध्वनिः सैनिकानामनुमापयति। तत्र चातिव्याप्तमित्यर्थः। ऊर्ध्वीकृततर्जन्या दशसंख्यानुमाने शङ्खध्वनौ चानुविधेयपुरुषाभिप्रायानुमापके व्यभिचारात्। समयसम्यक्त्वयोश्च पूर्वमेव निरासादिति तदपि प्रत्युक्तम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

II

शब्दप्रामाण्यविचारः

एतावता शब्दस्य लक्षणं विचारितम्। अथ शब्दः प्रमाणं न वा? प्रमाणत्वेऽपि अनुमानातिरिक्तं न वा इति विचार्यते।

चार्वाकमतम्, तन्निरासश्च

प्रत्यक्षमेकमेव प्रमाणमिति वदन्तश्चार्वाकाः शब्दस्य प्रमाणतामेव नाङ्गीकुर्वन्ति। तन्मतनिरासप्रकारोऽयम्—चार्वाकाः केन हेतुना शब्दस्याप्रामाण्यं वदन्तीति परिशीलनीयम्। केचन शब्दा अप्रमाणभूता अपि दृश्यन्त इति तत्साधर्म्येण सर्वे शब्दाः अप्रमाणमिति तेषामाकूतम्। तथा च विमतः शब्दः अप्रमाणं शब्दत्वाद् अप्रमाणत्वेन सम्प्रतिपन्नशब्दवद् इति। एतच्च प्रत्यक्षातिरिक्तस्यानुमानस्य शब्दस्य च प्रामाण्यानङ्गीकारे न घटते। शब्दाप्रामाण्यानुमानस्याप्रामाण्ये शब्दप्रामाण्यमेव स्थिरीकृतं भवति। तस्य प्रामाण्ये तु अनुमानप्रामाण्यमेव स्थिरीकृतं भवति। अपि च शब्दः अप्रमाणमिति प्रयोगः अप्रामाण्यसंशयवतां तद्विपर्ययवन्तं प्रति वा अर्थवान्। पुरुषान्तरगतौ च संशयविपर्ययौ न प्रत्यक्षगोचरौ। अतोऽनुमानेन शब्देन वा तदीयसंशयविपर्ययौ ज्ञात्वा तन्निरासाय पुरुषान्तरं प्रति शब्दाप्रामाण्यानुमानप्रयोगः कार्य इति शब्दानुमानयोः प्रामाण्यमवर्जनीयम्।

अपि च "प्रत्यक्षातिरिक्तं न प्रमाणम्" इति भवद्वचनं प्रमाणं न वा? आद्ये शब्दस्य भवद्वचनाख्यस्य प्रामाण्यं सिद्धम्। द्वितीये प्रत्यक्षातिरिक्ताप्रामाण्यबोधकस्य भवद्वचनस्याप्रमाणत्वे प्रत्यक्षातिरिक्तस्याप्रामाण्यासिद्ध्या प्रत्यक्षातिरिक्तशब्दादेः प्रामाण्यमेव दृढीकृतं भवति। तदुक्तमनुमानमणौ (पृ.१०८)

"अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वाद्, एतद्वाक्यस्य संदिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्, तयोश्च परकीययोरप्रत्यक्षत्वाद् अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च"— इति

अपि च अनाप्तानुक्तवाक्यं प्रमाणम्, कारणदोषबाधकप्रत्यययोरदर्शनात्। अनाप्तोक्तवाक्यं तु न प्रमाणम्, कारणदोषबाधकप्रत्यययोर्दर्शनात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

न चानाप्तानुक्तवाक्यं न प्रमाणम्, वाक्यत्वाद्, अनाप्तोक्तवाक्यवद् इति वाच्यम्। स्ववचनविरोधात्। तथा हि अनाप्तानुक्तवाक्यं न प्रमाणमिति भवद्वाक्यं प्रमाणं न वा ? आद्ये न प्रमाणमिति त्वद्वचनविरोधः। द्वितीये न प्रमाणमिति वाक्यस्याप्रमाणत्वे प्रमाणमित्येव सिध्यतीति त्वद्वचनविरोधः तदवस्थ एव। न च मद्वाक्यव्यतिरिक्तवाक्यं पक्षः, अतो न स्ववचनविरोधः इति वाच्यम्। तर्हि त्वद्वाक्ये अप्रमाणत्वरूपसाध्याभाववति वाक्यत्वरूपहेतुसत्त्वात् व्यभिचारः। नचैवं सति सर्वेषां वाक्यानां प्रामाण्यं स्यादित्याशङ्कनीयम्। भ्रान्तादिवाक्यानां दोषमूलत्वस्य दुरपह्नवत्वात्। अन्येषां तु तदभावाद्-इति **न्यायपरिशुद्धौ वेदान्तदेशिकैः** प्रत्यपादि। (पृ. १४९)

शब्दखण्डमणौ चार्वकनिरास –(पृ.१४)

ननु शब्दो न प्रमाणम्। तथा हि करणविशेषः प्रमाणम्। करणं च तत् यस्मिन् सति क्रिया भवत्येव। न च शब्दे सति प्रमा भवत्येवेति नायं शब्दः प्रमाणम्। न च शब्दो न प्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघातः। अस्याप्रामाण्येऽपि एतदुत्थाप्यमानाविसंवादाद् इत्याशङ्क्य।

आकाङ्क्षादिमतः पदार्थस्मरणादिव्यापारवतः प्रमाणत्वेन तथाभूतात् प्रमोत्पत्तेरावश्यकत्वाद्, अतयाभूतत्वे च फलाजनकत्वस्य कारणान्तरसाम्याद् इति समाहितम्।

पूर्वपक्षसमाधानयोरयमाशयः—प्रमायाः करणं हि प्रमाणम्। फलोपधायकं कारणमेव करणम्। यदि च शब्दे श्रुते सति अवश्यं प्रमा भवेत् तदा शब्दः प्रमाणं भवेत्। आकाङ्क्षादिज्ञानविरहदशायां पदार्थस्मरणादिव्यापारविरहदशायां च शब्दात् प्रमानुत्पत्तेः न शब्दः प्रमाणम्। ननु 'शब्दो न प्रमाण'मिति वाक्येस्य प्रमोपधायकत्वे प्रमोपधायकान्यत्वव्याघातः। आयातं चास्य शब्दस्य प्रमाणत्वम्। अप्रमोपधायकत्वे च किं तद् अप्रमोपधायकत्वम्? भ्रमोपधायकत्वं वा प्रमानुपधायकत्वं वा ? आद्ये आयातं शब्दमात्रस्य प्रमोपधायकत्वम्। प्रकृतवाक्यजन्यज्ञानस्य विषयबाधेनैव भ्रमत्वात्। द्वितीये शब्दस्य प्रमोपधायकान्यत्वे मानाभावः। भवदुक्तवाक्यस्यैव तत्र मानत्वात्। तथा च यदि 'शब्दः न प्रमाणम्' इति भवदुक्तवाक्यं प्रमित्युपधायकं तदा शब्दमात्रस्य प्रमित्यनुपधयकत्वं निष्प्रमाणकम् इति चेन्न। एतज्जन्यपदपदार्थोपस्थितितदसंसर्गाग्रहसहकृतमनस एव शब्दस्य प्रमोपधायकान्यत्वे प्रमाणत्वाद्-इति पूर्वपक्षः।

Digitization by Arya Samaj Charitable Foundation, Chennai

सिद्धान्तस्तु—आकाङ्क्षाज्ञानादिसहकृतस्य पदार्थोपस्थितिव्यापारवतः शब्दस्यैव प्रमाणत्वस्वीकारात् तथाविधशब्दाच्च प्रमोत्पत्तेरावश्यकत्वात् शब्दः प्रमाणमेव। इतरसामग्र्यसमवधाने फलाजनकत्वं तु चक्षुरादावपि तुल्यम्। अतो नान्वयव्यभिचारेण शब्दस्य प्रमाजनकत्वाभावः शङ्कनीयः। स्वेतरयावत्कारणसत्त्वे स्वसत्त्वे यदि न कार्यं तदैव अन्वय-व्यभिचाराद् इति।

शब्दस्य पृथक्प्रमाणत्वम्

तत्र बौद्धाः वैशेषिकाश्च शब्दस्य पृथक्प्रामाण्यमनङ्गीकुर्वाणाः अनुमानविधयैव प्रामाण्यमाचक्षते। तत्र तावत् न्यायसूत्रकारः शङ्कासमाधानपूर्वकं शब्दस्यानुमानगतार्थतां निराचख्यौ। तथा हि— शब्दः न पृथक् प्रमाणं, सः अनुमानविधयैवार्थप्रत्यायकः। यथा खलु प्रत्यक्षेणाज्ञायमानं साध्यं ज्ञातेन लिङ्गेन पश्चान्मीयतेऽनुमानस्थले, तथैव ज्ञातेन (श्रुतेन) शब्देन पश्चादर्थो ज्ञायते प्रत्यक्षादिनानवगम्यमानः इति शब्दोऽपि लिङ्गविधयैवार्थबोधकः इति भावेन

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् (न्या.सू.२-१-४९)

इति सूत्रेणाशङ्कितवान्। ततः यत्र द्वयोः प्रमाणयोः भेदो भवति तत्र प्रमाणयोः अर्थबोधनप्रकारे वैलक्षण्यं दृश्यते यथा प्रत्यक्षानुमानयोः अनुमानोपमानयोश्च। प्रत्यक्षस्थले हि अज्ञायमानाद् इन्द्रियाद् अर्थज्ञानं भवति, अनुमानस्थले च ज्ञायमानात् लिङ्गात् अर्थज्ञानं भवति। उपमानस्थले सादृश्यज्ञानादर्थप्रतिपत्तिः, नैवमनुमानस्थले इति प्रमाणप्रवृत्तिभेदात् प्रमाणभेदः। शब्दानुमानयोस्तु नैवं प्रवृत्तिभेदोऽस्ति, ज्ञातादेव शब्दादर्थप्रतीतेः, ज्ञातादेव लिङ्गादर्थप्रतीतेश्च। अतः शब्दोऽनुमानमेवेत्याशशङ्के—

उपलब्धेरद्विप्रवृत्तित्वात् (न्या.सू.२-१-५०)

इति सूत्रेण। अपि च अनुमानस्थले सम्बद्धयोः हेतुसाध्ययोर्मध्ये हेतोः दर्शनानन्तरं सम्बन्धस्मृतौ सत्यां साध्यप्रमितिर्भवति। तथैव सम्बध्योः शब्दार्थयोर्मध्ये शब्दविषयकश्रावणप्रत्यक्षानन्तरं सम्बन्धस्मृतौ सत्यामर्थप्रतीतिर्भवति शब्दस्थले इति शब्दस्य नानुमानात् पृथक् प्रामाण्यमिति—सम्बन्धाच्च इति सूत्रेण (न्या.सू.२-१-५१) शङ्कितवान्। तत्र समाधानमवोचत्—

आप्तोपदेशसामर्थ्याच्छब्दादर्थसम्प्रत्ययः (न्या.सू.२-१-५२) प्रत्यक्षेणानवगम्यमानानां स्वर्गः अप्सरसः उत्तरा कुरवः सप्त द्वीपाः समुद्रः लोकसन्निवेशः

Digitization by Arya Samaj Charitable Foundation, Chennai

इत्यादीनामर्थानां न शब्दमात्रात् प्रत्ययः। किं तर्हि ? अयं शब्दः आप्तैरुक्तः इति शब्दगतस्य आप्तोक्तत्वस्य ज्ञानादेव समीचीनः प्रत्ययः भवति। अनुमानस्थले तु नैवमिति प्रवृत्तिभेदसद्भावात् शब्दस्यानुमानातिरिक्तप्रमाणत्वमिति तदर्थः।

एवं च सूत्रद्वयोक्तशङ्काद्वयनिरासो जातः। यदुक्तं 'सम्बन्धाच्च' इति, तत्र भाष्यकारः समाधत्ते—शब्दार्थयोः सम्बन्धः कश्चिद् अङ्गीक्रियते, प्राप्तिरूपस्तु सम्बन्धो नाङ्गीक्रियते। प्राप्तिर्नाम संयोगः एकार्थसंयोगः समवायो वा। किं तु समयरूपः सम्बन्धः। नहीमं सम्बन्धं पुरस्कृत्य अनुमानस्थलेऽर्थप्रतीतिः। अपि तु अविनाभावरूपं सम्बन्धम्। अतः प्रवृत्तिभेदसद्भावात् न शब्दोऽनुमानविधया प्रमाणमिति भाष्यकाराशयः।

दिङ्नागमतेन शब्दस्यानुमानेऽन्तर्भावः

'आप्तोपदेशः शब्दः'(न्या. सू.१-१-७) इति सूत्रभाष्यव्याख्यानावसरे **वार्तिककारेण—**

"आप्तोपदेशः शब्दः इति किमाप्तानामविसंवादित्वं प्रतिपाद्यते, अथार्थस्य तथाभाव इति। यद्याप्तानामविसंवादित्वं प्रतिपाद्यते, तदनुमानात्। अथार्थस्य तथाभावः, सोऽपि प्रत्यक्षात्। यदा ह्ययमर्थं प्रत्यक्षत उपलभते, तदा तथाभावमर्थस्य प्रतिपद्यत इति"

इति प्रोक्तम्। अयं ग्रन्थः दिङ्नागमतानुवादरूप इति **टीकाकाराः**। "अथ शब्दं प्रमाणान्तरमसहमानो दिङ्नागः तल्लक्षणं विकल्प्य आक्षिपति—आप्तोपदेश इति" इत्यादिः टीकाग्रन्थः। तत्सारांशः एवम्। सूत्रे उपदेशशब्दः यदि भावे घञन्तः तदा आप्तस्योपदेश इति षष्ठीतत्पुरुषः। यदि कर्मणि घञन्तः तदा आप्तश्चासावुपदेशो यस्माद् इति बहुव्रीहिः। तत्राद्ये उपदेशकर्तुः आप्तत्वकथनेन अविसंवादित्वं लभ्यते। द्वितीये उपदिश्यमानस्यार्थस्याविसंवादित्वम्। तत्राद्यः कल्पः न युक्तः। न तावद् असम्बद्धाद् अन्यस्माद् अन्यस्य निश्चयो भवति, अतिप्रसङ्गात् =असम्बन्धाविशेषेण सर्वस्मात् सर्वनिश्चयप्रसङ्गात्। अतः शब्दार्थयोः सम्बन्धं स्वीकृत्य शब्दादर्थप्रत्ययो वक्तव्यः। तयोश्च कः सम्बन्धः, न तावत् तादात्म्यम्। न हि शब्दः अर्थात्मा। नापि कार्यकारणभावः, न हि शब्दः अर्थकार्यः विनाप्यर्थं पुरुषविवक्षामात्रादेव शब्दोत्पत्तेः। तस्मात् न साक्षात् शब्दादर्थनिश्चयः। विवक्षाकार्यतया तु विवक्षां गमयेत्। विवक्षा चाभिप्रायहेतुका।

Digitization by Arya Samaj Charitable Foundation, Chennai

अभिप्रायश्च कश्चिन्मनोमात्रहेतुकः, कश्चित् प्रमाणमूलकः। तत्र यः प्रमाणनिश्चितमर्थं विवक्षात, यथाविवक्षं च उच्चारयति स आप्तः। तस्य वचनात् कार्यात् कारणभूता विवक्षा अनुभीयते। तथा च तत्कारणभूतमर्थज्ञानमनुमीयते। अर्थज्ञानेन च तत्कारणभूतोऽर्थोऽनुमीयते। अर्थज्ञानस्यार्थजन्यत्वाद् इति प्रमाणगतिः। तत्र आप्तोपदेश इत्यत्रोपदेशक्रियया उपदेष्टार उपस्थापिताः। ते च प्रायेण विसंवादका दृष्टा इति आप्तग्रहणेन तेषामविसंवादित्वमुच्यते। तेषामविसंवादित्वेन च तदुपदेशादर्थनिश्चयो भवतीति यद्युच्यते, तर्हि उपद्देष्टुः अविसंवादित्वमानुमानिकम्, तादृशस्य वचनमर्थनिश्चयेऽनुमानमेव। तथा हि यत् यन्निर्दोषसत्त्वीयं (पुरुषीयं) वचनं तत् सर्वमर्थवत्, यथा बुद्धस्य क्षणिकनैरात्म्यादिविषय उपदेशः, तथा चायं विवादाध्यासित उपदेश इति। यथोक्तं **भदन्तेन—**

आप्तवाक्याविसंवादसामान्यादनुमानता

इति।

द्वितीयः कल्पोऽपि न कल्पते। अत्र हि उपदिश्यत इति उपदेश इति व्युत्पत्त्या अर्थ उच्यते। आप्तः प्राप्तः उपदेशो यस्मात् स तथोक्तः। एतदुक्तं भवति—यस्माच्छब्दादर्थमवगम्य प्रवर्तमानः पुरुषः तमेवार्थं प्राप्नोति स आप्तोपदेशः शब्दः प्रमाणम्। एवं च शब्देन यथा योऽर्थो दर्शितः तस्य प्राप्त्या तथात्वं दर्शितं भवति इति। एतन्न युक्तम्। प्राप्त्या हि तथात्वमर्थस्य विनिश्चिन्वन् ज्ञातस्यैवार्थस्य तथात्वं निश्चेतुमर्हति, नाज्ञातस्य। ज्ञानं चार्थस्य प्रायः प्रत्यक्षेणेति अर्थज्ञानं प्रात्यक्षिकं न शाब्दमिति दिङ्नागाशयः।

तद्दूषणप्रकारः वार्तिके

"तन्न सूत्रार्थापरिज्ञानात्। नायं सूत्रार्थः आप्तोपदेशः शब्दः इति। अपि तु इन्द्रियसम्बद्धासम्बद्धेष्वर्थेषु या शब्दोल्लेखेन प्रतिपत्तिः सा आगमस्यार्थः। तस्मादसम्बद्धोऽयं विकल्पः" इति। अस्यायमाशयः— आप्तत्वनिश्चयसहायः शब्दः अर्थं निश्चाययति इति वा शब्दार्थप्राप्त्या शब्दार्थतथात्वनिश्चय इति वा न सूत्रार्थः। अपितु इन्द्रियसम्बद्धासम्बद्धेषुदृष्टादृष्टेषु अर्थेषु, या शब्दोल्लेखेन-पदार्थस्मरणावान्तरव्यापारात् शब्दादेवार्थं प्रत्येमीत्यनेनोल्लेखेन अनुव्यवसायेन विषयीकृता प्रतिपत्तिः सा आगमस्य अर्थः=फलमिति।

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं तर्हि आप्तोक्तत्वनिश्चयः क्वोपयुज्यते इति चेत्— वाक्यस्य प्रामाण्यनिश्चये उपयुज्यते, न तु वाक्यार्थप्रतीतौ। न हि येन प्रामाण्यमवगम्यते तेन प्रमेयमप्यवगम्यते। तथा सति प्रत्यक्षादिप्रामाण्यज्ञानहेतुभूतादनुमानादेव प्रत्यक्षादीनां यत्प्रमेयं तस्याप्यवगतिः स्यादिति प्रत्यक्षादीनामप्रामाण्यप्रसङ्गः। नापि आप्तवाक्यं कार्यं सत् वक्तृज्ञानानुमानद्वारेणार्थेऽप्यनुमानमेव, न त्वर्थस्य प्रत्यायकमिति युक्तम्। यदि हि नार्थं प्रत्याययेत् ज्ञानमात्रमनुमापयेत् तदा नार्थविशेषसिद्धिः। न च ज्ञानविशेषादेवार्थविशेषः सिध्यतीति वाच्यम्। ज्ञानेऽर्थादन्यस्य विशेषस्याभावात्। तस्मात् वक्तृज्ञानविशेषणाय पूर्वं शब्दादेव केवलाद् वाक्यार्थज्ञानम् एषितव्यम्। एवं च कृतं वक्तृज्ञानानुमानेनार्थप्रतिपत्त्यर्थेनेति। तस्मात् पदानि कृतसङ्केतानि स्वार्थान् स्मारयन्ति, आकाङ्क्षायोग्यतासत्तिसध्रीचीनानि अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न सङ्गतिग्रहणमपि प्रतीक्षन्त इति दूरेऽनुमानाद् भवन्ति—इति टीकाकाराः निरूपयन्ति। एतावता दिङ्नागानुमतः शब्दस्यानुमानान्तर्भावपक्षः विमृष्टः। अथ काणादमतं परिशील्यते।

शब्दस्यानुमानान्तर्भाववादिकणादमतम्

शब्दस्यानुमानविधया प्रामाण्यं बौद्धाः काणादाः जरन्मीमांसकाः प्राभाकराश्च आतिष्ठन्ते। समानप्रवृत्तिकत्वात् शब्दस्यानुमानत्वमिति पक्षः न्यायसूत्रकारेण निरस्तः। विवक्षानुमानद्वारा (अथ वा वक्त्रभिप्रायानुमानद्वारा) अर्थानुमापकत्वं शब्दस्येति दिङ्नागपक्षः प्रशस्तपादाभिप्रेतपक्षश्च तात्पर्यटीकायां न्यायमञ्जर्यां न्यायभूषणे च निरस्ताः। शब्दस्यानुमानविधया संसर्गरूपवाक्यार्थबोधकत्वमिति विषये अर्थपक्षकं पदपक्षकं चेत्यनुमानद्वयं वैशेषिकसम्मततया तात्पर्यटीकायां (२-१-५२) सूत्रे प्रस्तुतं न्यायकुसुमाञ्जलौ विस्तरेण दूषितम्।

न्यायलीलावतीकारेण प्रदर्शितम्—एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि संसृष्टार्थपरत्वाद् इत्यनुमानं तत्त्वचिन्तामणौ विस्तरेणानूद्य दूषितम्। तत्सर्वमत्र अस्माभिः क्रोडीकृत्य प्रदर्शितम्, प्रदर्शयिष्यते च।

अस्येदं कारणं कार्यं सम्बन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकम् (वै.सू.)

इत्यनुमानलक्षणमभिधाय,

Digitization by Arya Samaj Charitable Foundation, Chennai

'एतेनैव शाब्दं व्याख्यातम्'

इति वदता महर्षिणा कणादेन शब्दोऽनुमानमिति स्वमतमाविष्कृतम्। भाष्यकारेण **प्रशस्तपादाचार्येण**-(पृ.५१२)

"शब्दादीनामप्यनुमानेऽन्तर्भावः, समानविधित्वात्। यथा प्रसिद्धसमयस्यासन्दिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्दादिभ्योऽपीति"।

इति प्रतिपादितम्। कन्दल्यनुसारेणैतद्विव्रियते।

शब्दादीन्यपि प्रमाणान्तराणि सङ्गिरन्ते वादिनः, तानि कस्मादिह नोक्तानीति पर्यनुयोगमाशङ्क्य तेषाम् अत्रैवान्तर्भावान्न पृथगभिधानमित्याह—शब्दादीनामपीति॥

शब्दादीनामनुमानेऽन्तर्भावः=अनुमानाव्यतिरेकित्वम् (अनुमानानतिरिक्तत्वम्) समानविधित्वात्-समानप्रवृत्तिपप्रकारवत्त्वात्। यथा व्याप्तिग्रहणबलेनानुमानं प्रवर्तते तथा शब्दादयोऽपि प्रवर्तन्त इत्यर्थः। शब्दोऽनुमानं व्याप्तिबलेनार्थप्रतिपपादकत्वाद् धूमवत्। समानविधित्वमेव दर्शयति—**यथेति**। प्रसिद्धः ज्ञातः = समयः = अविनाभावः यस्य पुरुषस्य तस्य लिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्याम् = लिङ्गदर्शनं = पक्षे हेतुदर्शनम्, प्रसिद्ध्यनुस्मरणंयत्र धूमस्तत्राग्निरित्येवम्भूतायाः प्रसिद्धेरनुस्मरणं व्याप्तिस्मरणमिति यावत्, ताभ्यां यथातीन्द्रियेऽर्थे भवत्यनुमानं तथा शब्दादिभ्योऽपीति। तावद्धि शब्दो नार्थं प्रतिपादयति यावद् अयं शब्दः अस्यार्थस्याव्यभिचारीत्येवं नावगम्यते। ज्ञाते त्वव्यभिचारे प्रतिपादयन् शब्दः धूम इव लिङ्गं स्यादिति।

ननु-अनुमाने साध्यधर्मविशिष्टो धर्मी प्रतीयते। शब्दादर्थानुमाने को धर्मी? न तावदर्थः, तस्य तदानीमप्रतीयमानत्वात्, पक्षस्य तु पूर्वप्रतीतेरावश्यकत्वात्। शब्दो धर्मीति चेत्, किमस्य साध्यम्? अर्थवत्त्वं चेत्-न। पर्वतादेरिव वह्न्यादिना शब्दस्यार्थेन सह न संयोगसमवायादिलक्षणः कश्चित् सम्बन्धो ज्ञायते (निरूप्यते) येन सम्बन्धेनायं शब्दः अर्थविशिष्टः साधनीयः। प्रतिपाद्यप्रतिपादकभाव एव हि शब्दार्थयोः सम्बन्धः, सोऽर्थप्रतीत्युत्तरकालभावी नार्थप्रतिपादनात् पूर्वं सम्भवति। नाप्यग्निधूमयोरिव शब्दार्थयोरविनाभावनियमः सम्भवति, देशकालव्यभिचारात्। तद्व्यभिचारश्च असत्यपि युधिष्ठिरे कलियुगे युधिष्ठिरशब्दः प्रयुज्यते, असत्यामपि लङ्कायां जम्बूद्वीपे लङ्काशब्दः श्रूयते। तस्माद् अनुमान-

Digitization by Arya Samaj Charitable Foundation, Chennai

सामग्री-वैलक्षण्यात् शब्दो नानुमानम्। देशविशेषे चार्थं विनापि शब्दस्य सद्भावात्। तथा हि 'चोर' इति भक्ताभिधानं (अन्नाभिधानं) दाक्षिणात्यानाम्, आर्यावर्तनिवासिनां तु तस्कराभिधानम्।

अपि च यदि शब्दोऽनुमानं स्यात् तदास्य पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वरूपत्रैरूप्यप्रतीत्या प्रामाण्यनिश्चयः स्यात् नाप्तोक्तत्वप्रतीत्या। तत्प्रतीत्या तु निश्चीयमानप्रामाण्यकः शब्दः अनुमानादतिरिक्त एव, तद्वैधर्म्यात्।

अत्रोच्यते। अस्मिन् प्रसङ्गेऽस्माभिः प्रदर्श्यमानः कश्चन दृष्टान्तः अवगन्तव्यो भवद्भिः आदौ। तर्जन्यामूर्ध्वीकृतायां दशसंख्येत्यवगन्तव्यमिति सङ्केतकरणानन्तरम्, तत्सङ्केताभिज्ञस्य पुरुषस्य यद् ऊर्ध्वीकृतायां तर्जन्यां देशकालव्यवहितेष्वर्येषु दशसंख्यानुमानम्, न तत्र संख्या धर्मिणी। तस्याः पूर्वमज्ञातत्वात्। नापि तर्जनीविन्यासः, तस्य प्रतिपाद्यमानया दशसंख्यया सह सम्बन्धान्तराभावेन तद्विशिष्टतया प्रतिपत्त्यसम्भवात्। नापि तर्जनीविन्यासदशसंख्ययोः एकदेशता एककालता वास्ति, तत् कथमनुमानप्रवृत्तिः इति शङ्कायामेवमुत्तरं वक्तव्यम्—क्रयविक्रयव्यवहारे वणिजाम् ऊर्ध्वतर्जनीविन्यासस्य दशसंख्याप्रति पादनाभिप्रायेण सहाव्यभिचारस्योपलम्भात् ऊर्ध्वविन्यासकर्तुः दशसंख्याप्रतिपादनाभिप्रायज्ञापनद्वारा दशसंख्याप्रतिपत्तिहेतुत्वमूर्ध्वतर्जनीविन्यासस्येति। एवमेव शब्दस्यापि। तथा हि प्रथमं गोशब्दाद् उच्चारिताद् वक्तुः ककुदादिमदर्थविवक्षा गम्यते। स्वज्ञातशब्दसमूहे गोशब्दोच्चारणस्य पदार्थ-विवक्षापूर्वकत्वदर्शनात्। पदार्थविवक्षया च पदार्थानुमानम्। अयमत्रानुमानप्रयोगः—पुरुषः धर्मी (पक्षः) ककुदादिमदर्थविवक्षावान्, गोशब्दोच्चारणकर्तृत्वाद् अहमिव-इति। न च अर्थाभावेऽपि अनाप्तानां विवक्षाया उपलब्धेः न विवक्षातोऽर्थसिद्धिरिति वाच्यम्। शब्दादपि तर्हि अर्थसिद्ध्यसम्भवात्। भ्रान्त्या विप्रलम्भधिया वा अर्थशून्यस्य शब्दस्य प्रयोगदर्शनात्। आप्तोक्ताच्छब्दादर्थप्रतीतिरिति चेत्—आप्तविवक्षात एवार्थाधिगतिरिति तुल्यं समाधानम्।

यत्तूक्तं देशविशेषे शब्दस्यार्थव्यभिचारात् न लिङ्गत्वमिति। तत्रोच्यते। धूमः स्वाभाविकेन सम्बन्धेन अग्नेर्लिङ्गम्। शब्दस्तु चेष्टावत् पुरुषेच्छाकृतेन सङ्केतेन प्रवर्तमानः यत्र यत्रार्थे पुरुषेण सङ्केत्यते तस्य तस्यैवार्थस्य विवक्षावगतिद्वारेणावगतौ लिङ्गम्। तथा च धूमः अविच्छिन्नमूलोर्ध्वगमनादिविशिष्ट

Digitization by Arya Samaj Charitable Foundation, Chennai

एव यथाग्निनिश्चये हेतुः, तथा शब्दोऽपि आप्तोक्तत्वविशिष्टः सङ्केतितार्थाव्यभिचारी सन् अर्थानुमापको भवितुमर्हति।

ननु शब्दः अभिधाख्यया मुख्यवृत्त्यैवार्थं बोधयतु, कुतः अनुमानविधया बोधकत्वमाश्रीयत इति चेन्न। सम्बन्धाभावात्। न हि शब्दस्यार्थेन सह कोऽपि सम्बन्धोऽस्ति। असम्बद्धस्य शब्दस्य मुख्यवृत्त्या बोधकत्वे, घटशब्दः परमपि बोधयेत्। न च शब्दार्थयोः शक्तिरूपः स्वाभाविकः सम्बन्धोऽस्ति, स एव मुख्यवृत्त्या अर्थबोधनियामक इति वाच्यम्। शब्दस्यैकस्य देशभेदेनानेकेष्वथषु प्रयोगदर्शनात्। स्वाभाविकसम्बन्धस्यानेकेष्वथष्वयोगात्।

ननु यत्रार्थे यः शब्दः आर्यैः प्रयुज्यते, तस्य तदर्थवाचकत्वम्, अन्यस्मिन्नर्थे सङ्केतानुरोधात् प्रवृत्तस्य शब्दस्य लिङ्गत्वमिति चेत्न। तुल्य एव तावत् चोरशब्दः तस्करे भक्ते(अन्ने) च प्रतीतिकरः। तत्रास्य तस्करे वाचकत्वम्, अन्ने च लिङ्गत्वम् इति नास्ति विशेषहेतुः। तथा च प्रयोगः—आर्याणामपि चौरशब्दादर्थप्रतीतिः लिङ्गपूर्विका, चौरशब्दजनितप्रतिपत्तित्वात् उभयाभ्युपेतदाक्षिणात्यप्रयुज्यमानचौरशब्दजनितप्रतिपत्तिवद् इति।

किं च शब्दस्यार्थेन सह स्वाभाविकसम्बन्धसत्त्वे नास्ति प्रमाणम्। शब्दस्य वाच्यबोधानुकूला स्वाभाविकी वाचकशक्तिरेव स्वाभाविकसम्बन्ध इतीष्यते भवद्भिः। तथा चोक्तं **'शक्तिरेव हि संबन्धः'** इति। शब्दशक्तेश्च स्वभावादेव वाच्यबोधानुकूलत्वे व्युत्पन्नपुरुषवद् अव्युत्पन्नोऽपि पुरुषः शब्दादर्थं प्रतीयात्, शब्दस्यार्थस्य तयोः सम्बन्धस्य च सद्भावात्। न च सम्बन्ध ज्ञातः सन्नेवार्थप्रत्ययहेतुः न सत्तामात्रेणेति वाच्यम्। तर्हि कीदृशं तत्सम्बन्धज्ञानम्? अस्य शब्दस्यायमर्थो वाच्य इत्येतादृशं चेत्, तर्हि वृद्धव्यवहारजन्यं वाच्यवाचकालम्बनं ज्ञानमेव सङ्केतो व्युत्पत्तिरिति चाभिधीयमानं संस्कारद्वारा अर्थप्रतीतिकारणमस्तु, किं शक्त्याख्यसम्बन्धान्तरकल्पनेन?—इति भाष्यकन्दलयोः शब्दस्यानुमानान्तर्भावरीतिः। वेदस्यापि पौरुषेयत्वाद् वक्तृतात्पर्यानुमानद्वारा अर्थानुमापकत्वमित्यपि तत्र निरूपितम्।

लीलावतीकारोक्तिपरिशीलनम् (पृ.५२६-५३०)

न्यायलीलावत्यां शब्दस्यानुमानेऽन्तर्भाव एवं निरूपितः— शब्दस्तु न मानान्तरम्। पदार्थसंसर्गस्यानुमानादेव सिद्धेः। तथाहि पदानिस्मारितार्थसंसर्गविज्ञप्तिपूर्वकाणि, [स्मरणनिषयाः येऽर्थाः तत्संसर्गज्ञानजन्यानि] योग्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

तासत्तिमत्त्वे सति संसृष्टार्थपरत्वात् गामभ्याजेतिपदकदम्बवद् इत्यनुमानादेव साध्यसिद्धेः। वैदिकानि लौकिकानि च पदानि तात्पर्यविषयपदार्थसंसर्गज्ञानपूर्वकाणीत्यर्थः। संसर्गस्य बहुविधत्वाद् अनभिमतसंसर्गसिद्ध्या अर्थान्तरवारणाय साध्ये तात्पर्यविषयेति संसर्गविशेषणम्।

ननु संसृष्टो योऽर्थः तत्परत्वं तत्परसन्निधिमत्त्वं वा असिद्धम्, संसर्गस्य प्रागप्रतीतत्वात्। प्रतीतत्वे चानुमानवैयर्थ्याद्। संसर्गज्ञानार्थं ह्यनुमानम्। न च संसृष्टत्वप्रकारकप्रतीतिपरत्वं तत्प्रकारकसन्निधिमत्त्वं वा तदर्थ इति वाच्यम्। अनाप्तोक्ते निराकाङ्क्षे च व्यभिचारात्। मैवम्। आकाङ्क्षायोग्यतासत्तिमत्त्वस्य हेत्वर्थत्वात्।

नन्वनेनानुमानेन संसर्गज्ञानस्य सिद्धावपि संसर्गस्य असिद्ध्या कथं संसर्गरूपस्य वाक्यार्थस्यानुमेयत्वमिति चेत्—न। ज्ञानावच्छेदकतया संसर्गस्याप्यनुमितिविषयत्वात्। ज्ञानविषयकज्ञानस्य ज्ञानविषयविषयकत्वमिति नियमात्। संसर्गज्ञानविषयिण्याः अनुमितेः ज्ञानविषयीभूतसंसर्गविषयकत्वमावश्यकम् इति।

ननु वाक्यार्थज्ञाने तात्पर्यज्ञानस्याहेतुत्वात् न संसृष्टार्थपरत्वं ज्ञातुं शक्यत इति विशेषणंसिद्धिरिति चेन्न। नानार्थस्थले लक्षणास्थले च शाब्दबोधं प्रति तात्पर्यज्ञानस्य हेतुत्वात्। यथा श्वेतो धावतीत्यत्र श्वित्री नेनेक्ति, श्वेतगुणयुक्तः पुरुषः द्रुततरं यातीत्यर्थद्वये यत्र श्लेषः तत्र तात्पर्यग्रहं विनान्यतरनिश्चयाभावात्। यष्टीः प्रवेशयेत्यत्र संसर्गेऽनुपपत्तिज्ञानभावात् नान्वयानुपपत्तिज्ञानं लक्षणाबीजम्, किं तु तात्पर्यानुपपत्तिज्ञानम्। तच्च तात्पर्ये ज्ञात एव भवतीति। संसृष्टार्थपरत्वं चानन्यथसिद्धसम्भूयोच्चारणादेव ज्ञायत इति।

न्यायमञ्जर्यां शब्दस्यानुमानेऽन्तर्भाववरवणुनम् (पृ.४०१-४११)

जयन्तभट्टेन पूर्वोत्तरपक्षोपन्यासपूर्वकं शब्दस्यानुमानान्तर्भावो निरस्तः। तथाहि —

शब्दस्य खलु पश्यामो नानुमानाद्विभिन्नताम्।
अतस्तल्लक्षणाक्षेपात् न वाच्यं लक्षणान्तरम्॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अनुमानलक्षणेनैव शब्दलक्षणस्यापि ज्ञानात् न शब्दस्य पृथग्लक्षण वक्तव्यम्।

परोक्षविषयत्वं हि तुल्यं तावद् द्वयोरपि।
सामान्यविषयत्वं च सम्बन्धापेक्षणाद् द्वयोः।

शब्दानुमानयोः द्वयोरपि प्रत्यक्षागोचरविषयकत्वं तुल्यम्। द्वयोरपि संबन्धसापेक्षत्वात् सामान्यविषयत्वं तुल्यम्।

अगृहीतेऽपि सम्बन्धे नैकस्यापि प्रवर्तनम्।
सम्बन्धश्च विशेषाणामानन्त्यादतिदुर्गमः॥

शब्दानुमानयोरेकस्यापि ज्ञाते एव सम्बन्धे प्रवृत्तिः, नाज्ञाते सम्बन्धे। विलक्षणसम्बन्धमूलकयोः शब्दानुमानयोः कथमैक्यम्, इत्यत्राह — सम्बन्धश्चेति। सम्बन्धश्च सर्वत्र नैकरूपो भवितुमर्हति। किं च

यथा प्रत्यक्षतो धूमं दृष्ट्वाग्निरनुमीयते।
तथैव शब्दमाकर्ण्य तदर्थोऽप्यवगम्यते॥
अन्वयव्यतिरेकौ च भवतोऽत्रापि लिङ्गवत्।
यो यत्र दृश्यते शब्दः स तस्यार्थस्य बाचकः॥
पक्षधर्मत्वमप्यस्ति शब्द एव यतोऽर्भवान्।
प्रकल्पयिष्यते पक्षो धूमो दहनवानिव॥

शब्दः अर्थवान् शब्दत्वात्, धूमः दहनवान् धूमत्वाद् इतिवत्।

तत्र धूमत्वसामान्यं यथा वहति हेतताम्।
गोत्वादिशब्दसामान्यं तद्वदत्रापि वक्ष्यते॥
एवं विषयसामग्रीसाम्यादेकत्वनिश्चये।

विलक्षणतामात्रं — अनुमिनोमि शाब्दयामि इत्याद्यनुव्यव साग्यरूपं वैलक्षण्यम्।

पूर्ववर्णक्रमोद्भूतसंस्कारसहकारिता।
पुरुषापेक्षवृत्तित्वं विवक्षानुसृतिक्रमः॥
इत्यादिना विशेषेण न प्रमाणान्तरं भवेत्।

पुरुषापेक्षवृत्तित्वं — पुरुषसंकेतसापेक्ष प्रवृत्तिमत्त्वम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

कार्यकारणधर्मादिविशेषोऽत्रापि नास्ति किम्।
यथेष्टविनियोज्यत्वमपि नान्यत्वकारणम्।
हस्तसंज्ञादिलिङ्गेऽपि तथाभावस्य दर्शनात्॥

यथेष्टविनियोज्यत्वस्य दर्शनात्।

नन्वनुमाने महानसादिदृष्टान्तापेक्षा नियता, न तथा शाब्दबोधे इति शङ्कायां, असकृदभ्यस्तविषये अनुमानेऽपि न दृष्टान्तापेक्षा नियता। अनभ्यस्ते तु सा समानैवेत्याह —

दृष्टान्तनिरपेक्षत्वमभ्यस्तविषये समम्।
अनभ्यस्ते तु सम्बन्धस्मृतिसापेक्षता द्वयोः॥

नन्वेक एव अश्वादिशब्दः श्रोतृप्रतिभानुगुणं मृगविशेषः श्वोऽभवितृ इत्याद्यर्थन् बहून् प्रत्याययति; न तथा धूमः नानार्थान् प्रत्याययति, किं तु अग्निमेकम्। एवं स्फुटार्थत्वास्फुटार्थत्वादिभेदः शब्दे दृश्यते, न धूमादौ। अतोऽस्ति महद् अन्तरं शब्दानुमानयोः इत्याशङ्कायामाह —

अनेकप्रतिभोत्पत्तिहेतुत्वमपि विद्यते।
अस्पष्टलिङ्गे कस्मिंश्चिदश्व इत्यादिशब्दवत्॥
स्फुटार्थानवसायाश्च प्रमाणाभासतो यथा।
लिङ्गे तथैव शब्देऽपि नानार्थभ्रमकारिणि॥

धूमधूलीपटलसाधारणाकारज्ञानात् एकस्य वह्न्यनुमितिः अपरस्य सेनाद्यनुमितिरिति दृश्यत एवानुमानेऽपि प्रतिपत्तिभेदः।

अपि चानुमानसापेक्षत्वस्य शब्देऽवर्जनीयतया न स्वतन्त्रप्रमाणता शब्दस्येत्याह —

अपि च प्रतिभामात्रे शब्दाज्जातेऽपि कुत्रचित्।
आप्तवादत्वलिङ्गेन जन्यते निश्चिता मतिः।
अत एव हि मन्यन्ते शब्दस्यापि विपश्चितः।
आप्तवादाविसंवादसामान्यादनुमानताम्॥

विपश्चितः — कणादप्रशस्तपादादयः। 'प्रमाणमविसंवादि ज्ञानम्' इति कथनात् शब्दस्याविसंवादरूपं प्रामाण्यमाप्तोक्तत्वमूलकम्। एवं चानुमानवत् शब्दोऽपि स्वप्रमाण्ये अन्यदपेक्षत इति नानुमानादतिरिच्यते।

Digitization by Arya Samaj Charitable Foundation, Chennai

किं च शब्दो विवक्षायामेव प्रामाण्यमश्नुते।
न बाह्ये, व्यभिचारित्वात् तस्यां चैतस्य लिङ्गता ॥

शब्दश्रवणानन्तरम् एतदर्थबोधेच्छया अयं शब्दः प्रयुक्त इति जानाति लोकः। अनेन शब्दस्य वक्तृगतेच्छाविशेषानुमापकत्वं स्पष्टम्। अतः तादृशेच्छायां शब्दो लिङ्गम्, न तु बाह्ये घटादौ। व्यभिचारित्वाद् इति। अर्थं विनापि शब्दस्य सत्वात्। यथा कलौ युधिष्ठिररूपमर्थं विनापि युधिष्ठिरशब्दोऽस्ति। असत्यामपि लङ्कायां जम्बूद्वीपे लङ्काशब्दः प्रयुज्यत इति। अतः शब्देन इच्छा अनुमीयते, इच्छया चार्थ इति शब्दः नार्थांशे प्रमाणमिति पूर्वपक्षः।

सिद्धान्तः (न्यायमञ्जरी)

तत्रोच्यते। द्विविधः शब्दः पदं वाक्यं चेति। तत्र वाक्यमज्ञातसम्बन्धमेव वाक्यार्थमवगमयति, वाक्ये शक्त्यभावात्। अभिनवपुरुषविरचितश्लोकश्रवणे सति पदसंस्कृतमतीनां वाक्यार्थावगमदर्शनात्। अतो वाक्यस्य सम्बन्धज्ञानमूलक प्रवृत्तिमता अनुमानेन नास्ति साम्यसम्भावना।

पदस्य तु सम्बन्धज्ञानसापेक्षप्रवृत्तिकालेऽपि सामग्रीभेदान् विषयभेदाच्चानुमानादिभन्नत्वम्। विषयस्तावद् विसदृश एव पदलिङ्गयोः। जातिविशिष्टव्यक्तिमात्रं पदस्यार्थ इति स्थापयिष्यते। अनुमानं तु वाक्यार्थविषयकम्, अत्राग्निः, अग्निमान् पर्वतः इति ततः प्रतीतेः।

किं च पर्वतादिरूपं यद्विशेष्यं तज्ज्ञानपूर्वकम् अग्न्यादिविशेषणज्ञानं लिङ्गादुदेति। पदात्तु विशेषणावगतिपूर्विका विशेष्यावगतिरिति विषयभेदः।

ननु यथानुमाने धर्मविशिष्टो धर्मी साध्यः, एवमिहार्थविशिष्टः शब्दः साध्यो भवतु। मैवम्। शब्दस्य हेतुत्वात्। न च हेतुरेव पक्षो भवितुमर्हति।

ननु यथा अयं धूमः अग्निमान् (व्याप्तिरूपः सम्बन्धः मतुबर्थः) धूमत्वात् महानसीयधूमवद् इत्युक्तम् —

"सा देशस्याग्नियुक्तस्य धूमस्यान्यैश्च कल्पिता" (श्लोक वार्त्तिकम्)

इति। एवं गोशब्द एवार्थवत्त्वेन साध्यताम्, गोशब्दत्वाद् इत्यादि सामान्यं च हेतूक्रियताम् इति चेत् — न। शब्दस्य धर्मिणः किम् अर्थविशष्टत्वं वा साध्यते ? प्रत्यायनशक्तिविशिष्टत्वं वा ? अर्थप्रतीतिविशिष्टत्वं वा ?

Digitization by Arya Samaj Charitable Foundation, Chennai

 204 BVBSSMV

नाद्यः, शैलज्वलनयोरिव शब्दार्थयोः धर्मधर्मिभाव विरहात्। न चार्थविषयकत्वाच्छब्दस्य अर्थविशिष्टत्वमुच्यत इति वाच्यम्। निर्विषयकस्य शब्दस्यार्थप्रतीतिजननमन्तरेण अर्थविषयकत्वानुपपत्तेः। प्रतीतौ तु सिद्धायां किं तद्विषयत्वद्वारकतद्धर्मत्वेन ? यदि तु प्रतीतिविषयत्वमूला तद्धर्मत्वसिद्धिः तद्धर्मत्वमूला अर्थप्रतीतिः अर्थप्रतीतिमूलं च तद्विषयत्वम् तदा अन्योन्याश्रयः चक्रकं वा। तस्मान्नार्थविशिष्टः शब्दः साध्यः।

न द्वितीयः, अर्थप्रत्यायनशक्तिसिद्ध्यर्थं शब्दप्रयोगाभावात्।

न शक्तिसिद्धये शब्दः कथ्यते श्रूयतेऽपि वा।
अर्थगत्यर्थमेवामुं शृण्वन्ति च वदन्ति च॥

नाप्यर्थप्रतीतिविशिष्टतया शब्दः साध्य इति तृतीयः पक्षः, सिद्ध्यसिद्धिविकल्पानुपपत्तेः। अर्थप्रतीतौ सिद्धायामनुमानवैयर्थ्यम्। असिद्धायां तस्यां तद्विशिष्टता न साध्या। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्।

ननु धूमेनाग्निविशिष्टत्वसाधनेऽपि विकल्पोऽयं तुल्य इति चेत् — न हि अग्निवैशिष्ट्यं धूमे जन्यजनकभावसम्बन्धेन। किं तु व्याप्यव्यापकभावेन। तादृशं च लिङ्गं गमकमिति नान्योन्याश्रयस्य न वा सिद्ध्यसिद्धिविकल्पस्य प्रसक्तिः। शब्दस्तु अर्थप्रतीतेर्जनक इति जन्यया अर्थप्रतीत्या वैशिष्ट्यं शब्दे साध्यते चेत् पूर्वोक्तिविकल्पावसरः। अतो विषयभेदान्न शब्दोऽनुमानम्।

सामग्रीभेदात् खल्वपि न शब्दोऽनुमानम्। पक्षसत्त्वसपक्षसत्त्वादिरूपसापेक्षमनुमानम्, शब्दे तु न तानि रूपाणि सन्ति न वा अपेक्षितानि।

अन्वंयव्यतिरेकावपि शब्दार्थयोर्दुरुपपादौ, देशे काले च शब्दार्थयोरनुगमाभावात् (साहचर्यभावात्)। न हि यत्र देशे शब्दः तत्रार्थः। कर्णदेशे हि शब्दमुपलभामहे, भूमावर्थम्। नांपि यत्र काले शब्दः तत्रार्थः, इदानीं युधिष्ठिररूपार्थाभावेऽपि युधिष्ठिरशब्दसद्भवात्।

अथ शब्दार्थयोः अन्वयाभावेऽपि (साहचर्याभावेऽपि) शब्दार्थविषयकज्ञानयोः गृह्यत इति चेत् — तत्र वक्तव्यम्। किमर्थबुद्धावुत्पन्नायामन्वयो गृह्यते अनुत्पन्नायां वा ? अनुत्पन्नायां तावद् बुद्धिस्वरूपासत्त्वात् कुतोऽन्वयग्रहणम्? उत्पन्नायां त्वर्थबुद्धो किमन्वयग्रहणेनेति अन्वयग्रहणस्य नैष्फल्यम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

एतेन व्यतिरेकग्रहणमपि व्याख्यातम्। शब्दाभावेऽप्यर्थसत्त्वाद्, अर्थाभावेऽपि शब्दसत्तवाच्च।

ननु आवापोद्वापद्वारेण शब्दार्थसम्बन्धनिश्चये अन्वयव्यतिरेकयोरुपयोगोऽस्ति। यथोक्तम् —

"यत्र योऽन्वेति यं शब्दमयर्थस्तस्य भवेदसौ" (श्लो.वा.)

इति।,आवापोद्वापाभ्यां शक्तिग्रह इति सिद्धान्तेऽपि सम्मतम्। शक्तिग्रहो नाम अयं शब्दः एतदर्थवाचक इत्याकारकः वाच्यवाचकभावग्रहः। तत्र शब्दार्थयोरन्वयव्यतिरेकावुपयुज्येते इति। सत्यमेतत्। समयबलेन = शक्तिग्रहबलेनार्थबुद्धौ सिद्धायाम् अस्यैव शब्दस्यास्मिन्नेवार्थे शक्तिः इति नियमेऽन्वयव्यतिरेकयोः उपयोगः यः शब्दः येनार्थेनान्वितः स तस्य वाचक इति। न तु शब्दार्थ प्रतीतावुपयोगः। धूमाग्न्योरन्वयव्यतिरेकौ तु धूमाद् वह्निप्रतिपत्तावेव उपयुज्यत इति महद् वैलक्षण्यं शब्दलिङ्गयोः।

किं च शब्दस्य अर्थसम्बन्धज्ञानसापेक्षप्रवृत्तिकत्वेऽपि नानुमानविशेषः। लिङ्गलिङ्गिनोर्हि अविनाभावो नाम सम्बन्धः, शब्दार्थयोस्तु समयापरनामा वाच्यकभावः सम्बन्धः प्रतीत्यङ्गम्। एवं च विषयभेदात् सामग्रीभेदाच्च प्रत्यक्षवद् अनुमानादन्यः शब्द इति सिद्धम्।

यच्चोक्तम् — 'आप्तवादाविसंवादसामान्यादनुमानता' इति। तत्रोच्यते। आप्तवादत्वेन हेतुना हि पूर्वजातायाः शब्दजन्यार्थबुद्धेः प्रामाण्यं ज्ञायते। न तु शब्दार्थबुद्धिर्जायते। एवं च तेन शब्दार्थज्ञानप्रामाण्यस्यानुमेयत्वेऽपि न शब्दार्थोऽनुमीयते। तदुक्तं **श्लोकवार्तिक** एव —

"अन्यदेव हि सत्यत्वमाप्तवादत्वहेतुकम्।
वाक्यार्थश्चान्य एवेह ज्ञातः पूर्वतरं च सः॥
ततश्चेदाप्तवादेन सत्यत्वमनुमीयते।
वाक्यार्थप्रत्ययस्यात्र कथं स्यादनुमानता॥
जन्म तुल्यं हि बुद्धीनामाप्तानप्तगिरां श्रुतौ।
जन्माधिकोपयोगी च नानुमायां त्रिलक्षणः।"

इति। तस्मात् शब्दगतेन आप्तोक्तत्वेन हेतुनायदि शब्दार्थप्रतीतिः भवेत् तदैव शब्दस्यानुमानेऽन्तर्भावः स्यात्। परं तु जातायां शब्दादर्थप्रतीत्यां प्रामाण्यमेवा-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्तोक्तत्वेन हेतुना ज्ञायत इति न शाब्दबोधस्यानुमितिरूपता, नापि शब्दस्यानुमानतेति तात्पर्यम्। 'त्रिलक्षणो हेतुः अनुमायां जन्माधिकोपयोगी न' इत्यन्वयः।

एतेन शब्दः विवक्षायामेव प्रमाणं न त्वर्थे इति यदुक्तं, तदपि प्रत्युक्तम्। न हि विवक्षा नाम शब्दस्य वाच्यो विषयः किं तु अर्थ एव तथा।

विवक्षायां हि शब्दस्य लिङ्गत्वमिह दृश्यते।
आकाश इव कार्यत्वात् न वाचकतया पुनः॥

शब्दस्य कार्यत्वात् स्वसमवायिकारणतया आकाशानुमाने यथा हेतुः भवति शब्दः, तथा इच्छामन्तरा शब्दप्रयोगासम्भवाद् इच्छामनुमापयेत् शब्दः न त्वर्थम्। शब्दादर्थप्रतीतेरेवाभावे 'एतदर्थबोधेच्छयोच्चरितोऽयं शब्दः' इति इतीच्छाग्रहणं कथं भवेत्। नानार्थकस्थलेऽपि प्रथमं बोधाः जायन्त एव। एषु कः प्रयोक्तुः अभिमत इति संशये तात्पर्यापरनामिका इच्छा प्रकरणादिभिः निर्णेतव्या भवति अतश्च आप्तोक्तत्वाद् विवक्षापि न शाब्दबोधहेतुः। तदुक्तम् — (न्या.म.)

शब्दादुच्चरिताच्च वाच्यविषया तावत् समुत्पद्यते
संवित्तिस्तदनन्तरं तु गमयेत् कामं विवक्षामसौ।
अर्थोपग्रहवर्जितात्तु नियमात् सिद्धैवमाजीवता
तद्वाच्यार्थविशेषिता त्वविदिता नैषा तदर्थे भवेत्॥ इति

न्यायभूषणे शब्दानुमानत्वनिरासः (पृ. ३७९-३९०)

एतावता न्यायञ्जर्युक्तरीत्या शब्दस्यानुमानत्वाक्षेपतत्परिहारौ प्रदर्शितौ। अथ **न्यायभूषणे** न्यायमञ्जर्युक्तविषयान् परित्यज्य तदनुक्तविषयान् परं प्रदर्शयामः।

यदुक्तं शब्दः वक्त्रभिप्रायसूचक इति। तदयुक्तम्। शब्दश्रवणानन्तरमर्थेष्वप्रवृत्तिप्रसङ्गात्। न हि अन्यस्य प्रतीत्या अप्रतीतेऽन्यत्र प्रवृत्तिः सम्भवति। अतिप्रसङ्गात्। न च शब्दात् विवक्षाप्रतीतौ ततोऽर्थप्रतीतिरिति वाच्यम्। विवक्षाया अपि अर्थेन सम्बन्धाभावात्, असत्यप्यर्थे विवक्षोत्पत्तिदर्शनात्।

का चेयं विवक्षा ? किं शब्दोच्चारेणेच्छामात्रम् ? किं वा अनेन शब्देनामुमर्थं प्रतिपादयामीत्येषोऽभिप्रायः ? आद्ये न कस्यापि शास्त्रादिश्रवणे वक्तुः श्रोतुर्वा शास्त्रादिकृतौ वा प्रवृत्तिः स्यात्। न हि कश्चिदनुन्मत्तः शब्दोच्चारणहेतुभूतेच्छामात्रप्रतिपत्त्यर्थं शास्त्रं वाक्यान्तरं च प्रणेतुं श्रोतुं वा

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रवर्तते। किं च कचटतपादि-दशदाडिमादिवाक्यैः सह सर्ववाक्यानामविशेष प्रसङ्गः, सर्वेषां स्वहेतुभूतेच्छामात्रानुमापकत्वाविशेषात्।

अथानेन शब्देनामुमर्थं प्रतिपादयामीत्यभिप्रायो विवक्षा तत्सूचकत्वेन शब्दानामनुमानत्वमुच्यते। तथापि व्यभिचारात् नानुमानं शब्दः, शुकसारिकोन्मत्तादयो हि न तथाभिप्रायेण वाक्यमुच्चारयन्ति।

अपि च किं वाक्यं समयनिरपेक्षं सत् तादृशमभिप्रायं गमयति उत समयसापेक्षम् ? प्रथमकल्पे सर्वेभ्यः शब्देभ्यः सर्वार्थप्रतिपत्तिः स्यात्, सर्वेषां पुरुषाणां च प्रतिपत्तिः स्यात्। भाषानभिज्ञश्च कोऽपि न स्यात्। समयसापक्षत्वे चार्थमेव कुतः साक्षान्न गमयति, अभिप्रायबोधद्वारा कुतः गमयति ? नापि शब्दश्रवणानन्तरमभिप्रायप्रतीतिक्रमेणार्थप्रतीतिरनुभूयते।

किं च नानुमानं शब्दः पक्षधर्मत्वादिज्ञानानपेक्षत्वात् प्रत्यक्षवत्।

किं च लिङ्गमनाप्तकृतमपि स्वसाध्यं न व्यभिचरति, शब्दस्तु अनाप्तकृतोऽकृतोऽसत्यार्थ एव स्यात्।

किं च लिङ्गस्य पक्षधर्मत्वादिनिश्चये नैवाव्यभिचारित्वं निश्चीयते, शब्दस्य तु आप्तत्वनिश्चयेन ।प्रवृत्तिसामर्थ्येन च न तु पक्षधर्मत्वादिनिश्चयेनेति।

किं च लिङ्गमविनाभावबलेनार्थं प्रतिपादयति, शब्दस्तु संकेतमात्रेण। संकेत एवाविनाभाव इति न वाच्यम्। स्वाभाविकत्व-पुरुषायत्तत्वविशेषात्। स्वाभाविको ह्यविनाभावसम्बन्धः, संकेतस्तु पुरुषेच्छानुविधायीति।

विरुद्धाविरुद्धार्थभेदाच्च नानुमानं शब्दः। गवादिशब्दो हि सास्नादिमदर्थविरुद्धेष्वपि वागादिषु तदन्येषु च व्युत्पादितसमयः प्रयुज्यमानः प्रतीतिं जनयति। धूमादि लिङ्गं तु नाग्न्यादिविरुद्धेषु जलादिष्वविनाभावेन प्रतीतिं कुतश्चित् प्रस्तावादपि जनयति। तस्मान्नानुमानं शब्दः इति।

उदयनाचार्येण शब्दस्यानुमानत्वनिरसनप्रकारः

प्रत्यक्षमनुमानमुपमानं च नेश्वरबाधकमिति निरूप्य "शब्दोऽपि न बाधकम् अनुमानानतिरेकादिति वैशेषिकादयः" इत्युपक्षिप्य वैशेषिकमतानुसारेण शब्दसामान्यस्य, प्राभाकरमतानुसारेण लौकिकशब्दस्य चानुमानेऽन्तर्भावं पूर्वपक्षयित्वा शब्दस्यानुमानानन्तर्भूतत्वं महता परिकरेण **कुसुमाञ्जलौ तृतीयस्तबके**

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रसाधितमुदयनाचार्यैः। तत्रत्या रीतिरत्र सरलप्रकारेणोपक्षिप्यते श्रीवीरराघवीय-व्याख्यानसहकारेण।

वैशेषिकमतम्

पदानां प्रत्येकं शक्तिग्रहाद् अर्थस्मृतिजनकत्वमस्तीति वैशेषिकादिसम्मतम्। एवं स्मारितानां पदार्थानां यो मिथः संसर्गः स वाक्यार्थः। तद्विषयकज्ञानजनकत्वं वाक्यस्य किमनुमानविधया उत प्रकारान्तरेणेति विचारः। तत्र संसर्गस्यैव ज्ञाप्यत्वात् संसर्गवत्त्वं साध्यमिति निर्विवादम्। पक्षो हेतुश्च क इति विचार्यम्। तत्र पदार्थपक्षकं वा अनुमानं पदपक्षकं वा। आद्ये साध्यस्य संसर्गस्य पक्षगतत्वात् "पदार्थाः संसर्गवन्तः" इति प्रतिज्ञा युक्तैव। हेतुश्च कः ? वाक्यत्वं चेत् तत् साध्यव्यधिकरणम्। साध्यस्य संसर्गस्य पदार्थगतत्वात्, वाक्यत्वस्य पदनिष्ठत्वाच्च। न च पदार्थत्वं पदस्मारितत्वं वा हेतुः, एते पदार्थाः मिथः संसर्गवन्तः पदार्थत्वात् पदस्मारितत्वाद्वा इत्यनुमानप्रयोग इति वाच्यम्। गौरश्च इति पदस्मारिते व्यभिचारात्।

एवं पदपक्षकम् "एतानि पदानि स्मारितार्थसंसर्गवन्ति वाक्यत्वाद्" इत्यनुमानमपि न। तत्र वाक्यत्वादिति हेतुर्यद्यपि न साध्यव्यधिकरणः तथापि किमिदं वाक्यत्वम् ? संसर्गबोधकत्वमिति चेत् तदसिद्धम्। संसर्गस्य सम्प्रत्यनुमेयत्वात्। पदसमुदायत्वमिति चेत्—पदत्वं नामार्थशक्तत्वमर्थस्मारकत्वपर्यवसितमिति एतानि पदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वादिति प्रयोगो निष्पद्यते। तत्र संसर्गवत्त्वरूपं साध्यं पदेषु बाधितम्। संसर्गो हि संयोगः समवायः तादात्म्यं विशेषणविशेष्यभावो वा यथायथं मिथः पदार्थ एवास्ति, न तु पदे।

अथ संसर्गवत्त्वं नाम संसर्गज्ञापकत्वम्, तच्च पदानामितिचेत्—तत् संसर्गज्ञापकत्वं पदानां किमनुमानविधया प्रकारान्तरेण वा ? पदसमुदायरूपवाक्यस्यानुमानान्तर्भाववादिभिः प्रकारान्तरेणेति वक्तुं न शक्यते। अतः संसर्गज्ञापकत्वं नाम संसर्गानुमापकहेतुत्वमेव। इदं च प्रथमतो हेतुना संसर्गेऽनुमिते सति तादृशानुमित्युत्पत्त्यनन्तरं हेतोः संसर्गानुमापकत्वमस्तीत्येवं ज्ञायते, न तु संसर्गानुमानावसर एव। अत्र कुसुमाञ्जलिपङ्क्तिस्तावत्—

"न च लिङ्गतया ज्ञापकत्वं यत् लिङ्गस्य विषयः, तदेव तस्य, परस्पराश्रयप्रसङ्गात्। तदुपलम्भे हि व्याप्तिसिद्धिः तत्सिद्धौ च तदनुमानमिति" इति। तस्याः अयमर्थः—लिङ्गविधया ज्ञापकत्वं लिङ्गस्यलिङ्गनिष्ठं यत्, तदेव तस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

मतुपो विषयः—वाच्यम्, तदेव तस्य लिङ्गस्य विषयः साध्यम्, तदेव तस्य मतुपोऽर्थः न तु संयोगादिकं किमपीति न भवति, अन्योन्याश्रयात्। संसर्गानुमित्युपलम्भे किल हेतोः संसर्गानुमापकत्वेन सह व्याप्तिग्रहः, एतद्व्याप्तिग्रहे सिद्धे किल संसर्गानुमितिः। तथा च पदपक्षकत्वे हेतुर्यथाकथञ्चिदस्तु। संसर्गवत्त्वं तु न सिध्यति। तथा च शब्दस्य कथमनुमानान्तर्भाव इति चेत्—

उच्यते। हेतुसाध्योरन्यथा परिष्कारेण पदार्थपक्षकस्य पदपक्षकस्य चानुमानस्य सम्भवात्। तथा हि—एते पदार्थाः मिथः संसर्गवन्तः आकाङ्क्षायोग्यतासंनिधिमत्पदस्मारितत्वात् गामभ्याजेतिपदार्थवद् इति पदार्थपक्षकमनुमानम्। न चैवं संसर्गसामान्यसिद्धावपि विवक्षितसम्बन्धविशेषो न सिध्यतीति वाच्यम्। सम्बन्धिविशेषाधीनो हि सम्बन्धे विशेषः। सम्बन्धिनश्च विशिष्यैव पदैरुक्ता इति तदीयत्वेन सम्बन्धसाधने सम्बन्धिविशेषादेव सम्बन्धस्यापि सम्बन्ध्यन्तरव्यावृत्तत्वान्न दोष इति। एवम्—एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदत्वाद् गामम्भाजेतिपदवदिति-पदपक्षकमप्यनुमानम्। साध्यघटकं च संसर्गज्ञानम् 'अर्थं बुद्ध्वा शब्दरचना' इति न्यायसिद्धं रचनाहेतुभूतं वक्तृगतं ज्ञानम्। तथा च संसर्गज्ञानजन्यत्वं साध्यम्, न तु प्रागुक्तं ज्ञानजनकत्वम्। न चैवंरीत्या संसर्गज्ञानस्य सिद्धावपि संसर्गस्यासिद्ध्या इष्टासिद्धिरिति वाच्यम्। ज्ञानावच्छेदकतया तत्सिद्धेः। संसर्गविषयकत्वविशिष्टज्ञानसाधने संसर्गस्यापि साध्यकोटिप्रविष्टतया साध्यत्वात्। यद्वा ज्ञानज्ञानस्य ज्ञानविषयविषयकत्वनियमात् संसर्गज्ञानविषयकानुमितेः ज्ञानविषयसंसर्गविषयकत्वमिति संसर्गस्य अनुमेयत्वसिद्धिः। तत्रापि स्मारितार्थसंसर्गेत्यत्रार्थघटनेनैव संसर्गस्य साधनाद् अर्थरूपसम्बन्धिविशेषबलात् संसर्गविशेषसिद्धिः—इति वैशेषिकमतम्।

तन्निरासः

अत्रोच्यते—

अनेकान्तः परिच्छेदे सम्भवे च न निश्चयः।
आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना॥

पदार्थपक्षकानुमानप्रयोगस्तावन्न युक्तः। परिच्छेदः अवधारणम्, सम्भवश्च योग्यता। तथा च संसर्गवत्त्वसाधने व्यभिचारः। तद्योग्यत्वसाधने च विवक्षि-

Digitization by Arya Samaj Charitable Foundation, Chennai

तवाक्यार्थनिश्चयो नास्ति। किं च आकाङ्क्षा स्वरूपसती कारणम्, लिङ्गं तु ज्ञायमानतयेति सत्तया कारणस्य ज्ञायमानतया कारणीभूतलिङ्गकोटा निवेशो न युक्तः। तदर्थं तदनिवेशे केवला योग्यनिष्ठा आसत्तिर्हेतौ प्रवेश्यमानाव्याप्ति-निर्वहणासमर्था, व्यभिचारात्।

तथा हि—परिच्छेदपक्षे एते पदार्था मिथः संसर्गवन्तः इति संसृष्टा एवेति नियमो वा साध्यः। तत्र संसर्गरहितेषु नद्यास्तीरे फलानि सन्तीत्यनाप्तोक्तपदार्थेषु व्यभिचारः। आप्तोक्ताकाङ्क्षादिमत्पदस्मारितत्वादिति हेतुशरीरे पदे आप्तोक्तत्वं विशेषणमिष्यत इति चेत्—किमिदमाप्तत्वम् ? अविप्रलम्भकत्वं वा प्रमात्मकानुभववत्त्वं वा? आद्ये अविप्रलम्भकेनापि आप्तेनोक्तपदार्थेषु व्यभिचारः। द्वितीयमपि किं सार्वकालिकसर्वविषयकप्रमावत्त्वं यद्वा किंचिद्विषयकप्रमावत्त्वम्,अथवा पदार्थसंसर्गात्मकप्रकृतवाक्यार्थविषयकप्रमावत्त्वम्, पदार्थमात्रविषयकप्रमावत्त्वं वा। तत्राद्यमसर्वज्ञस्यासम्भवि, भ्रान्तेः पुरुषधर्मत्वात्। द्वितीयम् अनाप्तस्याप्यस्तीति व्यर्थमाप्तोक्तत्वविशेषणम्। तृतीयमेव तु अव्यभिचरितम्। तथापि तद् दुर्वचम्। वाक्यार्थप्रतीतेः प्राग् अयमेतद्विषयकप्रमावानिति निश्चयासिद्धेः हेतुज्ञानासम्भवात्। 'अथैनैव विशेषो हि निराकारतया धियाम्' इति नयेन प्रकृतज्ञानं प्रकृतवाक्यार्थमादाय निरूप्यम्। वाक्यार्थश्च साध्यत्वाभिमतः संसर्गविशेष एव। तज्ज्ञानं च अनुमितिरूपत्वाद् इतः पश्चाद् भवेत्, न पूर्वम् इति। चतुर्थमपि न युक्तम्। अनाप्तोक्ते व्यभिचारादेव।

नन्वेतस्मिन् संसर्गेऽयं प्रमावानिति विशिष्याज्ञानेऽपि एतेषां संसर्गेऽयं प्रमावानिति सुग्रहमिति चेत्-तदपि दुर्ग्रहमेव। संसर्गस्यैव साध्यत्वात् तस्य चाननुभूतत्वात् तत्स्मरणपूर्वकं तत्र प्रमात्वनिश्चयायोगात्। तथा च ईदृशाप्तत्वरूपविशेषणस्य असिद्ध्या विशिष्टलिङ्गासिद्ध्या अनुमित्यनुपपत्तिरिति।

अतः संसर्गवत्त्वसाध्यत्वपक्षं परित्यज्य संसर्गयोग्यत्वस्य साध्यत्वरूपः द्वितीयपक्षः स्वीक्रियते चेत्—तावता योग्यत्वानुमितावपि वाक्यफलत्वेनाभिमतस्य संसर्गनिश्चयस्यासिद्धिः। सिद्धसाधनं च। हेतुकोटौ आकाङ्क्षादिवद् योग्यताया निवेशितत्वात् हेतुज्ञानकाल एव योग्यताज्ञानस्य सिद्धत्वात्। एतद्-दोषभिया हेतुकोटौ योग्यताया अनिवेशे आकाङ्क्षासत्तिमत्पदस्मारितत्वमात्रं हेतुरिति अग्निना सिञ्चतीति पदस्मारितपदार्थेषु व्यभिचारः। तस्मान् पदार्थपक्षकमनुमानमयुक्तम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथोत्तरार्धेन पदपक्षकानुमानदूषणम्। एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वाद् गामभ्याजेतिपदवदिति पदपक्षकमनुमानम्।

आकाङ्क्षाविचारः

तत्र हेतुशरीरे प्रविष्टा आकाङ्क्षा नाम का? न तावद् विशेषणविशेष्यभावः। स हि केनचित् सम्बन्धेन विशेष्यस्य विशेषणविशिष्टत्वम्, यथा गामित्यत्र आधेयतासम्बन्धेन कर्मत्वस्य गोविशिष्टत्वम्। स च संसर्गरूप इति वाक्यार्थरूपत्वात् साध्यः कथं हेतुघटको भवेत् ? नापि विशेषणविशेष्यभावयोग्यता आकाङ्क्षा, योग्यतारूपविशेषणान्तरानतिरिक्तया पौनरुक्त्यात्।

नापि पदार्थयोरविनाभावः आकाङ्क्षा। नीलं सरोजम् इत्यादौ तदभावेऽपि वाक्यार्थप्रत्ययात्। नीलरूपं विनापि हि पुण्डरीकं सरोजम्, सरोजभिन्नाप्यतसी नीलेति। ननु तत्र विशेषधर्मावच्छिन्नयोर्नीलसरोजयोर्विनाभूतत्वेऽपि तद्वृत्तिसामान्यधर्मरूपगुणत्वद्रव्यताश्रययोर्गुणद्रव्ययोरविनाभावोऽस्त्येवेति चेन्न।तथा सति "अहो विमलं जलं नद्याः" इत्येतद्वाक्यानन्तरं "कच्छे महिषश्चरति" इति वाक्यप्रयोगे तत्र वाक्यभेदो न स्यात्। "साकाङ्क्षं चेदेकं वाक्यम्" इति हि वाक्यविदः। अस्ति हि नदीकच्छयोरविनाभावरूपा आकाङ्क्षा।

अथ श्रोतृसमवेता जिज्ञासा आकाङ्क्षेति चेत्—तत्रापि आलोचनीयम्—रक्तः पटो भवतीत्यत्र पटे रूपजिज्ञासासद्भावात् तद्वाक्यैकदेशः पटो भवतीति भागः यथा अपूर्णः, तथा पटो भवतीति वाक्यमपि अनवसितमेव स्यात्, जिज्ञासायाः अविशिष्टत्वात्। तथा च सर्वमपि वाक्यमवाक्यमेव स्यात्, उपर्युपरि जिज्ञासायाः सम्भवेनापर्यवसानात्।

ननु न सर्वा जिज्ञासा आकाङ्क्षा। किं तु यत्र यावन्ति पदानि प्रयुक्तानि तत्र तावत्स्मारितार्थजिज्ञासैवाकाङ्क्षेति केवलं पटो भवतीत्यपि वाक्यमेवेति चेत्—अस्त्वेवम्। परं तु इहेदं विचार्यम्, किमस्यामाकाङ्क्षायां जातायां वाक्यार्थप्रत्ययः उत ज्ञातायाम्। तत्र जननमात्रेणेति प्रथमपक्षे आत्ममनस्संयोगादिवत्सत्तयैवोपयोगात् ज्ञातहेतुकोटावाकाङ्क्षाविशेषणमनुचितम्। तत्परित्यागेन आसत्तियोग्यतामात्रनिवेशेन हेतूक्तौ "अयमेति पुत्रो राज्ञः" इति वाक्यानन्तरमेव "पुरुषोऽपसार्यताम्" इति वाक्यप्रयोगे राजपदार्थपुरुषपदार्थयोः आसत्तियोग्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

तासद्भावात् तत्र संसर्गज्ञानपूर्वकत्वरूपसाध्यस्य, पुरुषस्य राजासम्बन्धित्वे संसर्गवत्त्वरूपसाध्यस्य चाभावाद् व्यभिचारः।

वस्तुतस्तु न जिज्ञासा आकाङ्क्षा। जिज्ञासारहितस्यापि पुरुषस्य वाक्यार्थबोधोत्पत्त्या व्यतिरेकव्यभिचारात्। अतो जिज्ञासा-योग्यता आकाङ्क्षेति वक्तव्यम्। योग्यता च न तावत् स्मारिततदाक्षिप्तयोरविनाभावः। 'अहो विमलं जलं नद्याः, कच्छे महिषश्चरति' इत्यत्र वाक्यभेदो न स्यादित्युक्तत्वात्। अपि तु स्मारिततदाक्षिप्तयोरविनाभावे सति तदुत्पाद्यसंसर्गावगमप्रागभावः। तदर्थश्च स्मारितस्य तदाक्षिप्तस्य वा अविनाभावस्थले तेन अविनाभावेन तदभावे प्रकारान्तरेण यः उत्पाद्यः, यद्वा अविनाभावे जिज्ञासोपयोगितया वस्तुतो वर्तमाने यः तेन=पूर्वं तदाक्षिप्तेति तच्छब्दगृहीतेन स्मारितार्थेनोत्पाद्यः संसर्गावगमः तत्प्रागभावः आकाङ्क्षेति।

तथाहि—पदस्मारितमादायैव गन्धवती पृथिवीत्यादौ साक्षादेव अविनाभावोऽक्षतः। नीलं सरोजमित्यादौ साक्षादविनाभावाभावेऽपि नीलस्य गुणत्वेन द्रव्यमन्तरा असम्भवात्, सरोजस्य च नानावर्णस्य सर्वात्मना वर्णं विना असम्भवाद् आक्षिप्तमादायाविनाभावः। एवं गामानयेत्यादौ गोकर्मकत्वस्य क्रियामन्तरा, आनयनक्रियायाः मूर्तद्रव्यादिकारकमन्तरा असम्भवाद् आक्षिप्तमादाय अविनाभाव ऊह्यः। एवं च अविनाभाववशादेव तत्र तत्र जिज्ञासापि भवति। सा च स्मारकपदसद्भावे तदर्थान्वयेन शाम्यति। तदभावे चाकिंचित्करत्वेनानुत्पन्नेव अवतिष्ठते।

एतदुक्तं भवति—नाविनाभाव आकाङ्क्षाशरीरे प्रविष्टः। किं त्वविनाभावो न योग्यतेति सूचनार्थम् अविनाभावे सतीत्युक्तम्। तथा च गामानयेत्यादौ गोपदस्य धात्वन्वयात् प्राक् साकाङ्क्षत्वस्य, जातेऽन्वये निराकाङ्क्षत्वस्य च लोकानुभवसिद्धत्वाद् उत्पाद्य-संसर्गावगमप्रागभाव एव आकाङ्क्षा। तत्पदस्य साकाङ्क्षत्वं नाम तत्पदस्मारितोत्पाद्यः पदान्तरस्मारितेन सह यः संसर्गावगमः तत्प्रागभावः। जलं नद्याः, पुत्रो राज्ञः इत्यादौ षष्ठ्यन्तपदस्य यत्पदार्थेन सह संसर्गावगम उत्पाद्यः तत्पदार्थेन जलेन पुत्रेण च सह तस्योत्पादितत्वात् संसर्गावगमप्रागभावाभावान्निराकाङ्क्षत्वमेव। न च कच्छेन पुरुषेण च सह उत्पाद्यस्य संसर्गावगमस्य प्रागभावोऽस्तीति शङ्क्यम्। तस्यानुत्पाद्यत्वात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

अयमेवावगम उत्पाद्यः इति च केनापि प्रकारेणावसेयम्। तथा च तदुत्पाद्यसंसर्गावगमप्रागभाव एव तस्याकाङ्क्षेति सिद्धम्।

इयं च सत्तया शाब्दबोधकारणम्। ज्ञाततया कारणत्वं च दुर्वचम्। संसर्गविगमप्रागभाव इत्यस्याभावस्य अवगमरूपप्रतियोगिज्ञानेन ज्ञेयत्वात् प्रतियोगिनश्चावगमस्य संसर्गरूपविषयग्रहणेनैव ग्राह्यत्वात् शब्दस्यानुमानान्तर्भावपक्षे अनुमितेः प्राक् संसर्गस्यागृहीतत्वेन तदवगमप्रागभावस्य दुर्ग्रहतया हेतुरेव दुर्ग्रहत्वापत्तेः। हेतुग्रहणे च तद्घटकसंसर्गस्यापि प्रागेव सिद्धिस्वीकारप्रसङ्गात् अनुमानवैयर्थ्यम्। तत्सिद्धम्—"आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना" इति। अतो द्विविधानुमानप्रयोगस्यापि दूषितत्वात् शब्दो नानुमानम्।

प्राभाकरमतनिरासः[न्यायकुसुमाञ्जलौ तृतीयस्तबके]

एवं सर्वस्य शब्दस्यानुमानान्तर्भाववादिनां वैशेषिकाणां मतं निरस्तम्। अथ वेदस्य पृथक् प्रमाणत्वं लौकिकशब्दस्य अनुमानतां चातिष्ठमानानां प्राभाकराणामर्धजरतीयपक्षः उपन्यस्य निरस्यते।

प्राभाकरा एवमास्थिषत (निर्णीतवन्तः)—

लोके व्यवहाराच्छक्तिग्रह इति पदानां कार्यान्विते शक्तिः। य एव लौकिकास्त एव वैदिका इति न्यायेन वेदस्याप्यन्विताभिधायकत्वमतः सिद्धम्। तत्र लोके एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वाद् इत्यनुमानत एव वक्तृज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वाद् इत्यनुमानत एव वक्तृज्ञानरूपपसाध्यविशेषणतया संसर्गस्याप्यनुमितत्वात् सत्यपि अन्विताभिधानशक्तिबलाद् बोधे सोऽनुमितिगृहीतार्थग्रहरूप एवेति लौकिकः शब्दोऽनुवादभूतः। न त्वेवं वेदे तस्य अपौरुषेयत्वेन वक्तुरभावेन तज्ज्ञानानुमानप्रसक्त्यभावात् संसर्गानुमित्यसम्भवाद् अन्विताभिधानशक्त्यधीनबोधस्यैव प्राथम्यादिति। किं च पदानामपूर्वाख्यकार्य-तदन्वितान्यतराभिधायकत्वात् लौकिकवाक्यस्य च सर्वलाक्षणिकत्वात् लाक्षणिकं पदं नानुभावकमिति सिद्धान्तान्न शब्दविधया प्रामाण्यम्। वेदश्च कार्यपर एवेति।

इदं तेषामाकूतम्-भाष्यकारेण शबरस्वामिना—

"शास्त्रं शब्दविज्ञानादसन्निकृष्टार्थविज्ञानम्"

Digitization by Arya Samaj Charitable Foundation, Chennai

इति शब्दप्रमाणलक्षणप्रसङ्गे शास्त्रपदप्रयोगात् शास्त्रात्मकस्य शब्दस्यैव पृथक्त्वमनुमन्यते। लौकिकशब्दस्य तु अनुमानताम्। तदुक्तं **प्रकरणपञ्चिकायाम्**—[पृ.२४२-२४४]

नन्वशास्त्रमपि शाब्दमस्ति लौकिकम्, तत् किमिति न लक्षितम्। उच्यते—न शास्त्रव्यतिरिक्तं शाब्दमस्ति। शब्दाद्धि यद्विज्ञानमसन्निकृष्टेऽर्थे तत् शास्त्रं स्यात्। न च वेदव्यतिरेकेण तत् सम्भवति। लौकिकं वाक्यं नार्थे स्वयं निश्चयमुत्पादयति। लौकिकवचसामनृतभूयिष्ठत्वाद् अर्थव्यभिचारस्य शङ्कितत्वात्—

अथ वास्त्येव निश्चयोपायः। यो हि पुरुषः एवमवधारितः 'नायमशक्तो न प्रमादी सम्भवदेतदर्थविषयप्रमाणः सकलाशयदोषरहितश्च, नायमविज्ञाय अन्वयमर्थानामन्वितार्थानि प्रयुङ्क्ते' इति तद्वाक्यप्रयोगस्यान्वयज्ञानपूर्वकत्वाद् अन्वयज्ञानं तावद् अनुमीयते। अन्वयज्ञानाच्चान्वयोऽप्यनुमीयते। ज्ञानं हि ज्ञेयाविनाभावि ज्ञेयानुमाने भवत्येव लिङ्गम्। तदेवं लौकिकाद्वचसः लिङ्गभूताद् वक्तृज्ञानमनुमीयते। ततोऽर्थं निश्चित्य व्यवहारः प्रवर्तते। एवं च निश्चितेऽन्वये निवृत्तानन्वयाशङ्काद् वाक्यादप्यर्थनिश्चयो जायते। किं तु तस्यां तद्वाक्यस्यानुवादकतैव। अत एव लौकिकं वचनं न शाब्दं प्रमाणम्। अभिप्राये शब्दो लिङ्गम्, अभिप्रायोऽप्यर्थे लिङ्गम्, शब्दस्त्वर्थे पश्चात् निश्चयं जनयन्नपि अनुवादकत्वान्न प्रमाणम्।"

इति।

तदेतत् प्राभाकरमतं वैशेषिकमतादपि स्थूलतरम्। व्यवहाराद् अन्विताभिधानशक्तिर्वाक्यस्य निर्णीतेति आकाङ्क्षायोग्यतासत्तिमत्पदकदम्बज्ञानरूपसामग्री यथा वेदे तथा लोकेऽपि बोधं जनयेदेव।क्लृप्तसामग्रीसत्त्वेऽपेक्षणीयान्तराभावेन विलम्बायोगात्। अतो वाक्यजन्यबोध एव प्रथमः। अनुमितिरूपसंसर्गज्ञानं तु पश्चात्कालिकम्। अनुमितिहेतुः विशिष्टलिङ्गज्ञानं हि नाम बोधसामग्रीत्वेनोक्तमाकाङ्क्षादिविशिष्टपदकदम्बज्ञानमेव। तथा च ईदृशलिङ्गज्ञानानन्तरं साध्यहेत्वोर्व्याप्ति- ज्ञानादिकमधिकमनुमितावपेक्ष्यत इति। अतो वेदवल्लोकेऽपि पदार्थान्वयः प्रागेव प्रतीत इति विलम्बितेनानुमानेन किं निर्णेयमस्ति। सिद्धेऽनुमित्ययोगात्। पश्चाद् अनुमितिसत्त्वेऽपि लिङ्गमेवानुवादरूपं ज्ञातज्ञापकत्वात् न शब्दः।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ लोके शब्दजन्यबोधे अयमाप्त इति निश्चयोऽपि कारणमिति चेत्— न। व्युत्पत्तिकाले वक्तुराप्तत्वनिश्चयाभावेऽपि पदानां बोधजनकत्वस्यावधारणाद् बोधं प्रति आप्तत्वनिश्चयस्याहेतुत्वात्। अशक्यं चैतस्य कारणत्वकल्पनं वेदे लोके च। तथा हि—आप्तत्वनिश्चयस्य बोधसामान्येऽपेक्षितत्वे वेदाद् बोधो न स्यात्। तत्र वक्तुरभावेन तस्य दुर्घटत्वात्। न च लौकिकपदघटितसामाग्रीमात्रमाप्तत्वनिश्चयसापेक्षमिति वाच्यम्। वैदिक-लौकिकपदभेदे हि इदं शक्तिवैलक्षण्यं स्यात्। स एव न, लोकवेदाधिकरणविरोधात्।

ननु नद्यास्तीरे फलानि सन्तीत्यनाप्तवाक्यजन्यबोधे विसंवादात् पौरुषेयवाक्ये प्रामाण्यव्यभिचारदर्शनाद् वेदवद् इह सामग्री वर्तमानापि संदेहात् कार्याक्षमा भवतीति चेत्—न। सामग्र्यां सत्यामन्यादृशसंदेहस्य कार्यप्रतिबन्धकत्वायोगात्। चाक्षुषज्ञानस्य क्वचिद् भ्रमत्वदर्शनेन चक्षुषः प्रामाण्यसंदेहे सत्यपि हि विष्फारितं चक्षुः वस्तु दर्शयत्येव।

ननु सति संदेहे निश्चायकं न भवतीति यत्, अयं निर्बन्धः ज्ञायमानकरणस्य, लिङ्गं हि सति संदेहे न निश्चायकम्। चक्षुस्तु न ज्ञायमानतया करणमिति चेत्—न। यो हि संदेहः सामग्र्यनुप्रविष्टं किमपि कारणं विघटयति तस्मिन् सति कार्याभाव इति युक्तम्। इह च संदेहः कुत्र ? किमाकाङ्क्षादिविशेषणविशिष्टवाक्यविषये, किं वा वाक्यजन्यबोधप्रामाण्यविषये, आहोस्विद् वाक्यप्रयोक्तुराप्तत्वविषये। नाद्यः, तत्र सर्वस्याप्यंशस्य वेद इवासन्दिग्धत्वात्। न द्वितीयः, बोधप्रामाण्यसंशयस्य बोधरूपधर्मिग्रहणाधीनत्वात् तदर्थं बोधोत्पत्तेरावश्यकत्वेन तदनुत्पत्तिवर्णनायोगात्। न तृतीयः, आप्तत्वनिश्चयस्य वेदे व्यभिचाराद् अकारणत्वस्य कथ्यमानत्वाद् अनुपयुक्ताप्तत्वसंशयस्याकिंचित्करत्वात्। न केवलं लोकवेदयोरैकशब्द्यात् वेदे व्यभिचाराद् आप्तत्वनिश्चयस्याकारणत्वम्। किं तु लोके व्यभिचारादपि। भवति हि वेदानुकारेण उदात्तादिस्वरसमावेशेन पठ्यमाने मन्वादिवाक्येऽपौरुषेयत्वाभिमानिनः गौडस्यानधीतवेदस्य (पञ्चिकाकारस्य) मीमांसकस्यार्थनिश्चयः।

नन्वाप्तत्वनिश्चयो वाक्यार्थप्रमां प्रति कारणम्। अयं तु मन्वादिवाक्यतोऽर्थनिश्चयः भ्रान्तिरिति चेत्—न। मनुप्रणीतत्वनिश्चयात् पश्चाज्जायमानस्यार्थनिश्चयस्य अस्य च समानविषयकतया भ्रान्तित्वायोगात्। एवं चाप्तत्वनिश्चयः

Digitization by Arya Samaj Charitable Foundation, Chennai

न शाब्दबोधं प्रति कारणम्, अपि तु उत्पन्नशाब्दबोधविशेष्यकप्रामाण्यप्रकारकज्ञानं प्रति कारणमिति सिद्धम्।

ननु शाब्दबोधं प्रति आप्तोक्तत्वनिश्चयः कारणं मा भूत्, अनाप्तोक्तत्वज्ञानविरहः कारणमस्तु। मन्वादिवाक्येऽपौरुषेयत्वाभिमानिनोऽपि अनाप्तोक्तत्वज्ञानविरहसत्त्वात् न व्यभिचार इति चेत्—इदं कल्पनं किमर्थम्, अशक्यं चेदम्। तथा हि—किमस्यानाप्तोक्तत्वज्ञानविरहस्य लोकवेदसाधारण्येन कारणत्वं स्वीकृत्य येन वेदापौरुषेयत्वमबुद्धं सन्दिग्धं वा, तस्यापौरुषेयत्वनिश्चयशून्यस्य व्युत्पत्तिमतः वेदवाक्यश्रवणेऽर्थप्रत्यय एव न जायत इत्युच्यते, किं वा लोकवाक्यमात्रे तस्य कारणत्वं स्वीकृत्य वेदे जायत एवार्थप्रत्ययः, किं तु जातोऽपि निश्चितप्रामाण्यो न भवतीति।

आद्ये सत्यमेव कार्यम्, शपथान्तरं वा प्रयोक्तव्यम्। साधकयुक्त्यभावाद् अनुभवविरूद्धत्वाच्च। न च संसर्गग्रहाभावेऽपि असंसर्गाग्रहमात्रे सति पीतः शङ्ख इत्यादिसंसर्गव्यवहारस्यास्य-दिष्टत्वाद् वेदेऽप्येवम्, न तु अर्थप्रत्यय इति वाच्यम्। तत्र वस्तुतः शङ्खस्य पीतरूपसंसर्गबाधकसद्‌भावात् तथा त्वदिष्टत्वेऽपि अत्र वेदवाक्यार्थस्य वस्तुतः संसृष्टत्वेन तदयोगात्। स्थितस्य असंसर्गस्य अग्रहो हि असंसर्गाग्रहः। बाधकाभावेऽपि असंसर्गाग्रहाङ्गीकारे शब्दस्थले सर्वत्र संसर्गग्रहोच्छेदप्रसङ्गात्।

जातोऽपीत्यादिद्वितीयपक्षे वेदजन्यबोधं प्रति अपौरुषेयत्वनिश्चयस्य अकारणत्वमेव सिद्धमिति तत्राप्रामाण्यज्ञानात्मकाश्रद्धानिवृत्तिः कथमिति चिन्त्यताम्। ज्ञायमानतया अकारणे चक्षुरादौ सति, शङ्कायां सत्यामपि प्रत्यक्षं भवत्येव किल। तत्र यथा पश्चादेव सफलप्रवृत्तिजनकत्वादिज्ञानाद् अप्रामाण्य शङ्कानिवृत्तिर्भविष्यति, न्यायस्य अविशेषात्।

अन्यथा एतदापत्तिपरिहाराय वेदेऽप्यपौरुषेयत्वनिश्चयापेक्षापक्षमेव परिगृह्य अनाप्तोक्तत्वशङ्कानिरासरूपकारणसापेक्षत्वात् लौकिकशब्दस्यानुवादकत्वस्वीकारे वेदेऽपि तत्कारणसापेक्षत्वस्य अविशिष्टत्वात् तस्याप्यनुवादकताप्रसङ्गः। तत्राप्यनुमानेन संसर्गनिश्चयसम्भवात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आप्तोक्ताकाङ्क्षादिमत्पदकदम्बत्वाद् इति लोके शक्यमनुमातुम्, न तु वेदे, अपौरुषेये ज्ञानपूर्वकत्वाप्तोक्तत्वयोस्योगादिति चेत्—उच्यते। अनाप्तोक्तत्वशङ्कानिरासस्यैव लोकेऽपि कारणत्वात् हेतुशरीरे आप्तोक्तत्वं न निवेश्यम्। निरस्तानाप्तोक्तत्वशङ्कत्वमेव पदविशेषणमिति तत्र साम्यमेव।

इयांस्तु विशेषः—लोके पदपक्षीकारेण पदत्वहेतुना संसर्गज्ञानपूर्वकत्वं साध्यते। वेदे तु तदसंभवात् पदार्थपक्षीकारेण तादृशपदस्मारितत्वेन हेतुना संसर्ग एव साध्यते। तत्र च ज्ञानद्वारा संसर्गसाधनापेक्षया साक्षात् संसर्गसाधनं ज्याय एव। ज्ञानपूर्वकत्वं साध्यमिति पक्षेऽपि संसर्गसाधने एव तात्पर्यम्। किं च भवता किम् आप्तोक्तत्वनिश्चयादनन्तरमनुमानप्रवृत्तिः स्वीक्रियते ? ततः पूर्वं वा ? पूर्वं चेत्, हेतुकोटावाकाङ्क्षादिमत्त्वमात्रनिवेशाद् अनाप्तवाक्ये हेतुसत्त्वाद् व्यभिचारः। अतः प्रथमपक्षस्वीकारे आप्तोक्तवाक्येषु अर्थसंसर्गस्यावश्यकत्वेन व्यभिचाराभावात् लोकेऽपि साक्षात् संसर्गसाधनसौकर्याय पदार्थपक्षकानुमानस्वीकारो युक्ततरः।

तथा च इमे पदार्थाः मिथः संसृष्टाः विशेषेण निरस्तपुरुषदोषाशङ्कपदस्मारितत्वाद् इत्यनुमानेन लोके संसर्गनिश्चये वेदेऽप्येवं सम्भवात्। लोके प्रकारान्तराश्रयणेऽपि वेदे एवमनुमानसंभवाच्च अर्थेऽनुमानेन निर्णीते सति वेदस्याप्यनुवादकतं कुतो न भवति—इति।

इदं चानुवादकत्वापादनमन्विताभिधानशक्तिरस्तीत्यभ्युपगम्य। उक्तरीत्या अनुमानेन निर्वाहे तु तत्र प्रमाणमेव नास्ति। विशिष्टार्थप्रतीत्यन्यथानुपपत्त्यैव शब्दस्यान्विते शक्तिकल्पनात् सा च प्रतीतिरनुमानेनैवोपपन्नेति वृथा अन्वितशक्तकल्पनप्रयासः।

यदि च आकाङ्क्षादिमत्पदकदम्बज्ञानमात्रेण व्याप्तिप्रतिसन्धानादेः प्रागेव अन्वयप्रतीतिरिति वेदेऽन्विताभिधानमिष्यते, तदा लोकेऽप्येवमेव। तस्माच्छब्दस्यानुवादकतेति कल्पना विपरीत-कल्पनैव, लिङ्गस्यैव शब्दप्रतीतार्थानुवादकत्वात्।

अथ शब्दतोऽर्थनिर्णयस्य जातत्वात् सिद्धेऽनुमितेर्नावकाश इति मन्यते तर्हि शब्दस्थलेऽनुमानकथाया एव नावसरः। तस्मात् लौकिको वैदिको वा सर्वोऽपि शब्दः पृथगेव प्रमाणम्, नानुमानगतार्थः इति सिद्धम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्त्वचिन्तामण्यनुसारेण शब्दस्यानुमानगतार्थतानिरसनम्
[शब्दखण्डे]

ननु शब्दः न प्रमितिकरणम्। करणविशेषः प्रमाणम् अथवा प्रमितिकरणम्। करणं च तत् यस्मिन् सति क्रिया भवत्येव। फलायोगव्यवच्छिन्नं कारणं करणम्, फलोपधायकमिति यावत्। न च शब्दे सति अवश्यं प्रमा भवति। आकाङ्क्षादिज्ञानविरहदशायां पदार्थस्मरणादिव्यापारविरहदशायां च शब्दात् प्रमानुत्पत्तेः अन्वयव्यभिचारात्। तथा च शब्दो न प्रमाणम्, प्रमोपधायकत्वात्यन्ताभावात्। न च साध्याविशिष्टत्वं हेतोरिति शङ्कनीयम्। प्रमोपधायकान्यत्वस्य साध्यत्वात्। प्रमोपधायकत्वात्यन्ताभावस्य हेतुत्वात्। अन्योन्यात्यन्ताभावभेदेन साध्यहेत्वोर्भेदात्।

न च शब्दो न प्रमाणम् इति प्रतिज्ञावाक्यस्य प्रमितिजनकत्वे प्रमोपधायकान्यत्वव्याघातः। प्रमित्यजनकत्वे प्रमाणाभावः। भवदुक्तवाक्यस्य अप्रामाण्यप्रमित्युपधायकस्य सद्भावे शब्दमात्रस्य प्रमित्यनुपधायकतायाः निष्प्रमाणकत्वादिति यावत्, इति वाच्यम्। 'शब्दो न प्रमाणम्' इति वाक्यस्य प्रमित्यनुपधायकत्वेऽपि एतज्जन्यपदार्थोपस्थिति-उपस्थितपदार्थासंसर्गाग्रहसहकृतस्य मानस्यमनसः अविसंवादात् = प्रमोपधायकान्यत्वविषयकप्रमाजनकत्वात्। तथा च मन एव शब्दस्य प्रमोपधायकान्यत्वे प्रमाणम्, हेतुनिर्देशश्च अप्रमाण्यशङ्काव्युदासाय। इति चेत्—न।

आकाङ्क्षायोग्यतादिज्ञानविशिष्टस्य पदार्थस्मरणादिव्यापारवतः शब्दस्य प्रमित्युपधायकत्वेन तथाभूतात् शब्दात् प्रमित्युत्पत्तेरावश्यकत्वात्। अतथाभूतात्—आकाङ्क्षाज्ञानादिसहकारिरहितात् शब्दात् प्रमित्यनुत्पत्तावपि न क्षतिः। स्वेतरयावत्कारणसत्त्वे स्वसत्त्वे यदि कार्यं न जायते तदैवान्यव्यभिचारात्। अन्यथा चक्षुरादेरपि प्रमित्यजनकत्वं आलोकाद्यभावे वर्तत इति अप्रमाणत्वं स्यात्। तथा च शब्दः न प्रमाणम्, स्वेतरकारणविरहदशायां प्रमित्यनुपधायकत्वाद् इत्यनुमाने चक्षुरादौ व्यभिचार इत्युक्तं भवति।

अत्र केचित्—शब्दः स्वविषयकश्रावणप्रत्यक्षं प्रति हेतुः, तथा स्वलिङ्गकानुमितिं प्रति च हेतुः। तदन्यप्रमां प्रति तु न हेतुः। न चैवं वाक्यश्रवणानन्तरं शक्यार्थबोधः कथं स्यादिति वाच्यम्। वाक्यघटकीभूततत्तत्पदेभ्य तत्तत्पदार्थोपस्थितौ मनसैव उपनीतभानात्मकवाक्यार्थज्ञानसम्भवात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च तथापि वाक्यश्रवणानन्तरं शाब्दत्वजातिविशिष्टः वाक्यार्थबोधः कथं स्यात्, तादृशजात्यवच्छिन्नबोधस्यापि पदार्थोपस्थितिसहकृतमनोमात्रहेतुकत्वे मानसत्वविशिष्टसाक्षात्कारमात्रस्यैव शाब्दत्वापत्तिरिति वाच्यम्। शाब्दत्वरूपातिरिक्तजातौ मानाभावात्। शाब्दत्वस्यातिरिक्तजातेरभ्युपगमे तदवच्छिन्नोत्पत्तिनियामकतया वृत्त्या पदजन्यपदार्थोपस्थित्यादेर्हेतुताया अवश्यकल्पनीयत्वेन गौरवप्रसङ्गाच्चेत्याहुः।

तदसत्। अमुमर्थं शाब्दयामि, अयमर्थः शाब्दितः इत्याद्यनुभवसिद्धायाः शाब्दत्वजातेः अपह्नोतुमशक्यत्वात्। अत एव शाब्दत्वावच्छिन्नं प्रति वृत्त्या पदजन्यपदार्थोपपस्थित्यादेः कारणत्वकल्पनायां गौरवमपि प्रामाणिकत्वान्न दोषाय।

वस्तुतस्तु 'अमुमर्थं शृणोमि' 'श्रुतमेवेदं पुराणादिभ्यः' इत्याकारकानुभवसिद्धैव शाब्दत्वजातिः। न च श्रुधातोः श्रावणप्रत्यक्ष एव शक्तेः शाब्दत्वजातिः कथं तादृशानुभवविषय इति वाच्यम्। श्रुधतोः नानार्थत्वात्। "आत्मा वा अरे श्रोतव्यो मन्तव्यः" इत्यादिश्रुतौ "अयमर्थो मया श्रुतः" इत्यादिलौकिकवाक्ये च शाब्दबोधेऽपि श्रुधातोः प्रयोगात्।

न च तत्र शाब्दे लक्षणेति वाच्यम्, श्रुवः प्रत्यक्षे लक्षणेत्यस्यापि सुवचत्वात्।

अथास्तु शाब्दत्वं जातः, अस्तु वा तदवच्छिन्नं प्रति पदज्ञानजन्यपदार्थोपस्थित्यादेर्हेतुत्वम्। तथापि सा जातिः मानसत्वव्याप्यैव। तथा च चक्षुरादिवत् शब्दोऽपि प्रत्यक्षप्रमाणान्तर्गत एव, न तु प्रमाणान्तरम्।

न च शाब्दत्वस्य मानसत्वव्याप्यत्वे यागादिविषयकशाब्दबोधानन्तरं "यागं साक्षात्करोमि"इत्यनुव्यवसायापत्तिः तथा "यागादिकं नानुमितं न वा साक्षात्कृतम् किं तु श्रुतमेवेदं पदेभ्यः" इत्यनुव्यवसायानुपपत्तिश्चेति वाच्यम्। लौकिकविषयतात्मकसाक्षात्कारत्वावच्छिन्नविषयकत्वतदभावयोरुक्तानुव्यव सायविषयत्वात्। एतन्मते शाब्दस्य मानसोपनीतभानात्मकतया लौकिकविषयत्वाभावाद् यागादेः शाब्दबोधानन्तरं न 'यागं साक्षात्करोमि' इत्यनुव्यवसायापत्तिः। न वा "यागादि न साक्षात्कृतम्" इत्यनुव्यवसायानुपपत्तिरिति। अन्यथा 'सुरभि चन्दनम्' इत्युपनीतभानानन्तरं "सौरभं साक्षात्करोमि" इत्यनुव्यवसायापत्तेः "सौरभं न साक्षात्करोमि" इत्यनुव्यवसायानुपपत्तेश्च।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च शाब्दत्वस्य मानसत्वव्याप्यत्वे पदाजन्योपस्थितिविषयघटादीनामपि यागादिजन्यशाब्दबोधे उपनीतभावापत्तिः। तथा च "यागादिकं शृणोमि" इत्यनुव्यवसायवत् "घटादिकं शृणोमि" इत्यनुव्यवसायः स्यादिति वाच्यम्। शाब्दत्वावच्छिन्नविषयतायाः तत्राभावेन तादृशानुव्यवसायाभावात्। यदंशे वृत्त्या पदजन्यपदार्थोपस्थित्यादिजन्यत्वं तत्रैव शाब्दत्वावच्छिन्नविषयतायाः सत्त्वात्—इति चेत्—न।

शाब्दत्वजातेर्मानसत्वव्याप्यत्वे प्रमाणाभावात्। तथात्वेऽपि तदवच्छिन्नं प्रति वृत्त्या पदजन्यपदार्थोपस्थित्याकाङ्क्षाज्ञानादेर्हेतुत्वस्यावश्यकत्वेन लाघवगौरवानवकाशात्।

न च शाब्दसामग्रीदशायां मानससामग्र्याः आवश्यकत्वात् मानससामग्र्येव शाब्दत्वजातेर्मानसत्वव्याप्यत्वे प्रमाणमिति वाच्यम्। मानसज्ञानं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वाभावस्य असिद्धतया तदानीं मानससामग्र्या अपि सन्दिग्धत्वात्।

न च शाब्दत्वस्य मानसत्वविरुद्धत्वे मानसत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयम्, मानसत्वव्याप्यत्वे च तदा मानसोत्पत्ताविष्टापत्त्या न कल्पनीयमीति लाघवज्ञानसहकृतं "शाब्दत्वं मानसत्व-व्याप्यत्वतदभावान्यतरवत् प्रमेयत्वात्" इत्यनुमानमेव शाब्दत्वस्य मानसत्वव्याप्यत्वे प्रमाणमिति वाच्यम्। न हि ममापि मानसत्वावच्छिन्नं प्रति शाब्दसामग्रीत्वेन पृथक् प्रतिबन्धकत्वम्। अपि तु अनुमित्यादिसामग्रीसाधारणेन मानसेतरज्ञानसामग्रीत्वेन। तन्त्रानुमित्याद्युत्पत्तिदशायां मानसोत्पत्तिवारणाय भवतामप्यावश्यकमिति कुतो लाघवम्।

परं तु विपरीतमेव गौरवम्। तथा हि शाब्दत्वस्य मानसत्वविरुद्धत्वे मानसेतरज्ञानसामग्र्याः मानसत्वमेव प्रति बध्यतावच्छेदकम्। मानसत्वव्यापप्यत्वे तु शाब्देतरमानसत्वमेव प्रतिबध्यतावच्छेदकम्। अन्यथा स्मृतिसामग्रीसत्त्वे भिन्नविषयकलौकिकप्रत्यक्षसामग्रीसत्त्वे चाक्षुषाद्युपनीतभानादिसामग्रीसत्त्वे च मानसान्तरस्येव शाब्दात्मकमानसस्याप्यनुत्पत्त्यापत्तेः। तथा च मानसत्वव्याप्यत्वेप्रतिबध्यतावच्छेदकं गुरुशरीरम्।

किं च शाब्दत्वस्य मानसत्वव्याप्यत्वे यत्र पदजन्ययागाद्युपस्थितिः पदाजन्यघटाद्युपस्थितिश्च समूहालम्बनोपस्थितिरूपा, ततः आकाङ्क्षायोग्यतादिविष-

Digitization by Arya Samaj Charitable Foundation, Chennai

यकसमूहालम्बनज्ञानं, ततो यागादेः शाब्दबोधः तत्र शाब्दबोधसमये घटादेरपि मानसापत्तिः। न चेष्टापत्तिः, शाब्दबोधानन्तरं घटं जानामीत्यनुव्यवसायापत्तेः।

अपि च योग्यतासंशयदशायामपि शब्दश्रवणानन्तरं वाक्यार्थनिश्चयोऽनुभवसिद्धः। स कथं स्यात्? योग्यतासंशये सति मानससंशयसामग्रीसत्त्वाद् अर्थसंशयोत्पत्त्यापत्तेः। एकपदार्थेऽपरपदार्थवत्त्वस्य योग्यतात्वात्। अतः शाब्दबोधः मानसातिरिक्त इति मथुरानाथतर्कवागीशाः

लिलावत्युक्तानुमानपरिशीलनम्

तथापि शब्दो न प्रमाणान्तरम्, पदार्थसंसर्गरूपस्य वाक्यार्थस्य अनुमानादेव सिद्धेः। तथा हि - गामभ्याज दण्डेनेति पदानि, वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वात् घटमानयेतिवत्। तात्पर्यविषयीभूतो यः स्मारितपदार्थसंसर्गः तज्ज्ञानपूर्वकाणीत्यर्थः।

यत्तु लीलावतीकारेण योग्यतासत्तिमत्त्वे सति संसृष्टार्थपरत्वात् तत्परसंनिधिमत्त्वाद्वेति हेतुद्वयमुक्तं, तन्न सम्यक्। संसृष्टो हि योऽर्थः तत्परत्वं तत्परसन्निधिमत्त्वं वा असिद्धम्, संसर्गस्य अनुमानात् प्रागप्रतीतेः।

ननु एकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छया उच्चरितत्वं संसृष्टार्थपरत्वम्, एकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छया उच्चरितत्वे सति सन्निधिमत्त्वं तत्परसन्निधिमत्त्वम्, अतो न दोष इति चेन्न। अनाप्तोक्ते निराकाङ्क्षे च वाक्ये व्यभिचारात्। अनाप्तोक्तपदेन योग्यतारहितं वाक्यं पयसा सिञ्चति इत्यादिकं विवक्षितम्। अनाकाङ्क्षपदेन "घटः कर्मत्वमानयनं कृतिः" इत्यादि वाक्यं विवक्षितम्।

परं तु योग्यतावत्त्वे सतीति हेतुविशेषणे अनाप्तोक्ते अयोग्यवाक्ये न व्यभिचारः। साकाङ्क्षत्वनिवेशेन निराकाङ्क्षे न व्यभिचारः। तथापि यथाश्रुतलीलावतीदूषणमेतत्।

नन्वनेनानुमानेन संसर्गज्ञानस्य सिद्धावपि संसर्गस्य कथं सिद्धिरिति चेन्न। ज्ञानावच्छेदकतया तत्सिद्धेः। परामर्शे ज्ञानांशे संसर्गस्य विशेषणतया भानाद् अनुमितौ विशेषणतावच्छेदकतया संसर्गस्य भानम्, वह्निज्ञानानुमितौ वह्निभानवत्।

Digitization by Arya Samaj Charitable Foundation, Chennai

किं च ज्ञानविषयकं ज्ञानं ज्ञानविषययावद्विषयकमिति व्याप्तेः ज्ञानविषयकानुमितौ ज्ञानविषयसंसर्गस्यापि विषयत्वमिति संसर्गसिद्धिः।

ननु नायं नियमः, ज्ञानमिति पदजन्ये शाब्दज्ञाने आत्मा ज्ञानवान् इत्यनुमितौ च व्यभिचारात्। न च विषयविशिष्टतया तज्ज्ञानावगाहिज्ञानस्य तज्ज्ञानविषययावद्विषयकत्वमिति नियम इति वाच्यम्। घटः श्याम इति ज्ञानस्य घटज्ञानमिति शब्दतो ज्ञाने व्यभिचारात्। ज्ञानविषयश्यामत्वाविषयकत्वात्।

न च तज्ज्ञानविषयीभूतयावद्विषयविशिष्टतया तज्ज्ञानावगाहिज्ञानस्य तज्ज्ञानीययावद्विषयविषयकत्वमिति नियम इति वाच्यम्। उक्तसंसर्गज्ञानानुमितेः संसर्गज्ञानविषयीभूतयावद्विषयविशिष्टतया संसर्गज्ञानावगाहित्वस्यैवाप्रसिद्धेः, तत्रैव विवादात्।

न च तज्ज्ञानयावद्विषयोपस्थित्यव्यवहितोत्तरवर्ति यत् तज्ज्ञानविषयकं ज्ञानं तत् तज्ज्ञानयावद्विषयविषयकमिति नियमः, अनुव्यवसायादौ तथा दर्शनात्। उक्तानुमित्यादौ च ज्ञानविषयस्य नोपस्थितत्वम्, अनुव्यवसायादौ च व्यवसायादित एव तद्विषयस्योपस्थितत्वम्। प्रकृते च पदार्थसंसर्गज्ञानानुमितिजनकपरामर्शेनैव पदार्थसंसर्गज्ञानयावद्विषयाणामुपस्थितत्वमिति वाच्यम्। तथापि अयं घट इत्यादिज्ञानाव्यवहितोत्तर-विषयानुल्लेखिज्ञानवानित्यनुमित्यादौ व्यभिचारादिति।

मैवम्। बाधकाभावे सति तज्ज्ञानविषयकं यत् ज्ञानं तत् तज्ज्ञानयावद्विषयविषयकमिति नियमात्। उक्तस्थले बाधकस्य कारणाभावादेः सत्त्वान्न व्यभिचारः।

ननूक्तरीत्या संसर्गस्यानुमितौ भानेऽपि सम्बन्धिनः पदार्थस्य कथं भानम् इति चेत्-उच्यते। यथानुमितौ ज्ञानभाने ज्ञानावच्छेदकतया संसर्गभानम्, तथा संसर्गभाने तदवच्छेदकतया पदार्थस्यापि भानं सम्भवति।

ननु तथापि गोत्वानयनत्वादिरूपेण गवानयनादिसंसर्गसिद्धिः कथम्! स्मारितपदार्थत्वरूपेणैव व्यापकताग्रहे गवानयनादिपदार्थभानात्। प्रवर्तकं च ज्ञानं गोत्वावच्छिन्नप्रतियोगिकानयनत्वावच्छिन्नानुयोगिकसंसर्गविषयकं, न तु सामान्यतः पदार्थसंसर्गविषयकमिति चेत्—न।

Digitization by Arya Samaj Charitable Foundation, Chennai

व्यापकताज्ञानात्मकपरामर्शेऽस्यापि उपस्थितगोत्वानयनत्वावच्छिन्नयोः संसर्गस्य पक्षधर्मताबलादनुमितौ भानसम्भवात्।

अथैवं ज्ञानज्ञानस्य ज्ञानविषयकत्वे असद्विषयको यो भ्रमः तद्विषयकज्ञानस्यापि असद्विषयकतया भ्रमत्वं स्यात्। न चेष्टापत्तिः, ईश्वरस्यापि भ्रान्तत्वापत्तेः। तस्य सर्वज्ञत्वेन सर्वभ्रमविषयकज्ञानवत्त्वात्।

न च बाधकाभावे सति इति विशेषणस्य नियमशरीरे दत्तत्वात् नेश्वरज्ञानस्य भ्रमत्वम्, तस्य धर्मिग्राहकप्रमाणेन सन्मात्रविषयकत्वेनैव सिद्धतया धर्मिग्राहकप्रमाणरूपबाधकसद्भावादिति वाच्यम्। एवमपि इदं रजतमिति भ्रमाद् यथा शुक्तौ प्रवृत्तिः तथा रजतज्ञानवानयमिति भ्रमानुव्यवसायादपि शुक्तौ प्रवृत्त्यापत्तेः। भ्रमविषयविषयकत्वाद् अनुव्यवसायस्य।

मैवम्। न तावद् असद्विषयकत्वेन भ्रमत्वम्। भ्रमविषयाणां शुक्ति-रजतत्व-तद्वैशिष्ट्यानां सर्वेषां पारमार्थिकत्वात्। किं तु विशेष्यताव्यधिकरणप्रकारकत्वं भ्रमत्वम्। न हि भ्रमविषयकज्ञाने विशेष्यताव्यधिकरणं प्रकारः। भ्रमविषयकज्ञानं हि भ्रमविशेष्यकं रजतत्वप्रकारकत्वप्रकारकं च। रजतत्व-प्रकारकज्ञानवानहमिति हि भ्रमानुव्यवसायः। रजतत्वप्रकारकत्वं तु विशेष्यभूतभ्रमवृत्ति इति न विशेष्यता व्यधिकरणम्। अतो विशेष्यताव्यधिकरणप्रकारकत्वविरहात् न भ्रान्तिज्ञानस्य भ्रमत्वम्।

अन्यथा असद्विषयकत्वेनैव भ्रमत्वे भ्रान्त्यसिद्धिः। भ्रान्ति-ग्राहकस्य सर्वस्यैव असद्विषयत्वापत्त्या भ्रमत्वापातात्।

मणौ उक्तानुमानदूषणम्

एवं रीत्या प्रयुक्तस्य पदपक्षकानुमानस्य दूषणमेवं व्यधायि **मणौ**—परप्रवृत्त्यर्थं किल वाक्यं प्रयुज्यते। प्रवृत्तिश्च अर्थज्ञानादेव भवति, न तु अर्थज्ञानज्ञानात्। अर्थज्ञानत्वापेक्षया अर्थज्ञानज्ञानत्वस्य गुरुत्वेन तदवच्छिन्नस्य प्रवृत्त्यजनकत्वात्। इदं रजतम् इति रजतज्ञानाज्जायमानायां प्रवृत्तौ रजतज्ञानज्ञानं विनापि जायमानायां व्यतिरेकव्यभिचाराच्च।

एतेन—इदंत्वावच्छिन्ने तादात्म्येन रजतप्रकारकज्ञानस्यैव तादात्म्येन रजतप्रकारकप्रवृत्तिजनकतया प्रकारान्तरेण संसर्गानुमानमपि निरस्तं वेदितव्यम्। तथा हि—शाब्दबोधं प्रति तात्पर्यज्ञानं हेतुरित्यवश्यं वाच्यम्। अन्यथा

Digitization by Arya Samaj Charitable Foundation, Chennai

लक्षणास्थले नानार्थश्लिष्टस्थले च तात्पर्यग्रहस्याहेतुत्वे यष्टीः प्रवेशयेत्यादौ लाक्षणिकार्थस्य यष्टिधरस्यैवान्वयबोधः न तु शक्यार्थस्येति व्यवस्थानुपपत्तेः। एवं भोजनसमये सैन्धवमानयेत्युक्ते लवणस्यैवान्वयबोधः न तु अश्वस्येति निर्णयानुपपत्तेः। तात्पर्यं च एकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छया उच्चरितत्वम्। तत्र तात्पर्यग्राहकानुमानादेव तात्पर्यं घटकज्ञानावच्छेदकतया संसर्गसिद्धिः। तथा च सैन्धवमानयेत्यादिपदानि लवणपदार्थे आनयनसंसर्गप्रतीतीच्छयां उच्चरितानि भोजनप्रकरणे प्रयुक्तत्वाद् इत्यनुमानेन तात्पर्यग्रहवेलायां प्रतीत्यवच्छेदकतया संसर्गोऽप्यनुमीयत इति यदाहुः वैशेषिकादयः तन्न युक्तम्। प्रवृत्तियोग्यस्य सम्सर्गज्ञानस्य अतोऽसम्भवात्।

किं च व्यापकतावच्छेदकत्वेन परामर्शगृहीतो यो धर्मः तत्प्रकारिकैवानुमितिः। तथा च पदार्थत्वेन रजताद्यवगाहिनी स्मारितपदार्थसंसर्गज्ञानपूर्वकाणीत्येवानुमितिः स्यात् न तु रजतज्ञानपूर्वकाणीति। प्रवर्तकं तु ज्ञानं रजतत्वेन रजतविषयकम्। न तदनुमानात् जातम्, अपि तु शब्दादेवेति शब्दः प्रमाणान्तरम्।

एवं पदार्थपक्षकानुमानमपि कुसुमाञ्जलिच्छाययैव नूतनान् कांश्चित् विषयान् संयोज्य मणावनूद्य दूषितमिति तदप्यत्र प्रस्तूयते।

मणिग्रन्थरीत्या वैशेषिकोक्तपदार्थपक्षकानुमानोपन्यासः

ननु एते पदार्थाः तात्पर्यविषयमिथः संसर्गवन्तः आकाङ्क्षादिमत्पदस्मारितत्वात्, योग्यतासत्तिमत्त्वे सति संसर्गपरपदस्मारितत्वाद्वा, तात्पर्यविषयीभूतो यः परस्परसंसर्गः तद्वन्त इति साध्यम्। अत्र इदन्त्वाश्रयरजतादयः तात्पर्यविषयसंसर्गवन्तः इति साध्ये इदं रजतं न वेति संशयनिवर्तकज्ञानस्य न लाभः। इदं रजतसंसर्गवदित्याकारकनिश्चयस्यैव तादृशसंशयनिवर्तकत्वात्। अतः यत्र यस्य संसर्गबोधो वस्तुतः शब्दाज्जायते तं पक्षयित्वा तात्पर्यविषयीभूततत्संसर्गः साधनीयः इति लाभाय **मिथः** पदम्। तथा च इदं रजतमित्यादौ इदं रजतसंसर्गवद् इत्यादिक्रमेण साधनीयम्। रजतमानयेत्यादौ च कर्मत्वं रजतसंसर्गवत्, आनयनं रजतकर्मत्वसंसर्गवत्, कृतिः तात्पर्यविषयीभूतानयनसंसर्गवती इत्यादिक्रमेण साध्यं नानैव। समूहालम्बनरूपा चानुमितिः। आनयेत्यत्र यदा आनयनकृत्योः अनुकूलत्वसंसर्गे तात्पर्यं, तदा कृतिं पक्षीकृत्य आनयनसंसर्गसाधने कृतौ आनयनस्य यः विषयत्वरूपः संसर्गः तस्यापि सिद्धिर्मा भूदिति तात्पर्यविषयेति संसर्गविशेषणम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च तत्सिद्धौ क्षतिविरहः, उद्देश्यस्यानुकूलत्वसंसर्गज्ञानस्य वृत्तत्वात् 'अधिकं तु प्रविष्टं चेन्न तद्धानिकरमिति न्यायाद् इति वाच्यम् तर्हि तदानीं तन्मात्रविषयकबुद्धेरनुभवसिद्धायाः अनुमानादवृत्तत्वात् तदनुरोधेनैव शब्दस्य प्रमाणान्तरत्वापत्तेः।

तात्पर्यविषयत्वं च तत्पुरुषीया एतत्कालीना या एतद्दुभयपदजन्यसंसर्गप्रतीतीच्छा तद्विषयत्वम्। तेन संसर्गमात्रस्यैव पुरुषान्तरीयकालान्तरीयवाक्यान्तरजन्यप्रतीतीच्छाविषयत्वाद् अर्थान्तरमिति शङ्काया नावकाशः।

प्रथमहेतौ आकाङ्क्षादीत्यादिपदेन योग्यतापरिग्रहः।

साध्ये आकाङ्क्षानिरूपकत्वमपि संसर्गविशेषणं देयम्। इतरथा यदा कृत्यानयनयोरनुकूलत्वे समानकालिकत्वे च संसर्गे तात्पर्यं, तदा कृतौ आनयनस्य समानकालिकत्वसंसर्गस्यापि सिद्धिः स्यात्। आकाङ्क्षानिरूपकत्वं च एतत्पदद्वयाकाङ्क्षानिरूपकत्वं वाच्यम्। अन्यथा तस्यापि कुत्रचिदाकाङ्क्षानिरूपकत्वात्।

न च वैशेषिकैः शाब्दत्वजातेरनभ्युपगमाद् आकाङ्क्षानिरूपकत्वं दुर्वचमिति वाच्यम्। तैरपि शाब्दत्वजातिः अभ्युपेयत एव। परं तु सा जातिः उक्तानुमितिवृत्तिः अनुमितित्वव्याप्या इत्येवाभ्युपगमात्। स्मारितत्वसम्बन्धेन पदस्य हेतुत्वमभिप्रेतम्। अतः शब्दस्यानुमानता निर्वहति।

अत्र स्मारितत्वमात्रं घटपटयोरपीति रजतपदयोग्यतावत्पदस्मारितत्वमुक्तम्। रजतपदयोग्यतावत्त्वं च रजतपदार्थाबाधितार्थकत्वम्। यद् रजतपदार्थाबाधितार्थकयत्पदस्मारितं भवति तत् तत्पदद्वयतात्पर्यविषयीभूततत्पदद्वयनिष्ठाकाङ्क्षानिरूपकरजतसंसर्गवद् भवति, रजतेनेत्यादिवाक्यस्थटापदादिस्मारितरजतनिष्ठकरणत्वादिवदिति सामान्यमुखी व्याप्तिः

योग्यतासत्तिमत्त्वे सति संसर्गपरपदस्मारितत्वाद् इति द्वितीयो हेतुः। एतद्रजतपदयोग्यतासत्तिमत्त्वे सति रजतसंसर्गपर-एतदम्पपदस्मारितत्वाद् इति तदर्थः। यत् यद्रजतपदयोग्यतासत्तिमत्त्वे सति रजतसंसर्गपरयत्पदस्मारितं भवति तत् तत्पदद्वयतात्पर्यविषयीभूतसंसर्गवद् भवति, रजतेनेत्यादिवाक्यस्थटापदादिस्मारितरजतनिष्ठकरणत्वादिवदिति सामान्यमुखी व्याप्तिः। अतो नान्वयदृष्टान्तासिद्धिः।

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्र रजतमानयेत्यत्र अम्पदेन कर्मत्वत्वेन रूपेण स्मारिते घटनिष्ठकर्मत्वे व्यभिचारवारणाय रजतपदयोग्यतावत्त्वं विशेषणम्। रजतपदयोग्यता च रजतपदजन्यस्मृतिविशेष्याबाधितत्वम्।

तथापि वक्ता यत्र रजतसंसर्गप्रतीतीच्छया रजतमानय इति वाक्यं प्रयुक्तवान् श्रोता च लक्षणया रजतपदेन घटं स्मृतवान् अम्पदेन च घटनिष्ठकर्मत्वं स्मृतवान् तत्र घटनिष्ठकर्मत्वे व्यभिचार इति रजतपदासत्तिमत्त्वं विशेषणम्। तदर्थश्च रजतपदजन्यरजतमात्रविशेष्यकस्मृतिसमानकालिकस्मृतिविषयत्वम्। मात्रपदोपादानात् यत्र रजतमानयेत्यादिवाक्यस्य रजतपदेन रजतघटोभयविशेष्यकसमूहालम्बनस्मृतिर्जनिता तत्र घटनिष्ठकर्मत्वे न व्यभिचारः।

निस्तात्पर्यकेण घटादिसंसर्गतात्पर्यकेण वा रजतपदोत्तरामादिपदेन स्मारिते रजतकर्मत्वकरणत्वादौ व्यभिचारवारणाय रजतसंसर्गपरत्वप्रवेशः।

न चोक्तानुमानद्वयेऽपि अनाप्तेन करकाभिप्रायेण प्रयुक्ते पयसा सिञ्चति इति वाक्ये व्यभिचारः इति वाच्यम्। तत्र योग्यताविरहात्। योग्यता हि नाम बाधविरहः। तत्र च बाधसत्त्वात्।

न चैवं द्रवीभूतजलाभिप्रायेण प्रयुक्तं पयसा सिञ्चति इति वाक्यमपि प्रमाणं न स्यात्, करकारूपायोग्यार्थकत्वात्, न हि द्रवीभूत जलांशे योग्यार्थकत्वमादाय प्रामाण्यं तस्य वक्तुं शक्यम्, एकाकारवाक्ये योग्यत्वायोग्यत्वयोरसम्भवादिति वाच्यम्। विषयबाधसत्त्वासत्त्वाभ्याम् एकाकारेऽपि वाक्ये योग्यत्वायोग्यत्वयोरविरोधात्।

अवान्तरशङ्का, तत्परिहारश्च

अथ आकाङ्क्षा नाम न श्रोतुः जिज्ञासा, अजिज्ञासोरपि वाक्यार्थबोधात्। अपि तु जिज्ञासां प्रति योग्यता आकाङ्क्षा। जिज्ञासायोग्यता च श्रोतरि प्रकृतवाक्योत्पाद्यस्य संसर्गाविगमस्य प्रागभावः। एवं बाधकप्रमाविरहः = एकपदार्थेऽपरपदार्थसंसर्गाभावनिश्चयाभावः योग्यता। अव्यवहितसंसर्गप्रतियोगिज्ञानम्=एकसंसर्गप्रतियोगिविषयकज्ञानाव्यवहितअपपरसंसर्गप्रतियोगिविषयकोपस्थितिः आसत्तिः। एवंरूपाः आकाङ्क्षायोग्यतासत्तयः स्वरूपसत्य एव शाब्दधी हेतवः, न तु ज्ञाताः, गौरवात्, तासां ज्ञानाभावे अन्वयबोधाभावस्याभावाच्च।

Digitization by Arya Samaj Charitable Foundation, Chennai

तासां तिसृणामपि संसर्गज्ञानाधीनज्ञानतया पूर्वं ज्ञातुमशक्यत्वाच्च। एवं च स्वरूपसत्तया हेतूनां तासां ज्ञायमानलिङ्गविशेषणतया प्रवेशो न युक्त इति चेत्—

न। वस्तुतः योग्यतादिशून्यत्वेऽपि तद्भ्रमेण संसर्गप्रत्ययरूपः शाब्दबोधो जायते। अन्यथा = योग्यतादिभ्रमेण संसर्गप्रत्ययस्याभावे निराकाङ्क्ष-अनासन्न-अयोग्यवाक्यात् शाब्दभ्रमो न स्यात्। अतः आकाङ्क्षादयः नोक्तस्वरूपाः। अपि तु "तात्पर्यविशेषः आकाङ्क्षा", "पदाव्यवधानमासत्तिः", "तद्भावप्रमाविरहः, यत्र यस्य येन सम्बन्धेनान्वयः तत्र तेन संसर्गेण तद्वत्त्वं वा योग्यता। एतादृशमेव आकाङ्क्षादिकं लिङ्गविशेषणम्। तज्ज्ञानं च शाब्दबोधहेतुरिति।"

किं च राजा पुत्रमाकाङ्क्षति पुरुषं वेति संशये राजा पुरुषं नाकाङ्क्षति इति व्यतिरेकनिश्चये च "अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इति वाक्यात् पुरुषे राजान्वयधीः प्रतिवध्यते = न जायते। तथा च यत्संशययद्व्यतिरेकनिश्चयौ यदुत्पत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुरिति नियमबलेन आकाङ्क्षानिश्चयः कारणं शाब्दबोधं प्रति।

एवम् अव्यवधानसंशये तद्व्यतिरेकनिश्चये वा शाब्दबोधाभावात् तन्निर्णयोऽपि शाब्दबोधहेतुः। योग्यतायास्तु संशयनिश्चयसाधारणं ज्ञानसामान्यम् अन्वयबोधहेतुः अनुमितिहेतुश्च।

न च संशयसाधारणमित्ययुक्तम्, योग्यतानिश्चयस्य क्वचिदप्यसम्भवेन सर्वत्र तत्संशयस्यैव हेतुत्वादिति वाच्यम्। योग्यता हि बाधकपप्रमाविरहः पदभावविषयकप्रमाविरह इति यावत्। स च स्वगतः परगतश्च क्वचिन्निश्चीयते, यथा स्वस्य घटाभावनिश्चयः स्वगतयोग्यघटानुपलब्ध्या भवति, यद्यत्र घटः स्यात् तर्ह्युपलभ्येत, अनुपलब्ध्या तु घटो नास्तीति, ततः निश्चितेन घटाभावेन अन्यस्य घटप्रमाविरहो निश्चीयते।

क्वचिद् बाधकप्रमाविरहरूपयोग्यतासंशयेऽपि अन्वयबोधो भवत्येव। बाधसंशयस्य = तदभावसंशयस्य अप्रतिबन्धकत्वात्।

[ननु तथापि तदभावप्रभाविरहरूपायाः योग्यतायाः संशयसाधारणं ज्ञानमनुमितिहेतुरित्ययुक्तम्, तदभावप्रमाविरहसंशयदशायां तत्संसर्गानुमितेरसम्भवात्, तदभावप्रमाविरहसंशयसामग्रीदशायां तत्तदभावोभयकोटयुपस्थितिविशेषादर्शनादिसत्त्वेन तदभावसंशयसामग्र्या आवश्यकत्वात्

Digitization by Arya Samaj Charitable Foundation, Chennai

तदभावप्रमाविरहसंशयस्य तदभावसंशयात्मकत्वाद् तदभावज्ञानरूपप्रतिबन्धकस्य सत्त्वाद् इत्यत आह—**क्वचिदिति। प्रमेति।** तदभावप्रमेत्यर्थः। अन्वयबोधः-तत्संसर्गानुमितिः। **बाधसंशयस्येति।** तदभावसंशयस्येत्यर्थः। तदभावनिश्चयत्वेनैव प्रतिबन्धकत्वाद् इति भावः]

किं च नैयायिकमतेऽपि योग्यतादिकं प्रामाण्ये प्रयोजकम्। आप्तोक्तत्वस्य = भ्रमप्रमादविप्रलिप्साकरणापाटवात्मकदोषचतुष्टयाभाववदुक्तत्वस्य प्रामाण्यप्रयोजकत्वे गौरवात्। अनाप्तोक्तेऽपि संवादेन = विषयाबाधेन प्रामाण्याच्च।

एवं च=योग्यतायाः शाब्दप्रमाप्रयोजकत्वे च, ज्ञायमानकरणे प्रामाण्यप्रयोजकतया = ज्ञायमानकरणनिष्ठत्वे सति शाब्दप्रमाप्रयोजकतया, योग्यतादीनां ज्ञानमावश्यकम् = योग्यतादौ शाब्दबोधकारणीभूतं ज्ञानं विषयतासम्बन्धेनावश्यकम्, ज्ञाननिष्ठशाब्दज्ञानकारणतायां विषयतासम्बन्धेनावच्छेदकत्वमावश्यकमिति फलितोऽर्थः। तथा च योग्यतादिकं ज्ञाननिष्ठशाब्दज्ञानकारणतानिरूपितविषयतासम्बन्धावच्छिन्नावच्छेदकतावत् ज्ञायमानकरणनिष्ठत्वे सति शाब्दप्रमाप्रयोजकत्वात्, यत् ज्ञायमानकरणनिष्ठत्वे सति शाब्दप्रमाप्रयोजकत्वात्, यत् ज्ञायमानकरणनिष्ठत्वे सति यज्जातीयप्रमाप्रयोजकं तत् ज्ञाननिष्ठतज्जातीयज्ञानकारणतायां विषयतासम्बन्धेनावच्छेदकम्, यथा प्रमानुमितिप्रयोजकं व्याप्तिविशिष्टपक्षधर्मत्वमिति सामान्यमुखी व्याप्तिः। एवं च योग्यतादीनां ज्ञानं शाब्दप्रमां प्रति हेतुरिति सिद्धम्।

योग्यतादिज्ञानोपायश्च समभिव्याहारविशेषादिः। आदिपदेन श्रोत्रम् आप्तोपदेशश्च गृह्यते। तत्र समभिव्याहारविशेषः आकाङ्क्षाग्राहकः। आसत्तियोग्यताग्राहकौ श्रोत्राप्तोपदेशौ।

वैशेषिकोक्तसंसर्गानुमानदूषणम्

मैवम्। यत्र "विमलं जलं नद्याः, कच्छे महिषश्चरति" इति वक्त्रा उक्तम्, श्रोता च "विमलं जलम्" इत्यश्रुत्वैव "नद्याः कच्छे महिषश्चरति" इति शृणोति, तत्र आकाङ्क्षादिकमस्ति नदीकच्छयोस्तु तात्पर्यविषयः संसर्गो नास्ति। तथा च नदी कच्छयोः तात्पर्यविषयसंसर्गरूपसाध्याभावाद् आकाङ्क्षादिमत्पदस्मारितत्वरूपहेतुसत्त्वाच्च व्यभिचारः।

Digitization by Arya Samaj Charitable Foundation, Chennai

अत एव उक्तस्थले आकाङ्क्षादिसत्त्वेऽपि संसर्गप्रमायाः अनुत्पादादेव आकाङ्क्षादिमात्रं न प्रामाण्यप्रयोजकम्, अपि तु तात्पर्यमपि प्रयोजकम्।

अथ श्रूयमाणयावत्समभिव्याहृतेति लिङ्गविशेषणं दीयते, यावन्ति पदानि सहोच्चारितानि श्रूयमाणतावत्पदस्मारितत्वं हेतुः। अतो न व्यभिचारः। कतिपयपदस्मारितानां संसर्गप्रत्ययस्तु श्रूयमाणयावत्पदस्मारितत्वरूपलिङ्गभ्रमाद् इति चेत्—न। श्रूयमाणसमभिव्याहृतयावत्पदस्मारितत्वसंदेहेऽपि वाक्यार्थानुमितेर्जायमानतया न तस्य लिङ्गविशेषणत्वं युक्तम्, लिङ्गविशेषणस्य निश्चितस्यैवानुमापकत्वात्।

न च तादृशसंदेहस्थले न संसर्गज्ञानं जायते, अपि तु असंसर्गाग्रहमात्रमिति वाच्यम्। संसर्गग्रहे बाधकाभावात्। न च कारणबाध एव बाधक इति वाच्यम्। तस्य कारणत्वे मानाभावात्।

अथ उक्तस्थले व्यभिचारवारणाय आप्तोक्तत्वं लिङ्गविशेषणं दीयते, तदेववा (आप्तोक्तपदस्मारितत्वमेन वा) लिङ्गम्। आप्तोक्तत्वं च श्रूयमाणयावत् समभिव्याहृतपदकत्वे सति यथार्थज्ञानवदुक्तत्वम्। नदीकच्छयोः संसर्गे तु एतादृशाप्तोक्तपदसमारितत्वविरहान्न व्यभिचारः। आप्तोक्तत्वज्ञानं च शाब्दबोधं प्रति हेतुः। आप्तोक्तत्वज्ञानं शाब्दबोधात् पूर्वमावश्यकम्, यथा व्याप्तिमत्तया ज्ञायमानस्य लिङ्गस्यानुमितिहेतुत्वेन व्याप्तिज्ञानमनुमितेः पूर्वमावश्यकं तद्वत्। आप्तोक्तत्वावगमश्च लोके भ्रमाद्यमूलकत्वात्। आदिपदेन प्रमादविप्रलिप्साकरणापाटवानां परिग्रहः। वेदे स्मृतौ च आप्तोक्तत्वावगमः, माहाजनपरिग्रहद् इति चेत् —

मैवम्। यत्र कुत्रचिद्विषये आप्तत्वं = यथार्थज्ञानवत्वम् अनाप्तस्यापि प्रकृतवाक्यार्थगोचरययार्थज्ञानशून्यस्याप्यस्ति। तथा च तस्याव्यावर्तकतया आप्तोक्तत्वरूपे लिङ्गविशेषणे दत्तेऽपि व्यभिचारस्तदवस्थः। सर्वत्र आप्तत्वं सकलवाक्यार्थविषयकयथार्थज्ञानवत्त्वम् अप्रसिद्धम्। भ्रान्तेः पुरुषधर्थत्वात्।

अतः प्रकृतवाक्यार्थविषयकयथार्थज्ञानवत्त्वरूपमाप्तत्वं विवक्षणीयम्। तत्र वाक्यार्थज्ञानात् पूर्वं निश्चेतुमशक्यम्। उक्ताप्तत्वग्राहकस्य श्रमाद्यमूलकत्वप्रवृत्तिसाफल्यादेः पूर्वमज्ञानात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च यदि प्रवृत्तेरुत्तरकालमेव प्रवृत्तिसाफल्यग्रहः, तदा सफलप्रवृत्तिहेतुत्वेन हेतुना प्रामाण्यनिश्चयेऽन्योन्याश्रयः, प्रामाण्यनिश्चानन्तरमेव प्रवृत्तेरुत्पादसम्भवादिति वाच्यम्। प्रामाण्यसंदेहादपि प्रवृत्तेरुत्पादात्।

किं न हेतुज्ञानवेलायां साध्यस्याज्ञाततयापि आप्तत्वं दुर्निश्चयम्। तथा हि "प्रकृतसंसर्गेऽयमभ्रान्तः अथ वा यथार्थज्ञानवान्" इत्पाकारकाप्तत्वाज्ञानं संसर्गप्रतीतेः पूर्वं न भवितुमर्हति। संसर्गरूपस्य वाक्यार्थस्य पूर्वमज्ञाततत्वात्। तथा चाप्तोक्तत्वगर्भहेतुना संसर्गानुमानं न सम्भवति।

वयं तु ब्रूमः। बाधकप्रमाणाभावरूपा योग्यता लिङ्गविशेषणं न भवितुमर्हति। बाधकप्रमाणसामान्याभावस्य सर्वत्र निश्चेतुमशक्यत्वात्। तन्निश्ययाभावे च लिङ्गतावच्छेदकप्रकारलिङ्गनिश्चयाभावादनुमितिर्न स्यात्। किं च योग्यतासंशयेऽपि शब्दादन्वयबोधो जायते। योग्यतायाः लिङ्गयोग्यता संशयेऽपि शब्दान्वयबोधो जायते। योग्यतायाः लिङ्गविशेषणत्वे स कथं स्यात्। लिङ्गतावच्छेदकप्रकारकलिङ्गविशेष्यकनिश्चयस्यानुमितिहेतुत्वात्।

ननु भवन्मतेऽपि योग्यतासंशयदशायां कथं वाक्यार्थ बोधः, तन्निश्चयस्य शाब्दहेतुत्वाद् इति चेत् न। शब्दस्याति रिक्तप्रमाणतावादिनामस्माकं मते संशयनिश्चयसाधारणस्य योग्यताज्ञानस्यैव शाब्दबोधं प्रति हेतुत्वस्वीकारात्। अतः शब्दः प्रमाणान्तरम्।

न्यायकौस्तुभोक्तरीत्या शब्दस्यानुमानातिरिक्तत्वम्

व्याप्त्यदिज्ञानविरहदशायमपि शाब्दबोधस्यानुभविकतया तदानीमनुमितिसामग्र्यभावेनानुमित्यसम्भवात् शब्दस्य प्रमाणान्तरत्वमावश्यकम्।

यदि च शब्दस्य प्रमाणान्तरत्वे सर्वत्र शाब्दबोधजनकसामग्र्यन्तरकल्पने गौरवमिति सर्वत्र शाब्दबोधस्थले व्याव्यादिप्रतिसन्धानकल्पनमेव सम्यक्; तथा सति क्लृप्तसामग्र्यैवोपपत्तौ सामग्र्यन्तराकल्पनेन लाघवादिति विभाव्यते, तदापि न क्षतिः।

चैत्रवाक्यादयमर्थः श्रुतः इत्यादिव्यवहारविषयतया श्रुधात्वर्थशाब्दाख्यविलक्षणानुभवस्वीकरणस्यावश्यकतया तत्करणतया शब्दस्य प्रमाणान्तरत्वमाश्यकम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च श्रुधातोरनुमित्यर्थकतया श्रुत इति व्यवहारमात्रेण न विलक्षणानुभवसिद्धिः। कुतस्तत्करणतया शब्दस्य प्रमाणान्तरत्वमिति वाच्यत्। तथा सति पर्वतो वह्निमानित्यनुमित्यनन्तरं पर्वते वह्निः श्रुतः इत्यादिव्यवहारापत्तेः।

न च शब्दहेतुकानुमितेः श्रुधात्वर्थत्वोपगमान्नोक्तापत्तिरिति वाच्यम्। तथापि यत्र शब्दहेतुना आकारो आकाशपदशक्यत्वमनुमितम् आकाशः आकाशपदशक्यः शब्दवत्त्वादिति, तत्र "आकाशे आकाशपदशक्यत्वमनुमितम्" इति व्यवहारवद् "आकाशे आकाशपदशक्यत्वं श्रुतम्" इति व्यवहारस्य दुर्वारत्वात्।

न च स्मारितत्वसम्बन्धेन शब्दहेतुकानुमितेः श्रुधात्वर्थत्वान्नोक्तदोषः, उक्तस्थले समवायेन शब्दस्य हेतुत्वात्; प्रकृते च एते पदार्थाः मिथः संसर्गवन्तः स्मारितत्वसम्बन्धेन कदम्बवत्त्वाद् इति स्मारिततवसम्बन्धेन शब्दस्य हेतुत्वात् श्रुतत्वव्यवहारोपपत्तिरिति वाच्यम्। एवमपि आकाङ्क्षादिज्ञानविरहदशायां यत्र स्मारितत्वसम्बन्धेन शब्दहेतुकानुमितिः तत्र श्रुतत्वव्यवहारापत्तेर्दुर्वारत्वात्।

न च नैयायिकसिद्धशाब्दसामग्रीसमवधानाव्यवहितोत्तरानुमितेः श्रुधात्वर्थत्वान्न दोष इति वाच्यम्। तादृशसामग्रथाद्यप्रतिसन्धाने श्रुत इति व्यवहारानुपपत्तेः। अनन्तायाः शब्दार्थभेदभिन्नसामग्र्याः अननुगमेन श्रुधातुशक्तिग्रहानुपपत्तेश्च।

तस्मात् "चैत्रवाक्यादयमर्थः श्रुतः" इति व्यवहारानुरोधेन शाब्दाख्यविलक्षणप्रमितेः सिद्ध्या शब्दः प्रमाणान्तरम्।

वस्तुतस्तु शब्दाद् अर्थज्ञानान्तरं 'नानुमिनोमि' इत्यनुव्यवसायानुरोधेन शाब्दज्ञानस्यानुमितिरूपत्वं न सम्भवति।

नागेशोक्तरीतिः

लघुमञ्जूषायां नागेशेन शब्दस्यानुमानातिरिक्तत्वं प्रसङ्गवशादेवं साधितम् (पृ.५९-६०)

न च शब्दार्थयोस्तादात्म्यस्वीकारे समव्याप्ततया शब्दाद् अनुमानमेव स्यादर्थस्येति प्रमाणान्तरत्वभङ्गः इति वाच्यम्। पक्षधर्मताज्ञानाद्यनपेक्षतया तस्य प्रमाणान्तरत्वात्। सिद्धिसत्त्वे इच्छां विनापि बोधदर्शनाच्च। पर्वते वह्निनिश्चयोत्तरं पर्वते वह्न्यनुमितिः जायताम् इतीच्छयैवानुमितिर्भवति, शाब्दबोधस्तु निश्चयसत्त्वेऽपि इच्छां विनैव भवतीति वैषम्यात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

किं च व्याप्तिस्मरणादिकं विना पदमात्रात् पदार्थप्रत्ययस्य जायमानस्य अनुमितित्वं न सम्भवति। पदेभ्यः स्मृतिरेवेति तु न युक्तम्, तत्ताया अनुल्लेखात्। वाक्यादपि स्मृत्यापत्तेश्च।

किं च शाब्दयामीत्यनुव्यवसायान्न स्मृतित्वमनुमितित्वं वा वाक्यजन्यज्ञानस्य। किं च शाब्दयामीत्यनुव्यवसायप्रयोजिकायाः शाब्दत्वजातेः तदवच्छिन्नं प्रति आकाङ्क्षादिज्ञानहेतुत्वस्य च कल्पनायाः आवश्यकत्वे तद्वति स्मृतित्वादिकल्पनायां गौरवम्।

किं च सिद्धिसत्त्वेऽपि शाब्दबोधोत्पत्त्या अनुमितेश्चानुसत्त्या सिद्धिप्रतिबध्यातावच्छेदककोटौ शाब्दातिरिक्तत्वविशेषणेन गौरवम्। न च तत्र सिद्धिनाशानन्तरमेवानुमितिरिरिति वाच्यम्। अनुभवविरोधात्। प्रतिबन्धकस्थले सर्वत्र प्रतिबन्धकनाशानन्तरं कार्यमित्यापत्तेश्च।

अपि च शाब्दबोधोत्तरं नानुमिनोमीत्यनुव्यवसायात् न शाब्दत्वमनुमितित्वव्याप्यम्। न च तस्य व्याप्त्यादिज्ञानघटितसामग्रीजन्यानुमितित्वावच्छिन्नाभावविषयकत्वान्न दोष इति वाच्यम्। व्याप्त्यदिप्रतिसन्धानविरहदशायामपि तस्य उत्पत्त्या तद्विषयकत्वासम्भवात् — इति।

नव्यनैयायिकरीत्या शाब्दप्रमितेः
अनुमितिविलक्षणत्वं शब्दस्य प्रमाणान्तरत्वं च

शाब्दबोधस्तावत् "शब्दादमुमर्थं प्रत्येमि" इति प्रतीतिसिद्धानुभवत्वसाक्षाद्व्याप्यशाब्दत्वजात्याश्रयः प्रत्यक्षादिप्रमितिभ्यो विलक्षणः।

नन्वस्तु विदितपद-पदार्थसंगतीनां समधिगतशाब्दन्यायतत्त्वानाम् आकाङ्क्षा-संनिधि-योग्यताद्यनुसन्धानवतां निष्प्रत्यूहं संसर्गबोधोदयः। सिध्यतु च पदज्ञानजन्यतावच्छेदकतया शाब्दत्वं जातिरपि। परं तु तत्र सविकल्पकत्वादाविव प्रत्यक्षत्वव्याप्यत्वम् अनुमितित्वव्याप्यत्वं किमिति नाङ्गीक्रियते। तथा सति हि समानविषयकशाब्दबोधं प्रति प्रत्यक्षसामग्रीत्वेन प्रतिबन्धकत्वस्याकल्पनात् लाधवम्। समानविषयकानुमितित्वावच्छिन्नं प्रति प्रत्यक्षसामग्र्याः क्लृप्तया प्रतिबन्धकतयैव निर्वाहात्। सति चैवमेकस्यामेव व्यक्तौ शाब्दत्वानुमितित्वयोः व्याप्यव्यापकभावापन्नयोः समावेशात् समानविषयकशाब्दत्वाव-

Digitization by Arya Samaj Charitable Foundation, Chennai

च्छिन्नं प्रति अनुमितिसामग्रीत्वेन प्रतिबन्धकत्वान्तरमपि न कल्पनीयमिति महल्लाघवम्।

अथ शाब्दबोधस्यानुमितित्वोपगमे व्याप्तिज्ञानाद्यखिलानुमितिकारणधटिता आकाङ्क्षाज्ञानादिघटिता च शाब्दसामग्री वाच्या। तथा च विभिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्रीत्वेन या प्रतिबन्धकता तदवच्छेककोटौ व्याप्तिज्ञानादीनामपि प्रवेशेन साम्रीत्ववस्य च एककारणविशिष्टापरकारणरूपतया तेषां विशेष्यविशेषणभावे विनिगमनाविरहेण च विपरीतमेव गौरवमिति चेत् — मैवम्। यथा हि अनुमितिसामग्र्याः लिङ्गभेदेन अन्वयव्यतिरेकव्याप्तिभेदेन च भिन्नतया तद्धटककारणानां व्याप्तिज्ञानादीनामेकरूपेण कारणताविरहेण परस्परजन्यानुमितौ व्यभिचारः। तद्वारणाय तत्तदव्यवहितोत्तरत्वमात्रस्य कार्यतावच्छेदककोटौ प्रवेशेऽपि इष्टवह्निमत्पर्वतादिविषयकानुमितित्वेन प्रयोजनत्वादिप्रतिसन्धाने अनुमितित्वावच्छिन्ननिरूपितसाधनतादिज्ञानस्यैवापेक्षिततया अनुमितित्वादीनां कार्यतान्वच्छेदकत्वे उक्तेष्टसाधनतादिज्ञानसम्भवात् तदर्थमवयववाक्यप्रयोगो नोपपद्येत। अतः कारणवैजात्येऽपि सर्वेषु तथाविधज्ञानेषु अनुमितित्वमनुभवबलादास्थीयते, यथा वा अनुमीतित्वावच्छिन्नं प्रति अभावज्ञानत्वेन सामान्यकार्यकारणभावम् अतिप्रसङ्गभङ्गाय विशेषसामग्र्याः सहकारित्वं च उपेत्य व्याप्तिसामान्यस्याभावघटितत्वेन तज्ज्ञानस्यानुमितिस्थले सर्वत्र सम्भवात् सर्वास्वनुमितिव्यक्तिषु अनुमितित्वमूरीक्रियते, तथा तत्तदाकाङ्क्षाज्ञानाद्यव्यवहितोत्तरत्वस्य कार्यतावच्छेदकतया प्रवेशेऽपि प्रवृत्त्युपपत्तये विषयविशेषमनुमितित्वं च प्रवेश्य व्याप्तिज्ञानाद्यघटितया आकाङ्क्षाज्ञानादिघटितक्लृप्यसमाग्र्यैव शाब्दात्मकानुमित्युत्पत्तिसम्भवात्।

अपि चाकाङ्क्षाया एकपदाव्यवहितोत्तरापरपदत्वरूपतया अव्यवहितोत्तरत्वस्य च तत्क्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति तत्क्षणध्वंसाधिकरणत्वरूपतया अभावधटितत्वेन आकाङ्क्षाज्ञानस्याभावविषयकत्वेन अनुमितिसामान्यकारणस्यापि शाब्दस्थले सत्त्वेन तत्रैव आकाङ्क्षा ज्ञानादिविशेषसामग्रीसहकारित्वोपगमेन व्याप्तिज्ञानाद्यजन्यत्वेऽपि शाब्दबोधस्यानुमितित्वसम्भवात् प्रतिबन्धकताच्छेदककोटौ व्याप्तिज्ञानादेरधिकस्य अप्रवेशेन लाघवस्यानपायादिति चेत् —

Digitization by Arya Samaj Charitable Foundation, Chennai

न। एवमेव विनिगमनाविरहेण अनुमितेरपि शाब्देऽन्तर्भावयितुं शक्यत्वात्। अनुमितेरपि शाब्दत्ववोपगमे समानविषयकानुमितित्वावच्छिन्नं प्रति प्रत्यक्षसामग्रीत्वेन प्रतिबन्धकत्वं न कल्पनीयम्। समानविषयकशाब्दत्वावच्छिन्नं प्रति प्रत्यक्षसामग्रीत्वेन क्लृप्तप्रतिबन्धकतयैव निर्वाहात्।

नापि समानविषयकशाब्दत्वावच्छिन्नं प्रति अनुमितिसामग्रीत्वेन प्रतिबन्धकत्वं कल्पनीयम्। एकस्मिन्नेव ज्ञाने उभयधर्मवत्त्वस्य उभयसामग्रीजन्यंत्वस्य चोपगमेनानुपपत्तिविरहात्।

न च पदज्ञानादिकं विनानुमित्यनुपपत्तिः विभिन्नविषयकप्रत्यक्षं प्रति या अनुमितिसाम्रीनिष्ठप्रतिबन्धकता तदवच्छेदककोटौ आकाङ्क्षाज्ञानादेरपि प्रवेशेन महागौरवं च इति वाच्यम्। शाब्दसामान्ये ज्ञानत्वेन कारणतां विशेषसामग्र्याः सहकारितां चोपगम्य आकाङ्क्षाज्ञानाद्यघटिता अनुमितिकारणत्वेन सम्प्रतिपन्न-व्याप्त्यादिज्ञानादिना घटितैव अनुमित्यात्मकशाब्दसामग्री वाच्या। केवलशाब्द-सामग्री च आकाङ्क्षाज्ञानादिघटितैव वाच्येत्यपि वक्तुं शक्यतया पूर्ववत् सर्वदोषपरिहारस्य तुलयत्वात्।

नन्वनुमितेः शाब्दत्वे शाब्दयामीत्यनुभावापत्तिरिति चेत् — शाब्दस्यानुमितित्वेऽपि अनुमिनोमीत्यनुभवापत्तिरिति चेत् — शाब्दस्यानुमितित्वेऽपि अनुमिनोमीत्यनुभवापत्तिस्तुल्यैव।

शाब्दान्यानुमितिरेव अनुमिनोमीत्यनुव्यवायहेतुरिति चेत् — अनुमित्यन्य-शाब्दमेव शाब्दयामीत्यनुव्यवसायहेतुरित्यपि तुल्यमेव।

व्याप्तिज्ञानादिकार्यनावच्छेदककोटौ शाब्दत्वाप्रवेशात् अनुमितौ शाब्दत्वासम्भव इति चेत् — आकाङ्क्षाज्ञानादिकार्यतावच्छेदककोटावपि अनुमितित्वाप्रवेशात् शाब्दयानुमितित्वासम्भव इत्यादि सामनम्।

यदि च न शाब्दयामीत्यनुभवान्नानुमितेः शाब्दत्वम्, तदा नानुमिनोमीत्यनुभवान्न शाब्दस्बुद्धेरनुमितित्वमित्यपि तुल्यम्।

तस्मान्न शाब्दमतिरनुमितिः, न वा अनुमितिः शाब्दमतिः, न वा शाब्दत्वानुमितित्वे व्याप्यव्यापकभावापन्ने इति सिद्धम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथैवमपि प्रत्यक्षत्वमेव शाब्दे कुतो नोपेयते, लौकिकसन्निकर्षाभावेऽपि ज्ञानलक्षणप्रत्यासत्तेः सम्भवात्। शाब्दमात्रे पदार्थोपस्थितेः तदात्मिकायाः सत्त्वात्।

न च ज्ञानलक्षणा प्रत्यासत्तिः स्वविषयविषयकमेव प्रत्यक्षं जनयतीति शाब्दमतौ अपूर्वव्यक्तिभानमनया अशक्यमिति वाच्यम्। नीलत्वादिज्ञानरूपया सामान्यलक्षणप्रत्यासत्त्या अपूर्वस्यापि भानोपपत्तेः।

सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारपक्षे न प्रत्यक्षत्वसम्भव इति चेत् — सन्निकर्षाजन्यत्वेऽपीश्वरज्ञानस्येव शाब्दबोधस्यापि प्रत्यक्षत्वसम्भवात्।

ज्ञानाकरणकज्ञानत्वमीश्वरज्ञाने प्रत्यक्षत्वप्रयोजकम्, शाब्दमतौ तु पदज्ञानकरणकत्वान्न प्रत्यक्षत्वसम्भव इति चेत् — ज्ञानसामन्ये मनसः करणत्वपक्षे पदज्ञानादेरकरणत्वात् शाब्दमतेरपि ज्ञानाकरणत्वेन प्रत्यक्षत्वं दुरपह्नवम्।

शाब्दबुद्धौ प्रत्यक्षत्वोपगमे चाक्षुषत्वादिजात्या शाब्दत्वे सांकर्यप्रसङ्ग इति चेत् — चाक्षुषत्वादिव्यावृत्तव्यक्तिष्वेव शाब्दत्वस्वीकारे तदसम्भवात्। मानसत्वेन सांकर्यमिति चेत् — शाब्दत्वे मानसत्वव्याप्यत्वस्वीकारे तदसम्भवात्, मानसत्वं विहाय शाब्दत्वस्य कुत्राप्यसत्त्वात्।

अत एव न शाब्दयामीसनुभवानुपपत्तिः शाब्दबोधस्य अतिरिक्तत्वपक्षे एव एतत्पक्षेऽपि तावतीष्वेव व्यक्तिषु शाब्दत्वजातेः स्वीकारात्।

न च नीलो घट इत्यादिवाक्यजन्यबोधानन्तरं नीलं घटं साक्षात्करोमीति अनुभवापत्तिः। यदंशे लौकिकः सन्निकर्षः तदंशे एव साक्षात्करोमीत्यनुभवस्य स्वीकृतत्वात्।

न च लौकिककसन्निकर्षाभावेऽपि मण्डूकवसाञ्जनरञ्जितनयनस्य पुंसः वंशोरगविभ्रमोत्तरम् 'उरगं साक्षात्करोमि' इत्यनुभवानुपपत्तिः, तत्रोरगस्य अलौकिक्या ज्ञानलक्षणप्रत्यासत्त्या भानादिति वाच्यम्। लौकिकसान्निकर्षस्थल इव दोषविशेषजन्यविभ्रमस्थलेऽपि साक्षात्करोमीत्यनुभवस्योपगतत्वादिति।

ननु शाब्दत्वजातिं शाब्दबोधं तत्कारणाकाङ्क्षाज्ञानादिकं चोपगच्छतः शाब्दमतौ प्रत्यक्षत्वमभ्युपगच्छतस्तवैव किं लाघवम् इति चेत् — श्रूयताम्। विशेष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वमविवादम्। तत्र अस्माभिर्लाघवान्वेषिभिः अनुमितेरप्युक्तयुक्तिनिवहेन अनुमितित्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

व्यापकं मानसत्वमेवाङ्गीकरणीयम्। तथा च विशिष्टवैशिष्ट्यावगाहिस्मृतेः विशेषणतावच्छेदकप्रकारकज्ञानविरहेऽपि जायमानतया तत्साधारणं विशिष्टवैशिष्ट्यावगाहिबुद्धित्वं न कार्यतावच्छेदकम्। किं तु तादृशप्रत्यक्षत्वमेव। तथा च शाब्दानुमित्योः प्रत्यक्षत्वानुपगमे तथाविधशब्दत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य पृथक् कारणत्वं कल्पनीयम्। एवं तथाविधानुमितित्वावच्छिन्नं प्रत्यपीति गौरवम्। स्मृत्यन्य-विशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य कार्यतावच्छेदकत्वे तथाविधानेककार्यकारणभावाकल्पपि स्मृतन्यत्व-तथाविधज्ञानत्वयोः परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेण स्मृत्यन्यत्वविशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य च कार्यतावच्छेदकत्वं कल्पनीयमिति गुरुधर्मावच्छिन्नकार्यताद्वयापत्तिः।

यदि च विशिष्टवैशिष्ट्यावगाहयनुभवत्वमेव कार्यतावच्छेदकम्। तावतैव समृतेर्वारणं, शाब्दबोधादेः सङ्ग्रहश्चेत्युच्यते, तदापि प्रत्यक्षत्वातिरिक्तनुभवत्वजातौ प्रमाणाभावेनास्मदिष्टसिद्धिरिति चेत् —

अत्राहुः। विभिन्न विषयकप्रत्यक्षं प्रति शाब्दसामग्र्याः अनुमितिसामग्र्याश्च प्रतिबन्धकतया शाब्दबोधादेः प्रत्यक्षत्वोपगमे नीलो घट इति शाब्दसामग्र्या पीतः पट इति शाब्दसामग्र्यां च सत्यां समूहालम्बनशाब्दबाधानुपपत्तिः। नीलघटविषयकशाब्दसामग्र्याः पीतपटात्मकविभिन्नविषयकशाब्दरूपप्रत्यक्षं प्रति प्रतिबन्धकत्वात् पीतपटविषयकशाब्दसामग्र्याः नीलघटशाब्दात्मकप्रत्यक्षप्रतिबन्धकत्वाश्चेति। एवमेव चानुमितेरपि समूहालम्बनत्वानुपपत्तिरूह्या।

यदि च शाब्दभिन्नविभिन्नविषयकप्रत्यक्षत्वं प्रतिबध्यतावच्छदकम् एवमनुमितिभिन्न विभिन्न विषयकप्रत्यक्षत्वं प्रतिबध्यताच्छदकम् एवमनुमितिभिन्न-भिन्नविषयकप्रत्यक्षत्वं प्रतिबध्यतावच्छेदकमित्युच्यते, तदा शाब्दभिन्नत्वदेर्विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुधर्मावच्छिन्नानेक प्रतिबध्यतापत्तिः।

तस्मात् शाब्दमतिः न प्रत्यक्षं न वा अनुमतिः अपि तु तद्विलक्षणेति तत्करणं शब्दप्रमाणान्तरमिति सिद्धम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्रेदं तत्त्वम् — शाब्दबोधस्य प्रमान्तरत्वास्वीकारे शाब्दबोधानन्तरं जायमाने "अहममुमर्थं शृणोमि, शाब्दयामि" इति अनुव्यवसाये या विलक्षणा शाब्दबाधरूपा प्रमा भासते तस्याः अपलापः वैशेषिकैरपि कर्तुमशक्य एव। तथा च तादृशानुव्यवसाय रूपानुभवबलात् शाब्दबोधरूपायाः प्रमायाः सिद्धौ सत्यां तत्करणस्य शब्दस्य प्रमाणान्तरत्वमवश्यमेवाभ्युपेयम्। अन्यथा शाब्दप्रमायाः आकस्मिकत्वमापद्येत। अनुमितिसामग्र्याः शाब्दप्रयोजकत्वे च धूमादिलिङ्गकानुमितिस्थलेऽपि 'शाब्दयामि' इत्यनुव्यसायापत्तिः।

यदि च शाब्दत्वेऽनुमितित्वव्याप्यत्वं स्वीकृत्य आकाङ्क्षाज्ञानादिघटितानुमितिसामग्री 'शाब्दयामि' इत्यनुव्यवसायप्रयोजिकेत्युच्यते तदापि अनुमितिस्थले "न शाब्दयामि किं त्वनुमिनोमि" इत्यनुभवबलात् यथा अनुमितौ न शाब्दत्वम्। अत एवानुमितित्वं न शाब्दत्वव्याप्यमित्युच्यते, तथैव शाब्दबोधस्थले "नानुमिनोमि अपि तु शाब्दयामि" इत्यनुभवबालात् शाब्दत्वं नानुमितित्वव्याप्यम् इति स्वीकरणीयम्। इति।

शब्दशक्ति प्रकाशिकोक्तरितिः (पृ.७)

शब्दशक्तिप्रकाशिकायां जगदीशतर्कालङ्कारास्तु

साकाङ्क्षशब्दैर्यो बोधः तदर्थान्वयगोचरः।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा॥

आकाङ्क्षायोग्यतासत्तिविशिष्टपदप्रयोज्यः यः तत्तदर्थसंसर्गावगाही बोधः अनुभवो जायते सः नियन्त्रितार्थत्वात् — तादृशपदोपस्थाप्यस्यैवार्थस्यावगाहित्वात् न प्रत्यक्षं न वा अनुमितिः। तथाहि — अस्ति तावद् गौरस्ति, गामानयेत्यादिसाकाङ्क्षशब्देभ्यः स्वस्ववृत्त्या पदार्थानामुपस्थित्यनन्तरं गवादौ अस्तित्वादेः अन्वयावगाही विलक्षणो बोधः। तादृशबोधं प्रति आकाङ्क्षादिविशिष्टशब्दज्ञानं हेतुः, तादृशज्ञानसत्त्वे शाब्दबोधः तदभावे तदभाव इत्यन्वयव्यतिरेकवशात्। न तु असंसर्गाग्रहसहितं पदार्थानामुपस्थितिमात्रं हेतुः। अस्तित्वादिविशिष्टगवादिबुद्धेः अस्तित्वेन गां जानामीत्याकारकानुव्यवसायसाक्षिकत्वात्। अन्यथा विशिष्टज्ञानानुभवस्यास्वीकारे पर्वतो वह्निमानिति विशिष्टमतिरूपानुमितेरप्यपलापापत्तेः। तत्रापि पर्वतं वह्निमत्तयानुमिनोमीत्यनुव्यवसास्यापह्नोतुं शक्यत्वात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च गौरस्तीति वाक्यजन्या विशिष्टबुद्धिः स्मृतिरूपेति वाच्यम्। समानाकारकसंस्काराजन्यत्वात्। तद्धर्मिकतद्वत्तास्मरणं प्रति तद्धर्मिकतद्वत्तासंस्कारस्य हेतुत्वात् तस्य च तादृशबोधात् पूर्वं नियमतः सत्त्वे प्रमाणाभावात्।

न च सा विशिष्टबुद्धिः उपस्थित्यात्मकज्ञानलक्षणाप्रत्यासत्तिजन्यप्रत्यक्षरूपेति वाच्यम्। साकाङ्क्षपदेनैव अनुमानादिना उपस्थितस्यायर्थस्य उपनयमर्यादया तत्र भानापत्तेः। न चेष्टापत्तिः, अनुभवविरोधात्। पदोपस्थाप्यार्थावगाहिताया एवानुभवसिद्धत्वात्। तदुत्तरं प्रकारान्तरेणोपस्थितार्थविषयकतयानुव्यवसायापत्तेश्च। तत्तदर्थविषयकत्वेन शाब्दबोधविषयकानुव्यवसायं प्रति ब्रत्तदर्थसाकाङ्क्षदजन्यतद्गोचरशाब्दत्वेन विषयविधया हेतुत्वकल्पनेऽतिगौरवात्। जलाहरणं न छिद्रघटकरणकम् इत्येवमितरबाधदशायां 'घटेन जलमाहरेत्' इति व्राक्यजन्यस्य छिद्रान्यघटेन जलमाहरेद् इत्यन्वयबोधस्य पदाजन्यच्छिद्रेतरत्वविषयकत्वेन अनुव्यवसायोत्पत्तया व्यतिरेकव्यभिचारात् पदजन्यतद्विषयकशाब्दत्वेन विषयविधया हेतुत्वकल्पनाया असम्भवाच्च। अपि च शाब्दबोधस्योपनीतभानात्मकत्वाङ्गीकारे उपनीतयोः प्रत्यक्षे विशेषणविशेष्यभावस्य कामचाराद् गवादावस्तित्वादेरिव अस्तित्वादावपि गवादेर्भानप्रसङ्गः।

अत एव = शाब्दमतेः पदोपस्थाप्यार्थमात्रविषयकत्वादेव नानुमितित्वम्। पूर्वपरापृष्टवस्तुमात्रस्य असतिबाधके शाब्दधीविषयत्वापत्तेः।

न च तत्तदर्थविषयकशाब्दबोधं प्रति साकाङ्क्षपदजन्मतत्तदर्थविषयकस्मृतेः कारणत्वकल्पनात् न पूर्वोक्तदोष इति वाच्यम्। एवमपि पदार्थानामन्वयधीदशायाम् अपदार्थानामपि प्रत्यक्षानुमितिसामग्रीबलेन प्रत्यक्षानुमित्योरन्यतरप्रसङ्गस्य दुर्वारत्वात्।

न च शाब्दबोधसामग्र्याः प्रत्यक्षानुमितित्वावच्छिन्नप्रतिबन्धकत्वाङ्गीकारन्न शाब्ददशायां प्रत्यक्षापत्तिरिति वाच्यम्। एवमपि शाब्दधियः प्रत्यक्षत्वाभ्युपगमे प्रत्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रत्यक्षत्वं न सम्भवति, स्वं प्रति स्वसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमिति गौरवम्, प्रतिबध्यतावच्छेदके शाब्दान्यत्वप्रवेशात्। अतः शाब्दधियः प्रत्यक्षभिन्नत्वकल्पनमेव युक्तम्। उपनयोऽपि न प्रत्यक्षत्वावच्छिन्नहेतुः। अपि तु तत्प्रकारकानुभवत्वावच्छिन्नहेतुः।

लिङ्गजन्यत्वेन शाब्दबुद्धेरनुमितित्वामाशङ्क्य निरस्यति —

Digitization by Arya Samaj Charitable Foundation, Chennai

योग्यतार्थगताकाङ्क्षा शब्दनिष्ठानुभाविका।
प्रत्येकं वा मिलित्वा नैते लिङ्गमसिद्धितः ॥ ४ ॥

अर्थगता बाधाभावरूपा योग्यता शब्दगता चानुपूर्वीरूपा आकाङ्क्षा शाब्दबोधरूपानुभवजनिका। ते उभे प्रत्येकं वा मिलित्वा वा शाब्दबोधे लिङ्गे न भवतः। असिद्धत्वाद् इति कारिकार्थः। एतदुक्तं भवति — बाधनिश्चयदशायां शाब्दबोधवारणाय योग्यतानिश्चयस्य हेतुत्वं स्वीक्रियते, योग्यतानिश्चस्य बाधज्ञानप्रतिबन्धकत्वाद् योग्यतानिश्चयसत्त्वे बाधनिश्चय एव न सम्भवति, बाधनिश्चयत्त्वे च योग्यतानिश्चयरूपकारणाभावान्न शाब्दबोध इति योग्यतानिश्चयहेतुत्ववादिनामाशयः। स न संगच्छते ; विशिष्टबुद्धिसामान्यं प्रति बाधनिश्चयकाले शाब्दबोधवारणसम्भवात् योग्यतानिश्चस्य शाब्दबोध हेतुताकल्पने प्रयोजनाभावात्। तथा च योग्यतारूप लिङ्गनिश्चयाधीना शाब्दबोधात्मिका अनुमितिरिति न वक्तुं शक्यते। किं च योग्यतामात्रलिङ्गकसंसर्गानुमितेः शाब्दबुद्धित्वस्वीकारे घटः कर्मत्वामानयनं कृतिः इत्यादिस्थलीयस्य संसर्गानुमानस्यापि शाब्दबुद्धित्वप्रसङ्गः। किं च योग्यतासंशयस्थलेऽप्यन्वयबुद्धेरानुभविकत्वेन संशयनिश्चयसाधारणयोग्यताज्ञानत्वेनैव शाब्दबोधं प्रति हेतुता। अनुमितौ तु हेतुमत्तानिश्चयस्यैव हेतुत्वाद् योग्यतासंशयस्थलीयान्वयबुद्धौ अनुमितित्वकल्पनं न सम्भवति।

आकाङ्क्षा तु न लिङ्गम्। गौरस्तितावान् आकाङ्क्षावत्त्वादित्यनुमाने शब्दनिष्ठायाः आकाङ्क्षायाः गोरूपपक्षावृत्तितया स्वरूपासिद्धत्वाद् इति।

अत्र नव्यवैशेषिकाः — गौः अस्तितावान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितः सः अस्तितावान् इति सामान्यमुखी व्याप्तिः। यद्वा गौः अस्तितावान् अस्तिपदसमभिव्याहृतगौः पदस्मारितत्वात् चक्षुर्वत्। अत्र विशेषव्याप्तिः। "दिङ्नेत्रघृणिभूजल' इति कोशाच्चक्षुषोऽपि गोपदस्मारितत्वात्। न चात्रासिद्धिः शङ्कनीया। पदानामेकवाक्यतापन्नत्वरूपसमभिव्याहृतत्वनिश्चयं विना न्यायमतेऽप्यन्वयबोधस्यानुत्पत्त्या पूर्वं तन्निश्चयस्यावश्यकत्वादित्याहुः।

तन्न। गवादौ पदस्मारितत्वाज्ञानकाले उत्पन्नस्य गौरस्तिवान् इत्यन्वयबोधस्य अनुमितित्वदौर्घट्यात्। अनुमितौ हि पदस्मारितत्वरूपहेतुज्ञानमपेक्षितम्। पदस्मारितत्वाज्ञानकाले पदस्मारितत्वज्ञानं हि दुर्लभम्। न हि पदजन्या पदार्थ-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्मृतिः ज्ञाता सती शाब्दबोधहेतुः, येन पदस्मारितत्वाज्ञानदशायां शाब्दबोध एव न जायत इति वक्तुं शक्यते। किं तु स्वरूपसती पदार्थस्मृतिः शाब्दबोधहेतुः।

किं च पदैरस्मारितस्यापि पदार्थस्य पदस्मारित्वभ्रमदशायां अन्वयबोधप्रसङ्गः, हेतुज्ञानसद्भवात्।

एतेन गौः पदमस्तित्ववद्गोविषयकज्ञानपूर्वकम् अस्तिपदसाकाङ्गौःपदत्वात् यन्नैवं तन्नैवम् इति पदपक्षकानुमानमपि कणादमतानुसारिभिरुक्तं निरस्तं वेदिव्यम्। उक्तज्ञानपूर्वकत्वाभावनिश्चयदशायामुत्पनस्य गौरस्तितावानित्यन्वयबोधस्योक्तानुमानतोऽनिर्वाहात्। अनुमितौ हि साध्यहेतुविषयकपरामर्शोऽपेक्षितः।

अपि च वाक्यार्थस्यापूर्वत्वेन तद्गर्भसाध्यस्य पूर्वमनुपस्थित्या अनुमानं न सम्भवति।

वस्तुतस्तु — वाक्यार्थबोधस्यानुमितित्वे सत्येव साकाङ्क्षपदत्वादिलिङ्गकत्वं कल्पनीयम्। तदेव त्वसिद्धम्, प्रमाणाभावात्। "अस्तित्वेन गामनुमिनोमि" इत्यनुव्यवसायस्य तत्रासत्त्वात्। प्रत्युत "गौरस्तीति वाक्याद् अस्तित्वेन गौः श्रुतः न त्वनुमितः" इत्यनुभवाद् अनुमितित्वविलक्षणशाब्दत्वावच्छिन्नं ज्ञानं सिद्ध्यति "श्रोतव्यो मन्तव्यः" इति श्रुत्या अनुमितित्वासमानाधिकरणशाब्दत्वजात्यवच्छिन्नज्ञाने श्रुधातोः शक्त्यवधारणात्।

न च "अस्तित्वेन गौः श्रुतः न त्वनुमितः" इत्यनुभवो भ्रम इति वाच्यम्। बाधकाभावात्।

किं च शाब्दबोधस्य यथा रीत्या अनुमितित्वं कल्प्यते तथैव रीत्या अनुमितेः शाब्दत्वमपि कल्पयितुं शक्यम्। न चानुमितौ समानविषयकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वात् तदभावजन्यत्वेन हेतुना अनुमित्यन्यत्वस्यापि साधयितुं शक्यत्वात्।

ननु अनुमितेः पदज्ञानजन्यत्वं प्रकलप्य तेन हेतुना शाब्दत्वसाधने निराकाङ्क्षवाक्यस्थलीयपदार्थोपस्थितिमूलकोपनीतभावे साध्याभाववति हेतुसस्वाद् व्यभिचारः। अतः आकाङ्क्षादिमत्पदज्ञानजन्यत्वमेव हेतुर्वाच्यः। वह्न्यद्यनुमितौ तु पूर्वमाकाङ्क्षाज्ञानासम्भवात् तद्घटितहेतुना तत्र शाब्दत्वसाधनासम्भव इति चेत् — न। तत्रापि पूर्वमाकाङ्क्षज्ञानस्य सम्पादयितुं शक्यत्वात्। यथा हि पटादिपदैरेकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्या पटादेरर्थस्य स्मरणे

Digitization by Arya Samaj Charitable Foundation, Chennai

सति तन्निरूपितव्याप्तेः ज्ञानं भवति, तथा वह्न्याद्यर्थैः तद्वाचकवह्न्यादिपदस्मरणोत्तरं तदीयाकाङ्क्षाज्ञानस्य सुलभत्वात्। वाच्यतावद् वाचकत्वस्यापि स्मारकतायामविशेषात्, उभयोः सम्बन्धरूपत्वात्।

न च "ह्रदे धूमाभावः" इत्याद्यप्रसिद्धसाध्यकस्थले पूर्वं साध्यस्यानुपस्थित्या साध्यवाचकपदस्य स्मरणासम्भव इति वाच्यम्। तत्र साध्यज्ञानाभावेऽपि उद्बोधकान्तरात् साध्यवाचकपदस्मरणसम्भवात्।

किं च "घटाद् अन्यः" इति वाक्यात् घटप्रतियोगिकान्यत्ववन् इत्याकारकः निरवच्छिन्नविशेष्यताकः घटान्यत्वप्रकारको बोधो जायत इति सर्वसिद्धम्। स च अस्मन्मते तादृशानुपूर्वीकपदज्ञानत्वेन तथाविधान्वयबोधं प्रति हेतुत्वादुपपद्यते। परमते तु निर्धर्मितावच्छेदककानुमितेरसम्भवात् अन्यपक्षकानुमितिर्दुर्घटा। अतः भेदः घटप्रतियोगिताकः घटपदसाकाङ्क्षान्यपदस्मारितत्वाद् इत्यनुमितिः वक्तव्या। सा न शाब्दबोधसमानाकारा। पक्षविध्या अन्यत्वस्य भानेऽपि अन्यत्वप्रकारेणान्यस्यानुमितावभानात्। अतस्तत्रत्यशाब्दबोधस्यानुमितित्वं दुर्घटम्।

न च घटादन्य इत्यत्र अन्यपदं घटान्यत्ववति लाक्षणिकम्, अतस्तत्र घट पदार्थान्यपदार्थयोरन्वयबोध एव न जायत इति वाच्यम्। घटादित्यस्य वैयर्थ्यात्। न च लक्षणातात्पर्यग्राहकतया तत्सार्थक्यमिति वाच्यम्। तथा सति घटोऽस्तीत्यादावपि घटादिपदस्यैव अस्तित्वादिविशिष्ट घटादिलक्षकत्वंसम्भवात् तत्रापि अस्तित्वघटयोरन्वयबोधापलापापत्तेः।

जरन्मीमांसकाः प्रकारान्तरेण वैशेषिकमतं दूषयन्ति — तथाहि — यथा शाब्दबोधं प्रति साकाङ्क्षत्वादिज्ञानं कारणम्, तथा आप्तोक्तत्वनिश्चयोऽपि कारणम्। आप्तोक्तत्वं नाम-प्रकृतवाक्यार्थविषयकयथार्थज्ञानवदुक्तत्वम्। तादृशाप्तोक्तत्वनिश्चयसत्त्वे तद्घटकज्ञानावच्छेदकतया वाक्यार्थस्यापि निश्चयोऽस्तीति निश्चितार्थविषयक एव शाब्दबोध इति वक्तव्यम्। एतादृशस्तु शाब्दबोधः अनुमितिरूपो न भवितुमर्हति। निश्चिते विषये अनुमित्सां विना जायमानत्वात्। परं तु अनुमित्यन्योऽयं शाब्दबोधः ज्ञातार्थविषयकत्वात् प्रमा न भवति, अनधिगतार्थविषयकज्ञानस्यैव प्रमात्वात्।

नन्वगृहीतार्थग्राहिज्ञानस्यैव प्रमात्वे धारावाहिकद्वितीयादिज्ञानानां प्रमात्वं न स्यात् प्रथमादिज्ञानगृहीतार्थग्राहित्वाद् इति चेत् — न। यज्जातीयविशिष्टज्ञानत्वव्यापकं समानाकारकनिश्चयोत्तरत्वं तज्जातीयान्यथार्थज्ञानमेव अगृहीतग्रा-

Digitization by Arya Samaj Charitable Foundation, Chennai

हीत्युच्यते। यज्जातिपदेन तद्विशेष्यकतत्प्रकारकज्ञानत्वं ग्राह्यम्। धारावहिकज्ञानेषु वर्तमानं यत् घटविशेष्यकघटत्वप्रकारकज्ञानत्वं तद्व्यापकं न भवति समानाकारकनिश्चयोत्तरत्वं ; तादृशज्ञानत्ववति प्रथमज्ञाने समानाकारकनिश्चयोत्तरत्वविरहात्। अपि तु स्मृतिगतं घटविशेष्यकघटत्वप्रकारकज्ञानत्वं गृह्यते चेत् तद्व्यापकं भवति समानाकारकनिश्चयोत्तरत्वम्, स्मृतीनां समानाकारकानुभवजन्यत्वात्। तज्जातीयान्यथार्थज्ञानं स्मृतिभिन्नं यथार्थज्ञानमगृहीतग्राहित्वात् प्रमा। आप्तोक्तत्वनिश्चयोत्तरं जायमाने शाब्दबोधे समानाकारकनिश्चयोत्तरत्वसत्वेन तज्जातीयान्यत्वविरहात् नोक्तमगृहीतग्राहित्वमिति न प्रमात्वम् इति।

तत् जरन्मीमांसकमतं दूषयति —

नाप्तोक्तता तु वाक्यार्थगर्भा ज्ञातोपयुज्यते।
वाक्यार्थानामपूर्वत्वात् संशयेऽप्यन्वयोदयात्॥

एकपदार्थसंसृष्टापरपदार्थपर्यवसितो यो वाक्यार्थः तद्विषयकज्ञानवता उक्तत्वरूपस्य आप्तोक्तत्वस्य निश्चयः यदि शाब्दमतेः कारणं स्यात् तदा आप्तोक्तत्वनिश्चयरूपेण साध्यनिश्चयेन प्रतिबन्धाद् एकपदार्थपक्षकापरपदार्थप्रकारकानुमितेरनुत्पादः स्यादपि। न चैवम्। शाब्दबोधात् पूर्वं वाक्यार्थस्य नियतोपस्थित्यभावाद् वाक्यार्थगर्भस्याप्तोक्त्वमतेरावश्यकत्वे वेदस्यापि ज्ञातार्थज्ञानजनकत्वेन अनुवादकतया अप्रामाण्यापत्तेः।

न च लौकिकवाक्यजन्यशाब्दबोधे एव निरुक्ताप्तोक्तत्वनिश्चयः कारणम्, अतो न वेदस्यानुवादकत्वमिति वाच्यम्। एवमपि लोकेऽपि आप्तोक्तत्वसंशयेऽपि शाब्दबोधोत्पत्त्या व्यतिरेकव्यभिचाराद् आप्तोक्तत्वनिश्चयस्य शाब्दबोधं प्रति अहेतुत्वात्।

अत एव = आप्तोक्तत्वसंशयोत्तरं शाब्दमतेरुत्पाददेव इदमपि निरस्तम्— यद् आप्तोक्तत्वस्य संशये आप्तोक्तत्वव्यतिरेकनिश्चये वा अन्वयबुद्धेरनुत्पादाद् अवश्यमाप्तोक्तत्वनिश्चयः अन्वयबुद्धि हेतुः; यत्संशययद्व्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयः तद्धेतुः इति व्याप्तेः इति। आप्तोक्तत्वसंशयादपि शाब्दोत्पादेन व्यभिचाराद् आप्तोक्तत्वनिश्चयस्य हेतुत्वासिद्धेः।

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु आप्तोक्तत्वनिश्चयानुरोधेन सिद्धसाधनस्य भवदुक्तरीत्य परिहारेऽपि तात्पर्यनिश्चयाधीनं सिद्धसाधनं परिहर्तुमशक्यम्। तथा हि — अन्वयबोधं प्रति तात्पर्यनिश्चयो हेतुरित्यवश्यमङ्गीकरणीयम्। अन्यथा घटमिति वाक्यं घटनिष्ठकर्मतापरत्वाभाववत् (कर्मत्वधर्मिकघटप्रकारकान्वयबोधेच्छयानुच्चवरितम्) इति निश्चयकाले घटकर्मत्वान्यपरम् (कर्मत्वं घटविशिष्टान्यद् इति बोधेच्छया उच्चरितम्) इति निश्चयकाले च 'घटम्' इति वाक्यात् कर्मत्वं घटीयम् इत्यन्वयबोधापत्तिः। तात्पर्यनिश्चयस्य हेतुत्वे तु घटीयं कर्मत्वमिति बोधं प्रति घटमिति वाक्यं घटकर्मत्वपरमिति निश्चयस्य हेतुतया उक्तविपरीतानिश्चयकाले उक्ततात्पर्यनिश्चयरूपहेतुविरहात् न घटकर्मत्वाशाब्दबोधापत्तिः। एवं च तात्पर्यनिश्चयोऽपि जात इति तादृशनिश्चयात्मकसिद्धिरूपप्रतिबन्धकसत्त्वात् वाक्यार्थानुमितिर्न सम्भवतीति चेत्—न। तात्पर्यज्ञानस्य शाब्दबोधं प्रति हेतुत्वस्वीकारेऽपि तस्य एकपदार्थविशिष्टापरपदार्थरूपवाक्यार्थविषयकत्वेन न हेतुत्वम्। अपि तु निरूप्यनिरूपकभावापन्नविषयताघटितेन कर्मतात्वावच्छन्नविशेष्यतानिरूपितघटत्वावच्छिन्नप्रकाराताकबोधविषयकत्वेनैव हेतुत्वम्। तथा च तात्पर्यनिश्चयकाले वाक्यार्थस्यनिश्चयेन सिद्ध्यभावाद् वाक्यार्थानुमितिर्भवत्येव।

वाक्यार्थविषयकत्वेन तात्पर्यज्ञानस्य हेतुत्वे प्रमेयत्वेन कर्मत्वावगाही "प्रमेयं घटीयम्" इति यो बोधः, यश्च प्रमेयत्वेन घटावगाही "कर्मत्वं प्रमेयविशिष्टम्" इति बोधः तदिच्छया उच्चरितमिति निश्चयकालेऽपि कर्मत्वत्वेन कर्मत्वं घटत्वेन घटं चावगाहमानः "कर्मत्वं घटीयम्" इति शाब्दबोधः स्यात्, पूर्वं घटविशिष्टकर्मत्वबोधेच्छया उच्चरितम् इति तात्पर्यज्ञानस्य सत्त्वात्। अतः पूर्वोक्तरूपेणैव हेतुत्वं वाच्यम् इति।

ननु घटमिति वाक्यं कर्मत्वत्वेन कर्मत्वधर्मिक-आधेयतासंसर्गक-घटत्वेन घटप्रकारबोधेच्छया उच्चरितम् इति तात्पर्यज्ञानस्य हेतुत्वं वाच्यम्, अन्यथा तादृशतात्पर्याभावनिश्चयदशायां कर्मत्वम् आधेयतासम्बन्धेन घटविशिष्टमिति बोधप्रसङ्गात्। तत्र वाक्यार्थस्य प्रवेशात् सिद्धिसत्त्वेनानुमितित्वस्वीकारो न सम्भवति, शाब्दबोधस्य ज्ञातार्थविषयकतया शब्दोऽनुवादकः स्याद् इति न तस्य प्रमात्वमिति चेत्—न।समानानुपूर्वीकस्य अश्रूयमाणवाक्यस्य घटविशिष्टकर्मत्वपरत्वनिश्चयेऽपि श्रूयमाणवाक्यव्यक्तौ तत्परत्वानिश्चये घटीयं कर्मत्वमिति

Digitization by Arya Samaj Charitable Foundation, Chennai

शाब्दबोधो न जायते। तदापत्तिवारणाय कालान्तरीयं घटमिति वाक्यं घटीयकर्मतापरम् इति निश्चयेऽपि इदानींन्तनं घटमिति वाक्यं घटीयकर्मतापरमिति निश्चयाभावकाले इदानीं घटमिति वाक्यं घटीयकर्मतापरत्वाभाववदिति निश्चये वा घटीयं कर्मत्वमिति बोधापत्तिवारणाम च तत्तत्कालिकतत्तद्वाक्यधर्मिक-घटीयकर्मत्वादिपरत्वनिश्चयस्य तत्तत्कालिकतत्तद्वाक्यजन्यतदर्थविषयकशाब्दबुद्धौ विशिष्य हेतुत्वं वक्तव्यम्। तदपेक्षया च तात्पर्यज्ञानहेतुभूतानां प्रकरणज्ञानात्मकानां विलक्षणज्ञानव्यक्तीनामेव अन्वयबोधं प्रति हेतुत्वमुचितम्। अवश्यक्लृप्तनियतपूर्ववर्तिताकत्वात्। "तद्धेतोरेव तत्सिद्धौ मध्ये किं तेन" इतिन्यायोऽप्यत्रानुसन्धेयः।

अत एव "सैन्धवमानये"त्यादावपि लवणपरत्वधीर्न लवणान्वयबुद्धौ हेतुः, अपि तु लवणपरत्वानुमापकत्वेनाभिमतं भोजनादिप्रकरणज्ञानमेवेति न्यायसिद्धान्तः। तथा च शाब्दबोधं प्रति तात्पर्यज्ञानस्याहेतुतया तात्पर्यावच्छेदकतया वाक्यार्थसिद्धेः शब्दस्यानुवादकत्वमिति प्राभाकरमतमयुक्तम् इति।

एतेनेदमपि निरस्तम्—वाक्यार्थप्रतीतिजनकतया अभिप्रेतत्वलक्षणस्य तात्पर्यस्य ज्ञानमवश्यं शाब्दबोधे हेतुः, तात्पर्यसंशये तात्पर्याभावनिश्चये वा शाब्दबोधानुत्पत्तेः। अपि च नानार्थकहर्यादिपदस्थले युगपदनेकार्थोपस्थितौ एकार्थमात्रान्वयबोधे तात्पर्यनिश्चयस्यैव विनिगमकत्वं वाच्यम्। लक्षणाकल्पकतयापि तात्पर्यनिश्चयः कारणमिति वाक्यम्। यष्टीः प्रवेशयेत्यादौ मुख्यार्थबाधविरहेण मुख्यार्थबाधस्य सर्वत्र लक्षणायामसम्भवात्। तथा च तात्पर्यनिश्चयस्य हेतुत्वात् तात्पर्यावच्छेदकतया वाक्यार्थसिद्धिः—इति। तात्पर्यनिर्णयहेतुभूतप्रकरणादिज्ञानेनैव सर्वोपपत्तेः।

अपि च कवि : केनचित्तात्पर्येण वाक्यानि प्रयुङ्क्ते। श्रोतुस्तु अन्यार्थपरत्वनिश्चयेऽपि शाब्दबोधो जायते। किं च शुकाद्युच्चरितवाक्यानां स्वार्थपरत्वाभावनिश्चयेऽपि श्रोतृणामन्वयबोधो जायते। तथा च व्यतिरेकव्यभिचारात् न तात्पर्यनिश्चयस्य शाब्दबोधहेतुत्वमिति।

मथुरानाथोक्तरीत्या नव्यवैशेषिकमतानुवादः तत्खण्डनं च

अत्रातिनव्यवैशेषिकाः—लिङ्गत्तावच्छेदकप्रकारकलिङ्गनिश्चयो नानुमितिहेतुः। पर्वतवृत्तिरयमालोको धूमो वा उभयथापि वह्निव्याप्यः इत्यत्र, वह्निव्याप्यवानयमित्यादिपरामर्शस्थले च लिङ्गत्तावच्छेदकप्रकारकनिश्चयं

Digitization by Arya Samaj Charitable Foundation, Chennai

विनाप्यनुमितेरुत्पत्त्या व्यतिरेकव्यभिचारात्। किं तु व्याप्यत्वप्रकारकलिङ्गनिश्चय एवानुमितिहेतुः। स च प्रकृते लिङ्गतावच्छेदकयोग्यतायाः संशयेऽपि सम्भवत्येव।

किं च योग्यतायाः संशयदशायामुक्तहेतौ व्यभिचारज्ञानदशायां च व्यभिचारिणोऽव्यभिचारिणो वा पक्षवृत्तेः अपक्षवृत्तेर्वा हेत्वन्तरस्य ज्ञानादेवानुमितिः स्यात्, किं शब्दस्य प्रमाणन्तरत्वेन ?

ननु पद-पदार्थपक्षकानुमानात् संसर्गसिद्धावपि घटमानयेत्यादिशब्दश्रवणानन्तरं घटकर्मकानयनानुकूलकृतिमान् इत्यादिविशेषणविशेष्यभावेन प्रतीतेरनुभवसिद्धायाः असम्भवः। अनुमाने पदार्थसंसर्गस्यैव विशेषणतया भानात्। अतः शब्दोऽवश्यं मानान्तरमङ्गीकार्यम्। न चानुमानानन्तरं मनसा तादृशप्रतीतिसम्भव इति वाच्यम्। तथा कल्पने गौरवात्, मानाभावात्, शब्दश्रवणानन्तरं प्रथमत एव तदाकारज्ञानस्यानुभवसिद्धत्वाच्चेति चेत्—

कर्मत्वादिकं पक्षयित्वा वस्तुगत्या कर्मत्वादौ घटादेः यादृशः संसर्गः प्रतीयते तत्संसर्गेण घटादिकं साध्यम्। एवमानयनादिकं पक्षीकृत्य कर्मत्वादिकं साध्यम्। समूहालम्बनपरामर्शाद् विशेष्ये विशेषणम् इत्यादिन्यायेन अर्थसमाजग्रस्ता तादृशी अनुमितिरिति न कोऽपि दोषः।

न चैवं "घटः कर्मत्वमानयनं कृतिः" इत्यादिनिराकाङ्क्षस्थलेऽपि घटकर्मकानयनानुकूलकृतिमान् इत्यादिबोधापत्तिः, अनुमितौ आकाङ्क्षायाः कारणत्वाभावादिति वाच्यम्। व्याप्त्यादिज्ञानसत्त्वे तत्रानुमित्यात्मकतादृशबोधस्य नैयायिकेनापि दुर्वारत्वात्।

अथ न पचतीत्यादौ कथं नञर्थाभावे कृत्यादेरन्वयबोधः ? तादात्म्येन आधाराधेयभावेन च सम्बन्धेन बाधात् तेन सम्बन्धेनानुमातुमशक्यत्वात्।

न च प्रतियोग्यनुयोगिभावसम्बन्धेनानुमातव्यम्, नैयायिकमतेऽपि तेनैव सम्बन्धेनान्वयबोधादिति वाच्यम्। तस्य व्याप्त्यनिरूपकत्वात्, तादात्म्यातिरिक्तस्य वृत्त्यनियामकसम्बन्धस्य व्याप्तिनिरूपकत्वानङ्गीकारात्।

एवं घटमानयेत्यादौ कृत्यादावानयनादेः कथमन्वयबोधः, अनुकूलत्वादेः वृत्त्यनियामकत्वादिति चेत्—

Digitization by Arya Samaj Charitable Foundation, Chennai

न। वृत्त्यनियामकसम्बन्धस्यापि वाक्याद् बोधः अनुभवसिद्धः, स कथं स्यात्, कारणाभावेनानुमित्यसम्भवाद् इति वाच्यम्। तादृशानुभवस्यैवासिद्धेः, व्याप्तयादिज्ञानानन्तरमेव वाक्यार्थबोधस्वीकारात्।

न चानन्तव्याप्तयादिज्ञानकल्पने गौरवात् लाघवेन शब्दस्यैव प्रमाणान्तरत्वं कलप्यतामिति वाच्यम्। वाक्यार्थानुभवात् पूर्वं सर्ववादि सिद्धायाः पदार्थोपस्थितेरेव नियमतो व्याप्तयादिविषयकत्वस्वीकाराद् अतिरिक्तज्ञानकल्पनाभावेन गौरवाभावात्।

वस्तुतस्तु साध्यसाधनभेदेन बहुविधान्वयव्यतिरेकव्याप्तिबुद्धीनां परस्परव्यभिचारेण विशेषत एव कार्यकारणभावो न तु सामान्यतः। एवं च शाब्दबोधस्थलाभिषिक्तायामनुमितौ आकाङ्क्षादिज्ञानमेव हेतुः, न तु व्याप्तिपक्षधर्मतादिज्ञानम्, अतो व्याप्तयादिज्ञानविरहेऽपि न क्षतिरिति प्राहुः।

उक्तनव्यवैशेषिकमतखण्डनम्

तदयुक्तम्। शब्दश्रवणानन्तरं जायमाने वाक्यार्थबोधे शाब्दत्वजातिविशेषस्य "अमुमर्थं शृणोमि" "श्रुतमेवेदं पुराणादिभ्यः" इत्याद्यनुभवसिद्धत्वेन अपलपितुमशक्यत्वात्।

न चैवम् "अर्थापयामि" इत्यनुव्यवसायबलाद् अर्थापत्तेरप्याधिक्यापत्तिरिति वाच्यम्। तादृशानुव्यवसायसत्त्वे इष्टापत्तेः।

न च तादृशानुव्यवसायसिद्धः शाब्दत्वजातिविशेषः अनुमितित्वव्याप्य एवास्तु चाक्षुषत्वादिकमिव प्रत्यक्षत्वव्याप्यमिति वाच्यम्। वाक्यश्रवणानन्तरं जायमानस्य वाक्यार्थबोधस्यानुमितित्वे मानाभावात्, प्रत्यक्षभिन्नानुभवत्वस्याप्रयोजकत्वात्, अनुमितित्वं विनाप्युपमितेरिव प्रत्यक्षभिन्नत्वसम्भवात्।

न चानुमितिसामग्रयेव वाक्यार्थबोधस्यानुमितित्वे मानमिति वाच्यम्। तस्या एव तदानीमसिद्धेः। अनुमितित्वसत्त्वे "अनुमिनोमि" इत्यनुव्यवसायापत्तेश्च।

अथ तस्यानुमितिभिन्नत्वे एव किं मानम्। न चानुमितित्वे प्रमाणाभाव एव मानमिति वाच्यम्। अनुमितिभिन्नत्वे प्रमाणभाव एवानुमितित्वे प्रमाणमित्यस्यापि सुवचत्वादिति चेत्—मास्तूभयम्। तथापि भवतो नाभिमतसिद्धिः।

Digitization by Arya Samaj Charitable Foundation, Chennai

वस्तुतस्तु "नानुमितं न साक्षात्कृतम्, श्रुतमेवेदम्" इति सर्वानुभवसिद्धा प्रतीतिरेव वाक्यार्थबोधस्य अनुमितिभिन्नत्वे प्रत्यक्षभिन्नत्वे च प्रमाणम्।

केचित्तु—शब्दश्रवणानन्तरं जायमानस्य वाक्यार्थबोधस्यानुमितिरूपत्वे साध्यनिश्चयदशायां सिषाधयिषामन्तरेण वाक्यार्थबोधरूपानुमितिर्न स्यात्। सिषाधयिषाविरहविशिष्टसिद्धेरेव तदानीं सत्त्वेन तदभावरूपपक्षताविरहात्।

न च सिषाधयिषाविरहवत् शाब्दसामग्रीविरहोऽपि पक्षताकुक्षौ प्रवेशनीयः, तथा च शाब्दसामग्रीदशायां साध्यनिश्चयसत्त्वे शाब्दसामग्रीविरहविशिष्ट-साध्यनिश्चयाभावसत्त्वात् न पक्षताहानिः इति वाच्यम्। तथा सति सिषाधयिषा शाब्दसामग्रीविरहविशिष्टसिध्यभावत्वेन पक्षताया अनुमितिहेतुत्वे गौरवापत्तेः।

न च विशिष्टान्तं न कारणतावच्चेदके प्रविष्टम्, अपि तु अभावविशेषप-रिचायकम्, कारणत्वं तु तदभावव्यक्तित्वेनेति न गौरवमिति वाच्यम्। अभावस्य तद्व्यक्तित्वेन कारणत्वे बहुतरकार्यकारणभावविलोपप्रसङ्गात्। तथा हि—

बाधनिश्चयाभावस्य सत्प्रतिपक्षनिश्चयाभावस्य अवच्छेदकधर्मदर्शनाभावस्य च तादृशतादृशाभावत्वेन पृथक् पृथक् कारणत्वं सर्वानुभवसिद्धम्। यदि तत्त-द्व्यक्तित्वेनाभावकारणत्वं स्वीक्रियते तदा बाधनिश्चय-सत्प्रतिपक्षनिश्चय-अवच्छे-दकधर्मदर्शनैतत्त्रितयान्यतमत्वावच्छिन्नाभावस्य तद्वयक्तित्वेन कारणत्वसम्भवात् तादृशकारणत्वं विलीयते। विलीयेत च समानविषये शाब्द-त्वावच्छिन्नं प्रति प्रत्यक्षसामग्र्यभावस्य अनुमितिसामग्रयभावस्य च पृथक् कार-णत्वम्। तत्रापि तादृशसामग्रीद्वयान्यतरत्वावच्छिन्नाभावस्य तद्व्यक्तित्वेन कारणत्वसम्भवात्॥

तत्तद्व्यक्तित्वेनाभावकारणत्वं यदि न स्वीक्रियते तदा तादृशान्यतमत्वाव-च्छिन्नाभावस्य तादृशान्यतमत्वावच्छिन्नाभावत्वेनैव कारणत्वमङ्गीकार्यम्। तथा च तादृशान्यतमत्वस्य गुरुशरीरतया तदपेक्षया प्रत्येकरूपावच्छिन्नाभावत्वेन कारणत्वे लाघवात् न तादृशकारणत्वविलयप्रसङ्गः। स्पष्टं चेदं पक्षतादीधित्यादौ इत्याहुः।

तदसत्। वैशेषिकमते अनुमितिं प्रति पक्षताया हेतुत्वे मानाभावात्। अतः पूर्वोक्तरीत्यैव वैशेषिकमतं दूषणीयम्—इति प्राहुः।

Digitization by Arya Samaj Charitable Foundation, Chennai

जरन्मीमांसकमतम्

वाक्यार्थबोधस्यानुमितिरूपत्वं वदतां जरन्मीमांसकानां मतं मणावित्यमनूदितम्—

घटमानयेत्यादौ सर्वत्र लौकिकवाक्ये शाब्दबोधात् पूर्वम् अयं वक्ता आधेयतादिसंसर्गककर्मत्वादिविषयकघटादि विशिष्टज्ञानवान् आधेयतादिसंसर्गेण कर्मत्वादिसाकाङ्क्षं यत् घटादि तस्य यत् ज्ञानं तज्जन्यं भ्रमाद्यजन्यं च यद्वाक्यं तत्प्रयोक्तृत्वात्, यो यत्संसर्गक-यत्साकाङ्क्ष-यज्ज्ञानजन्य-भ्रमाद्यजन्यवाक्यस्य प्रयोक्ता स तत्संसर्गक-तद्विषयक-तद्विशिष्ट-ज्ञानवान्, घटेनेति वाक्यप्रयोक्ता आधेयतासंसर्गककरणत्वविषयकघटविशिष्टज्ञानवानहमिव इत्यनुमानस्य; कर्मत्वादिकम् आधेयतादिसंसर्गेण घटादिमत्, तेन संसर्गेण स्वविषयकघटादिविशिष्टज्ञानवदुक्तपदस्मारितत्वाद् घटादिकरणत्वादिवद् इत्यनुमानस्य वा सामग्रीसम्भवेन तादृशानुमित्यनन्तरमेव शाब्दबोध इति लौकिकशब्दोऽनुवादक एव, न तु प्रमाणम्, अज्ञातविषयकानुभवकरणत्वस्यैव प्रामाण्यपदार्थत्वात्। वेदे तु वक्तुरभावेन तादृशानुमानासम्भवात् प्रामाण्यम्-इति।

तन्मतखण्डनम्

तत्खण्डनप्रकारस्तु—वेदस्थले क्लृप्ता या शाब्दसामग्री तस्याः लोकेऽपि सत्त्वेन वेद इव वक्तृगतज्ञानाद्यनुमानात्, प्रागेव संसर्गशाब्दबोधात् न शब्दस्यानुवादकता। अन्यथा—वेदस्थले क्लृप्तायाः शाब्दसामग्र्याः लौकिकस्थलेऽभावे लौकिकशब्दस्यानुवादकतापि न स्यात्, सामग्र्यभावात्। अनुवादकत्वं हि गृहीतार्थविषयकशाब्दधीजनकत्वम्।

ननु वक्तृज्ञानानुमानात्प्रागेव संसर्गप्रत्ययो भवतीत्युक्तमयुक्तम्, सर्वत्र शाब्दसामग्रीदशायां हेतुज्ञानसत्त्वेनानुमितिसामग्र्याः सत्त्वाद् अनुमितेरेव प्रथममुत्पादात्, शाब्दसामग्र्यपेक्षया अनुमितिसामग्र्या बलवत्त्वादिति चेत्—न। पूर्वं लिङ्गज्ञानसत्त्वेऽपि व्याप्तिस्मृतिविलम्बेनानुमितिविलम्बात्। शाब्दबोधस्य तु व्याप्तिस्मृतिविलम्बेन विलम्बाभावात्। लौकिकवाक्ये क्वचिदनुवादकत्वं त्विष्टमेव, न तु सर्वत्र, उक्तयुक्तेः।

ननु अनाप्तोक्ते लौकिकवाक्ये भ्रमजनकत्वदर्शनात् लौकिकवाक्यस्थले वेदतुल्यसामग्रीमात्रं न निश्चायकम्, किं तु आप्तोक्तत्वनिश्चयोऽपि। तथा च

Digitization by Arya Samaj Charitable Foundation, Chennai

क्वचिल्लौकिकवाक्ये भ्रमजनकत्वदर्शनात् लौकिकवाक्यत्वरूपसाधारणधर्मदर्शनेन सर्वत्र लौकिकवाक्ये भ्रमजनकत्वसंशयसम्भवात् तस्य संशयस्यैव प्रतिबन्धकत्वाद् आप्तोक्तत्वनिश्चयोऽपि हेतुः वक्तव्यः। आप्तोक्तत्वनिश्चये तु सति न भ्रमजनकत्वसंशयः। आप्तोक्तत्वं च तत्पदार्थविशिष्टतत्पदार्थज्ञानवता उक्तत्वम्। ततश्च तन्निश्चयादेव तद्घटकवाक्यार्थस्य सिद्ध्या शब्दस्य अनुवादकत्वमेवेति चेत्—न।

चक्षुरादेः क्वचिद् भ्रमजनकत्वेन चक्षुष्ट्वरूपसाधारणधर्मदर्शनेन भ्रमजनकत्वशङ्कायामपि चक्षुषा प्रमाया उत्पत्त्या व्यभिचारेण भ्रमजनकत्वसंशयस्य प्रमां प्रत्यप्रतिबन्धकत्वात्।

ननु अज्ञायमानकरणस्य चक्षुरादेः भ्रमजनकत्वसंशये सत्यपि प्रमाजनकत्वेऽपि ज्ञायमानं करणं संशये सति न निश्चायकम्, ज्ञायमानस्य लिङ्गस्य व्याप्तिपक्षधर्मतासंशयदशायामनुमित्यजनकत्वात्। तथा च भ्रमजनकत्वसंशये सति लौकिकवाक्येन कथं निश्चयो जायते। तदर्थमाप्तोक्तत्वनिश्चयोऽप्यपेक्षित इति चेत्—

कस्य संशयः शाब्दधीप्रतिबन्धकः इति पृच्छामः। न तावद् भ्रमजनकत्वसंशयः, तस्य विरोध्यविषयकत्वेन अप्रतिबन्धकत्वात्। नापि वाक्यविषयकसंशयः, वाक्यस्य निश्चयात्। नापि वाक्यजन्यज्ञानप्रामाण्यसंदेहः, तस्य वाक्यजन्यज्ञानोत्तरकालिकत्वेन पूर्वतनज्ञानं प्रत्यप्रतिबन्धकत्वात्। नाप्याप्तोक्तत्वसंशयः, आप्तोक्तत्वनिश्चयस्य शाब्दबोधहेतुत्वे प्रमाणाभावात्। यदि हि आप्तोक्तत्वनिश्चयः हेतुः स्यात् तदैव तन्निश्चयविघटनद्वारा तत्संशयः प्रतिबन्धकः स्यात्, न त्वेवम् इति आप्तोक्तत्वसंशयोऽपि न प्रतिबन्धकः।

ननु लोके आप्तोक्तत्वसंदेहे आप्तोक्तत्वव्यतिरेकनिश्चये वा सति वाक्यार्थधीर्न जायते। तथा च यत्संशयो यद्व्यतिरेकनिश्चयश्च यत्र प्रतिबन्धकः तन्निश्चयः तत्र हेतुः इति व्याप्तिबलाद् आप्तोक्तत्वनिश्चयः शाब्दधीहेतुः। आप्तोक्तत्वं च प्रकृतवाक्यार्थविषयकयथार्थज्ञानजन्यत्वम्। तन्निश्चयं प्रति तद्घटकप्रकृतवाक्यार्थज्ञानं हेतुः, तच्चानुमानिकम्। तथा च आप्तोक्तत्वनिश्चयोपजीव्याद् अनुमानादेव सर्वत्र शाब्दबोधात् पूर्वं वाक्यार्थधीरिति शब्दः अनुमानसिद्धार्थानुवादक इति चेत्—

Digitization by Arya Samaj Charitable Foundation, Chennai

न। वेदे आप्तोक्तत्वज्ञानाविषयस्यापि शब्दस्य शाब्दबोधजनकत्वदर्शनाद् आप्तोक्तत्वनिश्चयस्याहेतुत्वात्।

न च आप्तोक्तत्वनिश्चयः शाब्दप्रमासामान्ये न हेतुः, येनोक्तदोषः स्यात्। अपि तु लौकिकवाक्यजन्यशाब्दबोधं प्रत्येव सहकरीति वाच्यम्। आप्तोक्तत्वनिश्चयाभावेऽपि वेदानुकारेण पठ्यमानात् मन्वादिवाक्यात् तत्रापौरुषेयत्वभ्रमवतः गौडमीमांसकः पञ्चिकाकारः। गौडो हि वेदाध्ययनाभावाद् अवेदत्वं मन्वादिस्मृतेर्न जानाति। गौडमीमांसकस्य वाक्यार्थनिश्चयोत्पत्त्या व्यभिचारेण तस्य लौकिकवाक्यजन्यबोधेऽप्यहेतुत्वात्।

न च गौडस्य वाक्यार्थनिश्चयः भ्रान्तिः, प्रमायामेव चाप्तोक्तत्वनिश्चयः सहकारीति वाच्यम्। विषयाबाधात्। पौरुषेयत्वनिश्चयदशायामपि मन्वादिवाक्यजन्यशाब्दबोधस्य भ्रमत्वापत्तेश्च, विषयकृतवैलक्षण्याभावात्।

न च मन्वादिवाक्यत् न संसर्गधीः, अपि तु असंसर्गाग्रहमात्रमिति वाच्यम्। वेदवाक्यार्थस्य मन्वादिवाक्यार्थस्य च वस्तुतः संसृष्टत्वेन असंसर्गाग्रहायोगात्। स्थितस्य असंसर्गस्याग्रहो हि असंसर्गाग्रहः। संसर्गरूपस्यार्थस्य सत्त्वेऽपि असंसर्गाग्रहाङ्गीकारे शब्दस्थले सर्वत्र संसर्गग्रहोच्छेदप्रसङ्गात्। यद्वा लोके वेदे च संसर्गग्रहस्यानुभवसिद्धत्वेऽपि असंसर्गाग्रहस्वीकारे संसर्गग्रहोच्छेदप्रसङ्गात्।

न चाप्तोक्तत्वनिश्चयरूपकारणबाधात् संसर्गज्ञानस्य बाधः, अतः असंसर्गाग्रहमात्रमिति वाच्यम्। वेदानुकारेण पठ्यमानमन्वादिवाक्ये व्यभिचारेण आप्तोक्तत्वनिश्चयस्य अहेतुत्वात्।

न च लौकिकत्वेन ज्ञातवाक्याद् यत्र शाब्दबोधः तत्र आप्तोक्तत्वनिश्चयः सहकारी। अतो न व्यभिचारः, मन्वादिवाक्ये अपौरुषेयत्वभ्रमेण लौकिकत्वज्ञानविरहादिति वाच्यम्।

आप्तोक्तत्वनिश्चयस्य शाब्दधीहेतुत्वे मानाभावात्।

न च यत्संशययद्व्यतिरेकनिश्चयौ यत्प्रतिबन्धकावित्यादिव्याप्तिरेव तत्र मानमिति वाच्यम्। तादृशव्याप्तेरभावात्।

किं च वाक्यार्थस्यान्वयबोधात् प्रागज्ञातत्वेन तद्घटिताप्तोक्तत्वरूपसाध्याप्रसिद्धता साध्यव्याप्यत्वेन गृहीतस्य कस्यचित् लिङ्गस्याभावेन आप्तोक्तत्वग्रहासम्भवात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु आप्तोक्तत्वनिश्चयस्य शाब्दबोधाहेतुत्वेऽपि अनाप्तोक्तत्वशङ्काविरहो हेतुरस्तु। स च वेदेऽपौरुषेयत्वनिश्चयात् लोके च आप्तोक्तत्वनिश्चयाद् इति चेन्न। लोकेशाब्दबोधात्पूर्वम् आप्तोक्तत्वनिश्चयोऽशक्यः इत्युक्तत्वात्।

किं च वेदेऽपौरुषेयतानिश्चये सत्येव अनाप्तोक्तत्वशङ्कानिरासद्वारा अर्थ-प्रत्यय इति स्वीकारे—इमे पदार्थाः संसर्गवन्तः दोषवत्पुरुषाप्रणीतत्वे सति आकाङ्क्षादिमत्पदस्मारितत्वाद् इत्यनुमानादेव पदार्थसंसर्गस्य सिद्धेः वेदोऽप्यनु-वादकः स्यात्। तदुक्तमाचार्यैः—

व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी।
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः॥

इति। व्यस्ता विगता पुंदूषणाशङ्का वक्तृदोषाशङ्का येषां पदानां तैः पदैः स्मारितत्वाद् अमी—पदार्थाः अन्विताः मिथः संसर्गवन्तः इति निर्णीते-इत्यनुमानेन वेदस्थलेऽपि शाब्दबोधात् प्रागर्थे निर्णीते सति वेदस्यापि तत्-अनुवादकत्वं कुतो नेत्यर्थः। तथा च अनधिगतार्थबोधकत्वाभावेन वेदाख्यशब्दस्य प्रमाणत्वं न सिध्येद् इति।

प्रकारान्तरेण प्राभाकरमतोपन्यासः

प्राभाकरास्तु—व्यभिचारिशब्दव्यावृत्तं = प्रमितिस्वरूपायोग्यशब्दावृत्ति अथवा विसंवादिप्रवृत्तिहेतुज्ञानजनकशब्दावृत्ति, अव्यभिचार्यनुगतम् = निखि-लप्रमाजनकवाक्यवृत्ति किंचित् प्रमाप्रयोजकमङ्गीकरणीयम्, यदभावाद् अनाप्तो-क्तवाक्यात् प्रमाविरहः। अन्यथा क्वचित् प्रमा क्वचित् तदभाव इत्येवंरूपं कार्यवैचित्र्यं न स्यात्। तच्च शब्दवृत्ति प्रमाप्रयोजकं ज्ञातं सत् शाब्दबोधोप-योगि। ज्ञानवृत्तिशाब्दबोधकारणतायां विषयतया अवच्छेदकमिति यावत्। तत्र हेतुः—ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारिवैलक्षण्यत्वाद् इति। ज्ञायमानकरणे इत्यत्र सप्तम्याः निष्ठत्वमर्थः। तस्य वैलक्षण्येऽन्वयः। ज्ञायमानकरणनिष्ठं यद् व्यभिचारिवैलक्षण्यं तत्त्वाद् इति हेत्वर्थः। तच्च प्रमेतरज्ञान-जनकावृत्तित्वम्। प्रमात्वमनुभवत्वमात्रम्। स्मृतिजनकावृत्तित्वं पर्यवसितोऽर्थः। प्रमात्वमनुभवत्व-मात्रम्। स्मृतिजनकावृत्तित्वं पर्यवसितोऽर्थं यथाश्रुते तन्मते प्रमेतरज्ञानाप्रसिद्ध-चापत्तेः।

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा च यत् ज्ञायमानकरणनिष्ठत्वे सति यज्ज्ञानोपयोगि-(यच्छाब्दबोधोपयोगि) प्रमेतरज्ञानजनकावृत्तित्वरूपव्यभिचारिवैलक्षण्यवद् भवति तत् तज्ज्ञानवृत्तितज्ज्ञानकारणतायां विषयतयावच्छेदकं भवतीति सामान्यमुखी व्याप्तिः। व्याप्तिवत् शब्दशक्तिवच्चेति दृष्टान्तः। व्याप्तिस्तावत् ज्ञायमानकरणलिङ्गनिष्ठा अनुमित्युपयोगि-प्रमेतरज्ञानजनकावृत्तित्वरूपव्यभिचारवैलक्षण्यवती च भवति। अत एव लिङ्गज्ञानवृत्ति-अनुमितिकारणतायां विषयतयावच्छेदिका भवति। एवं शब्दशक्तिरपि ज्ञायमानकरणशब्दनिष्ठा शाब्दबोधोपयोगिव्यभिचारवैलक्षण्यवती च। अत एव शब्दज्ञानानिष्ठायां शाब्दबोधकारणतायां विषयतासम्बन्धेनावच्छेदिका च भवतीति दृष्टान्ते साध्यहेत्वोः सत्त्वम्। पक्षे शब्दवृत्तिप्रमाप्रयोजके वक्ष्यमाणे तात्पर्ये च ज्ञायमानशब्दनिष्ठत्वे सति प्रमेतरज्ञानजनकवृत्तित्वं वर्तते, तथा तात्पर्यवच्छब्दज्ञाननिष्ठशाब्दज्ञानकारणतायां विषयतयावच्छेदकत्वं च अस्तीति साध्यहेत्वोरुपपत्तिः।

अत्रायमनुमानप्रयोगो विवक्षितः— शब्दनिष्ठमनुगतप्रमाप्रयोजकं (तात्पर्य) ज्ञानवृत्तिज्ञानकारणतायां विषयतया अवच्छेदकम्, ज्ञायमानकरणनिष्ठत्वे सति ज्ञानोपयोगिव्यभिचारिवैलक्षण्यवत्त्वाद् व्याप्तिवत् शब्दशक्तिवच्चेति। प्रमाहेतुत्वाद्वेति द्वितीयहेतुः। हेतुत्वं च कारणकारणतावच्छेदकसाधारणम्। प्रमापदं शाब्दज्ञानपरम्। यत् यज्ज्ञानहेतुर्भवति तत् तज्ज्ञानवृत्तिज्ञानकारणतायां विषयतया अवच्छेदकं भवतीति सामान्यमुखी व्याप्तिः।

अत्रानुकूलतर्क उक्तः—अन्यथा शब्दाभासोच्छेदप्रसङ्ग इति। यदि स्वरूपसदेव तात्पर्यं हेतुः न तु तन्निश्चयः तदा तात्पर्यसन्देहदशायां सतात्पर्यकशब्दात् शाब्दबोधानुत्पत्त्युच्छेदप्रसङ्ग इत्यर्थः। वस्तुगत्या तात्पर्यस्य तत्र सत्त्वेन तदर्थान्वयबोधसम्भवात्। यद्वा घटोऽस्तीति वाक्यात् घटाभावतात्पर्यभ्रमे घटाभावबोधो न स्यात्, स्वरूपसतः घटाभावतात्पर्यस्याभावादित्यर्थः।

इदानीमव्यभिचारिशब्दानुगतं प्रमाप्रयोजकं तात्पर्यमेवेति इतरपरिशेषपूर्वकं निरूप्यते।

तत्र न तावदाप्तोक्तत्वं प्रयोजकम्। आप्तोक्तत्वं नाम प्रकृतवाक्यार्थविषयकयथार्थज्ञानवदुक्तम्। संवादिप्रवृत्तिजनकत्वाद् अबाधितविषयकबोधजनकत्वाद्वा प्रमाणभूते शुकोच्चारिते शब्दे आप्तोक्तत्वविरहात्। भ्रान्तेन प्रतारकेण चोक्ते संवादिवाक्ये वेदवाक्ये च आप्तोक्तताभावेऽपि प्रमाजनकत्वसद्भावात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

आप्तोक्तत्वानुमापकस्य व्यभिचारिभिन्नस्य लिङ्गस्याभावेन आप्तोक्तत्वं ज्ञातुमशक्यं च।

ननु दोषाजन्यानुपूर्वीकत्वे सति अर्थज्ञानजन्यत्वमेव आप्तोक्तत्वानुमापकं लिङ्गम् इति चेन्न। तथा सति तादृशलिङ्गवत एव शब्दस्य अर्थप्रत्यायकत्वप्रसङ्गात्। न चेष्टापत्तिः, संवादिशुकादिवाक्ये अर्थज्ञानजन्यत्वाभावात् मौनिश्लोके आनुपूर्व्यभावाच्च अर्थप्रत्यायकत्वानुपपत्तेः।

अपि च आप्तोक्तत्वस्य प्रकृतवाक्यार्थविषयकयथार्थज्ञानवदुक्तत्वरूपत्वे तस्य च शाब्दधीप्रयोजकत्वे नानावाक्यार्थगोचरयथार्थज्ञानानन्तरोक्तस्य एकार्थमात्रतात्पर्यकनानार्थकशब्दस्य तात्पर्याविषयेऽप्यर्थे शाब्दबोधजनकत्वापत्तिः यदि आप्तोक्तत्वं प्रकृतवाक्यार्थगोचरयथार्थज्ञानजन्यानुपूर्वीकत्वं तदा वेदमौनिश्लोकयोस्तदभावेन शाब्दबोधजनकत्वानुपपत्तिः, वेदानुपूर्व्या नित्यत्वाद् इति।

केचित्तु—भ्रमजनकदोषाभावः प्रमायां हेतुः। भ्रमजनकदोषश्च न भ्रमप्रमाद-विप्रलिप्सा-करणापाटवादिः। परस्परं व्यभिचारात्। एतदुक्तं भवति-भ्रमो नाम उच्चारणीयवाक्यार्थविषयको वक्तुर्भ्रमः। प्रमादः = अनवधानता। सा च वाक्यार्थज्ञानस्वरूपयोग्यस्य वक्तुः उच्चारणीयवाक्यार्थविषयकनिश्चयाभावः। विप्रलिप्सा = प्रतारणा। सा च एकरूपेणावगतस्यान्यरूपेण बुबोधयिषा। करणापाटवम् = करणस्य कण्ठादेः अपटुत्वं = इच्छाविषयीभूतवर्णानुकूलकरणसंयोगानुत्पादकालिक-तदननुकूलकरणसंयोगः। एतेषां प्रत्येकं भ्रमहेतुत्वे एकसत्त्वेऽप्यन्याभावेन भ्रमोत्पत्त्या व्यतिरेकव्यभिचारः। मिलितस्य च हेतुत्वं न सम्भवति, अव्यापकत्वात्, प्रत्येकसत्त्वेऽपि शाब्दभ्रमदर्शनाद् इति। किं तु आप्तोक्तत्वाभावः शाब्दभ्रमहेतुः, तदभावरूपमाप्तोक्तत्वं प्रमाहेतुः—इत्याहुः।

तन्न। लिङ्गाभावेन शाब्दबोधात् पूर्वं ज्ञातुमशक्यत्वात्।

अन्ये तु व्यभिचारशङ्काविरहः—बाधितार्थकत्वशङ्काविरहः शाब्दबोधे हेतुः। सा च शङ्का लौकिकवाक्ये वक्तुः भ्रमादिशङ्कामूलेति आप्तोक्तत्वनिश्चयात् निवर्तते नोत्पद्यते वा। वेदे चापौरुषेयत्वनिश्चयेन निवर्तते। तथा च बाधितार्थकत्वशङ्काविरोधित्वेन आप्तोक्तत्वनिश्चयः शाब्दधीहेतुः इत्याहुः। तदपि न। आप्तोक्तत्वस्य प्रथमं ज्ञातुमशक्यत्वादेव।

Digitization by Arya Samaj Charitable Foundation, Chennai

अपि च प्रकृतवाक्यार्थस्य अपूर्वत्वेन = अन्वयबोधात् पूर्वमज्ञातत्वेन आप्तोक्तत्वरूपसाध्यस्याप्रसिद्धिः ।

अपि च वेदे "एते पदार्था मिथः संसर्गवन्तः सदोषपुरुषाप्रणीतपदस्मारितत्वात्" इत्यनुमानेन संसर्गसिद्धेः अनुमानगृहीतार्थबोधकतयानुवादकत्वापत्तिः । बाधितार्थकत्वशङ्कोच्छेदार्थमपौरुषेयत्वनिश्चयस्यावश्यकत्वेन तत एव सदोषपुरुषाप्रणीतत्वग्रहसम्भवात् ।

एतावता आप्तोक्तत्वं शाब्दप्रमाप्रयोजकमित्येतत् निरस्तम् । अथ दोषाभावस्य तत्प्रयोजकत्वं निरस्यते । (दोषाः भ्रमप्रमादविप्रलिप्साकरणापाटवरूपाः) भ्रान्तप्रतारकोक्तवाक्यजन्यज्ञाने प्रत्यक्षेणागृहीतसंवादे प्रमाजनके प्रतारणरूपदोषसत्त्वेन दोषाभावस्य व्यभिचारात् ।

ननु दोषाभावस्य शाब्दप्रमायां हेतुत्वाद् उक्तस्थले दोषसत्त्वेन वाक्यं मूकमेव-प्रमित्यजनकमेव । प्रवृत्त्यादिरूपो व्यवहारस्तु प्रत्यक्षात् असंसर्गाग्रहाद्वा इति चेन्न । तद्वाक्यश्रवणानन्तरं 'इदं शाब्दयामि' इति शाब्दबोधानुभवस्य अपलापप्रसङ्गात् ।

किं च केवलदोषाभावस्य शाब्दप्रमाहेतुत्वं सविवादम् । दोषाभावज्ञाने सति सदोषपुरुषाप्रणीतपदस्मारित्वेन लिङ्गेन संसर्गसिद्धेः सम्भवात् वेदेऽप्यनुवादकतापत्तिश्च ।

किं च दोषाभावस्य प्रमाहेतुत्वे अप्रमायां दोषः कारणमिति वक्तव्यम् । तत्र भ्रमविप्रलिप्सादेः दोषस्य प्रत्येकं हेतुत्वे व्यभिचारः, मिलितस्य हेतुत्वे एकस्माद् अप्रमा न स्याद् इति पूर्वमेवोक्तम् ।

तस्मात् लाघवाच्च यथार्थतात्पर्यकत्वं शाब्दप्रमाप्रयोजकम् । यथार्थतात्पर्यकत्वं च यथार्थवाक्यार्थप्रतीतिप्रयोजनकत्वम् । तदपि यथार्थवाक्यार्थप्रतीतीच्छया उच्चरितत्वम् । उच्चरितत्वमपि न जन्यत्वम्, वर्णानां नित्यत्वात्, मौनिश्लोकादावव्याप्तेश्च । अपि तु ज्ञापितत्वम् । इदं तु वेदेऽप्यस्ति । यथार्थप्रतीतीच्छया अध्यापकेन ज्ञापितत्वात् । उक्तयथार्थतात्पर्यकत्वज्ञानाभावादप्रमा भवति । स एव च दोषः । न हि दोषत्वजातिमान्, दोषव्यवहारविषयः । न च यथार्थतात्पर्यकत्वाभावस्य दोषत्वे भ्रमविप्रलिप्सादीनां दोषत्वव्यवहारः कथमिति वाच्यम् । यथार्थतात्पर्यकत्वविरोधित्वेन तेषां दोषव्यवहारविषयत्वात् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अत एव यथार्थतात्पर्यस्य शाब्दप्रमाप्रयोजकत्वादेव भ्रान्तस्य प्रतारकस्य च वाक्यं प्रमाणम्, तत्रापि प्रतारणानुसारेण प्रकृतवाक्यार्थगोचरयथार्थप्रतीतीच्छायाः सत्त्वात्।

अत एव अन्यघटाभिप्रायेण-नीलघटाभिप्रायेण 'गेहे घटोऽस्ति' इत्युक्ते यत्र पीतघटं दृष्ट्वा तमानयति, तत्र अन्यपरत्वात्-नीलघटतात्पर्यकत्वात् तद्वाक्यं न पीतघटे प्रमाणम्-पीतघटविषयकप्रतीतिजनकम्। पीतघटविषयकः व्यवहारस्तु (प्रवृत्त्यादिः) प्रत्यक्षादेव।

अत एव-यथार्थतात्पर्यकत्वस्य शाब्दप्रमाप्रयोजकत्वादेव "यष्टीः प्रवेशय" इति वाक्यं यष्टिकर्मकप्रवेशाख्य-मुख्यार्थबोधे न प्रमाणम्-न मुख्यार्थविषयकप्रमितिजनकम्। "यत्परः स शब्दार्थः" इति न्यायात्। शब्दः यदर्थतात्पर्यकः सः शब्दजन्यप्रमितिविषय इति तदर्थः।

एतावता शब्दनिष्ठं यथार्थवाक्यार्थविषयकप्रतीतीच्छया उच्चरितत्वरूपं तात्पर्यमेव शाब्दप्रमाप्रयोजकमिति सिद्धम्। तच्च तात्पर्यं ज्ञातं सदेव शाब्दप्रमाहेतुः इति साध्यते। तत्र हेतुः ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारिवैलक्षण्यादिति। व्याप्तिवच्छक्तिवच्चेति दृष्टान्तः। उपपादितमेतत् पूर्वमेव।

तत्रानुकूलतर्कः "अन्यथा अन्यपरादन्वयबोधो न स्यादिति शब्दाभासोच्छेदप्रसङ्गात्" इति। अस्यायमर्थः—यदि स्वरूपसदेव यथार्थतात्पर्यं हेतुः, न तु तन्निश्चयः तदा यत्र एकस्यैव शब्दस्य वस्तुतः अर्थद्वये तात्पर्यमस्ति, श्रोता तु एकत्रार्थे तात्पर्यनिश्चयवान् अर्थान्तरे तात्पर्यसंदेहवांश्च तत्र यस्मिन्नर्थे तात्पर्यसंदेहः तत्रापि सत्त्वात्। तथा च तात्पर्यसंदेहदशायां शाब्दबोधाजनकशब्दोच्छेदप्रसङ्गः इति।

तात्पर्यभ्रमाच्च शाब्दभ्रमः। तात्पर्यनिश्चयस्य शाब्दधीहेतुत्वादेव, शक्यलक्ष्योभयतात्पर्यके यष्टीः प्रवेशयेत्यत्र कदाचित् लक्ष्यार्थस्यैवान्वयबोधः। अन्यथा स्वरूपसतो यथार्थतात्पर्यस्य अविशिष्टत्वात् तत्र सर्वदैवोभयोरन्वयबोधः स्यात्। नानार्थकशब्दप्रयोगस्थले कदाचित् कंचिदर्थमादायैवान्वयबोधः इत्येवंरूपा विनिगमना च तात्पर्यनिश्चयस्य हेतुत्वादेव निर्वहति।

अपि च वास्तवस्य तात्पर्यस्य शाब्दधीहेतुत्वे लाक्षणिकार्थबोधे मुख्यार्थान्वयानुपपत्तिज्ञानस्योपयोगो न स्यात्। मुख्यार्थान्वयानुपपत्तिज्ञानेन मुख्यार्थे तात्पर्याभावग्रहे सतात्पर्यकत्वानुमानेन एकविशेषबाधसहकृतेन लक्ष्यार्थे तात्पर्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

ग्रह इति लक्ष्यार्थतात्पर्यग्रहद्वारा मुख्यार्थान्वियानुपपत्तिज्ञानस्य लक्ष्यार्थबोधोपयोगित्वात्। अतस्तात्पर्यनिश्चयो हेतुः।

अपि च तात्पर्यनिश्चयस्य हेतुत्वादेव पचतीत्युक्ते अन्योक्तेन स्वयं स्मृतेन वा कलायपदेन कलाये उपस्थितेऽपि कलायं पचतीति अन्वयबोधो न भवति, तात्पर्यनिश्चयाभावात्।

न च तात्पर्यग्राहकस्य प्रकरणादेः तात्पर्यग्रहापेक्षया प्राथमिकत्वाद् अवश्यक्लृप्तनियतपूर्ववृत्तिताकत्वाच्च प्रकरणादीनां ग्रह एव शाब्दधीहेतुः, न तु तात्पर्यग्रह इति वाच्यम्। प्रकरणादीनामननुगतत्वेन तज्ज्ञानस्य परस्परं व्यभिचारेणाहेतुत्वात्। न चाननुगतप्रकरणादिज्ञानस्य कथं तात्पर्यग्रहहेतुत्वम् इति वाच्यम्। अननुगतानामपि तेषां तात्पर्यव्याप्यतया तात्पर्यग्राहकत्वाद् अननुगतानां धूमादीनां वह्निव्याप्यतया वह्निग्राहकत्ववत्।

तच्च तात्पर्यं वेदे-वेदजन्यशाब्दबोधे न्यायगम्यं सत् कारणम्। न्यायगम्यत्वं च न्यायप्रयोज्यज्ञानविषयत्वम्। न्यायः—अनादिमीमांसकपरम्परसिद्धा युक्तिः। सा च लाधवगौरव-तर्क-लघ्वर्थपदसमभिव्याहारादिरूपा। यत्र न्यायात् तात्पर्यमवसीयते स एव वेदार्थः। लोके च न न्यायानुसारि तात्पर्यमिति न न्यायगम्यं सदेव शाब्दधीप्रयोजकम्। किं तु पुरुषेच्छानियन्त्रितं—न्यायतदितरगम्यसाधारणवक्तृतात्पर्यमात्राधीनं शाब्दज्ञानम्। पुरुषनचसां न्यायविषयेऽपि पुरुषेच्छाविषयेऽर्थे प्रतीतिजनकत्वात्। वक्ता च परस्य वाक्यार्थज्ञानोत्पादनेच्छया वाक्यमुच्चारयति। सा चेच्छा वक्तृगतं यत् यथार्थवाक्यार्थज्ञानं तज्जन्या यदि भवति, तदैव तदुच्चरितवाक्यस्य पुरुषाभिप्रेतयथार्थवाक्यार्थप्रतीतीच्छया उच्चरितत्वरूपं यथार्थतात्पर्यं तादृशप्रतीतीच्छाव्याप्यं निर्वहति। तथा च वक्तुर्यथार्थवाक्यार्थज्ञानवत्तामविज्ञाय यथार्थप्रतीतीच्छयोच्चरितत्वरूपं तात्पर्यं न ज्ञातुं शक्यत इति प्रथममाप्तवाक्याद् वक्तृज्ञानानुमानपूर्वकमर्थतथात्वमनुसन्धाय यथार्थतात्पर्यनिश्चयः।

अनुमानं च—इदं वाक्यं भ्रमादि-विशिष्टज्ञानयोरन्यतरजन्यम् आप्तवाक्यत्वादिति। तदनन्तरं वक्तुर्भ्रमाद्यभावनिश्चये सति, वाक्यार्थज्ञानानुमानम्। तदाकारस्तु अयं स्वप्रयुक्तवाक्यार्थविषयकयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यप्रयोक्तृत्वाद् अहमिव इति। न त्वाप्तत्वादिति हेतुः, साध्याविशिष्टत्वात्। ततः उक्तानुमानेन कर्मत्वे घटविशिष्टज्ञानविषयत्वे सिद्धे तेन हेतुना

Digitization by Arya Samaj Charitable Foundation, Chennai

कर्मत्वे घटवत्त्वम् अनुमीयते। अनुमानाकारस्तु—कर्मत्वादिकम् आधाराधेयभावादिसम्बन्धेन घटादिमत्, तेन सम्बन्धेन घटादिविशिष्टज्ञानविषयत्वाद् इति। आप्तोक्तपदस्मारितत्वाद्वा मदुक्तपदार्थवद् इति।

ननु घटादिविशिष्टज्ञानस्य प्रथममप्रसिद्ध्या साध्यप्रसिद्धिविरहात् कथं व्याप्तिग्रहः तत्प्रसिद्ध्युपगमे च व्यर्थं तदनुमानम्। तथा हि—इदं वाक्यं भ्रमादिविशिष्टज्ञानयोरन्यतरजन्यमित्यनेन वक्तुर्विशिष्टज्ञानविशेषोऽनुमेयः। ज्ञाने च विशेषः अर्थः-विषयः एव, न तु विषयजन्यः आकाराख्यः अन्यः वैयाकरणाभ्युपगतपदार्थविशेषः। "अर्थेनैव विशेषो हि निराकरतया धियाम्" इत्यत्र तृतीयाविभक्तिरप्यभेदार्थिका नतु जन्मत्वार्थिका। धान्येन धनवानित्यादाविव। तथा च विशेषरूपस्यार्थस्याप्रसिद्ध्य ।न व्याप्तिग्रहः। अत एव अस्मिन्नर्थेऽयमभ्रान्तः आप्तो वेति ज्ञातुमशक्यमिति हेत्वप्रसिद्धिरपि। अतः शब्दः स्वतन्त्रतयार्थबोधकः न त्वनुमानविधयेति चेत्—

मैवम्। तात्पर्यनिश्चयार्थं त्वयापि अशाब्द्या एव संसर्गविशेषप्रतीतेरङ्गीकरणीयत्वात्। तात्पर्यस्य संसर्गप्रतीतिघटितत्वात्।

यद्वा इदं वाक्यं साकाङ्क्ष-एतदर्थविषयकैकज्ञानहेतुकम्। आप्तोक्तत्वे सति एतदर्थप्रतिपादकत्वात् मद्वाक्यवत्। ततः एते पदार्थाः परस्परसंसर्गवन्तः साकाङ्क्षत्वे सति एकज्ञानविषयत्वात् सत्यरजतज्ञानविषयवत्।

एवंरीत्या वक्तुर्यथार्थवाक्यार्थज्ञानेऽनुमिते प्रकरणादिना वक्त्रभिप्रेतयथार्थप्रतीतिज्ञानम्, ततो वेदतुल्यतया शाब्दादर्थप्रत्यय इति अनुवादकः शब्दः। वक्तृज्ञानावच्छेदकतया संसर्गज्ञानानुमानाद् वाक्यार्थस्य प्रागेव सिद्धत्वात्।

उक्तप्राभाकरमतनिरासः

अत्रोच्यते। यथार्थवाक्यार्थधीपरत्वरूपं तात्पर्यं न ज्ञातं सत् प्रमोत्पादकम्। उक्ततात्पर्यस्य वाक्यार्थघटितत्वेन वाक्यार्थनिश्चयाधीननिश्चायकतया वाक्यार्थस्य पूर्वमनिश्चितत्वात्।

यस्तु लोके भ्रमादिनिरासानन्तरं वक्तृज्ञानावच्छेदकतया तदनन्तरं स्वातन्त्र्येण वा पुरुषाभिप्रेतवाक्यार्थज्ञाने सति यथार्थवाक्यार्थप्रतीतिपरत्वं प्रकरणादिना ज्ञायत इत्युक्तम्,

Digitization by Arya Samaj Charitable Foundation, Chennai

तन्न। वाक्यार्थमज्ञात्वा "अस्मिन्नर्थेऽयमभ्रान्त" इति ज्ञातुमशक्यत्वात्। पुरुषस्य भ्रमप्रमादसम्भवात्।

न च मा भूत् पुरुषवाक्यत्वेन भ्रमाद्यजन्यत्वग्रहः तथापि संवादिप्रवृत्तिप्रयोजकवाक्यत्वेन लिङ्गेन तद्ग्रहः स्याद् इति वाच्यम्। संवादिप्रवृत्त्यादेः शाब्दज्ञानोत्तरकालिकत्वेन शाब्दधीपूर्वं संवादिप्रवृत्तिप्रयोजकत्वग्रहासम्भवात्।

न च प्रमाणशब्द-भ्रमादिजन्यशब्द यावृत्तं किंचित् वैलक्षण्यमस्ति, तेनैव भ्रमाद्यजन्यत्वमनुमेयमिति 'वाच्यम्' तादृशवैलक्षण्यस्यैव शाब्दधीहेतुत्वसम्भवेन यथार्थतात्पर्यस्य अहेतुत्वात्। तथा च शब्दस्य नानुवादकत्वमित्यायातम्।

एवं वेदेऽपि वाक्यार्थमविज्ञाय वाक्यार्थविषयक-यथार्थप्रतीतिपरत्वं न्यायेनापि ज्ञातुमशक्यम्। विषयनिरूयत्वात् प्रतीतेः। विषयनिश्चयाधीनिश्चयकत्वादित्यर्थः। भवद्भिरपि तात्पर्यज्ञानार्थं प्रथमम् अशाब्दवाक्यार्थप्रतीतेः स्वीकारात्। तात्पर्यघटकप्रतीतेः विषयनिरूयत्वाभावे भवतां तदभ्युपगमो व्यर्थः स्यात्। किं च तात्पर्यघटकप्रतितिविषयकप्रतीतेः विषयनिश्चयहेतुकत्वाभावे वक्तृज्ञानानुमानं व्यर्थं स्यात्। तादृशप्रतीत्युपपादनायैव तदभ्युपगमात्।

न च लोकवद् वेदे मानान्तरात्-अनुभानात् एकपदार्थेऽपरपदार्थवत्त्वरूपवाक्यार्थावगम इति वाच्यम्। वेदार्थस्य शाब्दधीपूर्वं प्रमाणान्तराविषयत्वात्। तथात्वे वेदस्यानुवादकतापत्तेः अप्रमाणतापत्तेर्वा। लोकवेदयोरुभयत्रैव प्रमाणान्तराद् वाक्यार्थबोधावश्यकत्वे शब्दस्य स्वार्थानुभवजनकत्वाभ्युपगमे प्रयोजनाभावात्।

ननु तर्कसंशयान्यतरोपस्थिते वेदार्थे तात्पर्यनिरूपणमस्तु। तथा च वेदस्य नानुवादकता। तर्कसंशयेतरज्ञानगृहीतग्राहिज्ञानमात्रजनकत्वस्यैवानुवादकतापदार्थत्वाभ्युपगमाद् इति चेत्—न। अज्ञाते वाक्यार्थे तर्कसंशययोरप्यसम्भवात्। अयं पुरुषः यद्येतत्पदार्थवदेतत्पदार्थज्ञानवान्न स्यात् तदा एतद्वेदवाक्यप्रयोक्ता न स्याद् इति तर्कस्य, अयमेतत्पदार्थवदेतत्पदार्थज्ञानवान्न वेति संशयस्य च वेदवाक्यार्थनिश्चयाधीनत्वात्। विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वात्। अन्यथा लोकेऽपि तर्कसंशयाभ्यामेव वाक्यार्थोपस्थितिसम्भवेन किं वक्तृज्ञानानुमानेन।

Digitization by Arya Samaj Charitable Foundation, Chennai

वस्तुतस्तु यदि यथार्थतात्पर्यकत्वं ज्ञातं सत् शाब्दप्रमोत्पादकं स्यात् तदा तात्पर्यविशिष्टपदस्मारितत्वेन हेतुना पदार्थसंसर्गानुमितिसम्भवात् न शब्दः अनुमित्यतिरिक्तानुभवकरणं स्यात्।

अपि च पुंवाक्यस्य-लौकिकवाक्यस्य दोषविशिष्टज्ञानान्यतरजन्यत्वेऽनुमिते परिशेषात्-भ्रमाद्यभाववदुक्तत्वेंन दोषा जन्यत्वनिश्चयदशायां वेदतुल्या सामग्रीतात्पर्यग्रहापेक्षया प्राथमिकत्वात् तात्पर्यग्रहार्थमावश्यकत्वाच्च वेदसाधारणशाब्दानुभवसामान्यं प्रति हेतुत्वेन क्लृप्ता दोषाजन्यत्वे सति दोषविशिष्टज्ञानान्यतरजन्यत्वनिश्चयरूपा सामग्री पुंवाक्येऽपि वृत्तेति तत एव-तादृशान्यतरजन्यत्वनिश्चयादेव वाक्यार्थतात्पर्यग्रहाद् पूर्वं लौकिकवाक्यार्थनिश्चयाद् वेदवत्तस्यापि प्रामाण्यम्।

ननु तादृश्यन्यतरजन्यत्वनिश्चयस्य प्राथमिकत्वे आवश्यकत्वेऽपि गौरवान्न तस्य शाब्दधीहेतुत्वम्। किं तु यथार्थतात्पर्यनिश्चय एव हेतुः। अतः यथार्थतात्पर्यनिश्चयात् पूर्वं न तस्माच्छाब्दवोधसम्भव इति चेत्-न। परम्परया दोषाजन्यत्वानुमानाधीनस्य यथार्थतात्पर्यनिश्चयानुमानस्य व्याप्तिस्मृत्यादिविलम्बितत्वात्। तथा च यथार्थतात्पर्यनिश्चयस्य लघुत्वेऽपि व्यभिचारान्न हेतुत्वमिति।

अन्ये तु अबाधितार्थपरत्वं-तत्पदार्थवत्तत्पदार्थप्रतीतिजनकत्वं लोके वेदे च प्रमाजनकम्। लौकिकवाक्ये वाक्यार्थो बाधितोऽपि दृष्ट इति श्रोतुः विशेषतो घटवत्कर्मत्वप्रतीतिजनकमिदमिति अबाधितार्थकत्वज्ञानं विना न बाधाभावनिश्चयः-कर्मत्वादौ घटादिमत्त्वशाब्दबोधः। लोके विशिष्य अबाधितार्थकत्वनिश्चय एव शाब्दधीहेतुर्न तु सामान्यतस्तन्निश्चयः। घटवदेतदम्पदार्थप्रतीतिजनकमिदमिति सामान्यतो निश्चयस्य तत्र हेतुत्वे सामान्यतस्तादृशनिश्चयंसत्त्वे कर्मत्वं घटवन्न वेति विशेषतः संशयेऽपि शाब्दबोधापत्तेः। कर्मत्वातिरिक्तस्याप्येतदम्पदार्थतया सामान्यतस्तन्निश्चयस्य विशेषतस्तादृशसंशयं प्रति अविरोधित्वात्। विशेषतो निश्चयस्य हेतुत्वे च तत्सत्त्वे तादृशसंशयस्यैवासम्भवान्नातिप्रसङ्गः।

न च शाब्दबोधात् पूर्वं विशेषतो घटवत् कर्मत्वम् इत्यादिनिश्चयः कथं स्यादिति वाच्यम्। इन्द्रियेण वाक्यश्रवणे सति वाक्यपक्षकानुमानेन क्वचिदाप्तोक्त्वानुमानेन च तत्सम्भवात्। वेदे तु न्यायात्—कपिञ्जलानालभेतेति वाक्यं

Digitization by Arya Samaj Charitable Foundation, Chennai

त्रित्ववदेतत्कपिञ्जलपदार्थप्रतीतिजनकमित्यादिक्रमेण सामान्यतोऽबाधितार्थकत्वनिश्चयः।

न च वेदे सामान्यतः पूर्वोक्तनिश्चयस्य हेतुत्वे तत्सत्त्वे रक्तच्छागरिक्तत्वान्न वेति संशयदशायामपि शाब्दबोधापत्तिरिति वाच्यम्। वेदस्यकपिञ्जलादिपदार्थस्य प्रमाणान्तराविषयत्वाद् रक्तच्छागाद्यतिरिक्ते प्रमाणाविषयत्वाद् रक्तच्छागाद्यतिरिक्तेऽदृष्टत्वादिति यावत्। जात्वपि कपिञ्जलादिपदेन रक्तच्छागाद्यतिरिक्तार्थाप्रतिपादनात् न तत्र संशयस्य प्रसक्तिः। तथा च लोकवेदयोः सामग्रीभेदः स्पष्ट इत्याहुः।

तदपि न। शाब्दबोधात् पूर्वं भ्रमाद्यजन्यत्वस्य आप्तत्वस्य वा निश्चेतुमशक्यत्वात्। पुंवाक्यत्वस्य व्यभिचारितया संवादिप्रवृत्त्यादेश्च शाब्दज्ञानोत्तरकालिकतया भ्रमाद्यजन्यत्वानुमाने लिङ्गज्ञानाभावात् 'भ्रमाद्यजन्यत्वानुमानाभावे च तादृश-विशिष्टज्ञानवत्त्वरूपस्य आप्तत्वस्यानुमानासम्भवात्। भ्रमाद्यजन्यत्वघटितहेतुनैव पूर्वोक्तक्रमेण वक्तुस्तादृशविशिष्टज्ञानस्यानुमेयत्वात्।

किं च समानप्रकारकज्ञानस्यैव प्रतिबन्धकतया त्रित्ववदेतत्कपिञ्जलपदार्थप्रतीतिजनकमिदमिति सामान्यतो निश्चयसत्त्वे रक्तच्छागस्थित्ववान्न वेति विशेषतः संशयसंभवात् लोकवत् वेदेऽपि अगत्या विशेषतोऽबाधितार्थकत्वनिश्चयस्यैव हेतुताया वक्तव्यतया तन्निश्चये सति वाक्यार्थस्य निश्चितत्वेन वेदस्यानुवादकतापत्तिः।

तस्मात् भ्रमाद्यजन्यत्वम्, तत्पदार्थवत्तत्पदार्थप्रतीतिमदुक्तत्वरूपम् आप्तोक्तत्वम्, तत्पदार्थवत्तत्पदार्थप्रतीतिजनकत्वरूपमबाधितार्थकत्वम्, तत्पदार्थवत्तत्पदार्थप्रतीतीच्छया उच्चरितत्वरूपं यथार्थतात्पर्यकत्वम्, निरस्तव्यभिचारशङ्कत्वंतद्वद्विशेष्यकतत्प्रकारकप्रतीतिरूपप्रमाजनकत्वमिति यावत्, अन्यद्वा दोषाभावादिकं यत् प्रमोत्पादकतया पराभिमतं तत् सर्वं स्वरूपसदेव शाब्दप्रमाया उत्पादकं न ज्ञातं सत्। अन्यथा उक्तस्य सर्वस्यापि तत्पदार्थे तत्पदार्थवत्त्वरूपवाक्यार्थव्याप्यतया आप्तोक्तादिवदस्मारितत्वरूपात् लिङ्गादेव संसर्गसिद्धिः स्यादिति शब्दस्यानुमानान्तर्भावात् वैशेषिकाः विजयेरन्।

अथ व्यवहारानुमितेघटमानयेत्यादिवाक्याधीनप्रयोज्यवृद्धप्रवृत्त्या अनुमिते, व्यवहर्तृकार्यान्वितज्ञानेप्रयोज्यवृद्धगते घटानयनविषयकं कार्यमित्याकारककार्यविशेष्यकज्ञाने-तादृशज्ञानं प्रति उपस्थितत्वेन पदानां-प्रयोजकवृद्धोक्तानां घटमा-

Digitization by Arya Samaj Charitable Foundation, Chennai

नयेत्यादिपदानां हेतुत्वं जानाति व्युसित्सुर्बालकः। तेन च शब्दस्य स्वातन्त्र्येण पदार्थद्वय-संसर्गज्ञानजनकत्वं गृहीतम्। न तु लिङ्गतया शब्दस्य हेतुत्वं गृहीतम्। तदानीं शब्दस्य लिङ्गत्वेन-व्याप्तिविशिष्ट-पक्षधर्मत्वेनानुपस्थितेः। तथा च न शब्दस्यानुमानान्तर्भाव इति चेत्—न। लिङ्गभावेनैव शब्दादन्वितज्ञानोपपत्तेः

न आकाङ्क्षादिमच्छब्दत्वेन कारणता गौरवात्। न च शब्दस्य लिङ्गत्वं सम्भवदपि बालेन न ज्ञातमिति वाच्यम्। सोऽयं बालस्य दोषः, न तु लिङ्गस्य। बालेन न गृहीतमित्येतावता शब्दस्य लिङ्गतया जनकतायां हान्यभावात्।

किं च ज्ञायमानस्य आप्तोक्तत्वादेः शाब्दधीहेतुत्वे वेदेऽपि आप्तोक्तत्वा-दिघटकतया तत्पदार्थे तत्पदार्थवत्त्वस्य प्रथमं सिद्धेः अनुवादकता स्यात्।

वैशेषिकैकदेशिमतम्

वैशेषिकैकदेशिनस्तु—वाक्यार्थतात्पर्यग्राहकानुमानात् तात्पर्यावच्छेदक-तया-तात्पर्यघटकतया वाक्यार्थः सिध्यति। एवं तात्पर्यग्राहकानुमानमुपजीव्य प्रवृत्तात् कर्मत्वं घटवत् स्वविशेष्यकघटप्रकारकयथार्थप्रतीतीच्छयोच्चरितपद-स्मारितत्वात् घटवत् इत्यनुमानात् स्वातन्त्र्येण-तात्पर्याघटकतया वाक्यार्थः सिध्यति। शाब्दसामग्रयपेक्षया अनुमितिसामग्रयाः बलवत्त्वात् सिद्धेश्चानुमिति-प्रतिबन्धकत्वे मानाभावात्। तथा च लोकवेदसाधरणं शब्दमात्रं न प्रमाणम् इत्याहुः।

तदपि न। यथार्थतात्पर्यग्रहस्य वाक्यार्थबोधाहेतुत्वात्। वाक्यार्थबोधात् पूर्वं वाक्यार्थघटितस्य तात्पर्यस्य ज्ञातुमशक्यत्वात्।

यत्तु ज्ञायमानकरणे इत्याद्युक्तम्। तन्न। यथार्थतात्पर्यकत्वादेः प्रथमं ज्ञातु-मशक्यत्वेनानुमानस्य बाधितत्वात्। ज्ञायमानत्वघटितधर्मावच्छिन्नशाब्दबोध-कारणताश्रयत्वरूपस्य ज्ञातोपयोगित्वस्य साध्यस्य पक्षेऽभावात्। भवदुक्तानुमाने व्याप्तयभावाच्च।यद्यपि सामान्यमुखी व्याप्तिः प्रदर्शिता, तथापि तत्र दृष्टान्तो दुर्लभः। यत्तु व्याप्तिवत् शब्दशक्तिवच्चेति दृष्टान्तकथनम्। तन्न। व्याप्तिश-ब्दशक्त्योः कारणत्वाभावात् साध्यहेतुघटकज्ञानोपयोगीत्यनेन ज्ञानकारणतायाः विवक्षितत्वात्। व्याप्तिशक्तिज्ञानयोरेव अनुमितिशाब्दबोधकारणत्वात्। व्याप्तेः शक्तेश्च कारणत्वे अतीतलिङ्गादनुमितिः अपभ्रंशादौ शक्तिभ्रमाच्छाब्दबोधो न स्यात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

न च प्रकृतवाक्यार्थयथार्थप्रतीतिपरतारूपे तात्पर्ये पक्षे ज्ञाननिष्ठ ज्ञाननिरूपितकारणतानिरूपितविषयतासंबन्धावच्छिन्नावच्छेदकत्वं साध्यम्। हेतावपि ज्ञानोपयोगित्वं कारणकारणतावच्छेदकसाधारणम्। तथा च न दृष्टान्ते साध्यवैकल्यं साधनवैकल्यं चेति वाच्यम्। शाब्दबोधात् पूर्वं यथार्थतात्पर्यज्ञानासंभवेन ज्ञानघटितहेतुसाध्यकरणेऽपि पक्षे बाधासिद्ध्योर्दुर्वारत्वाद्।

किं च भवदुक्तानुमाने उपाधिरपि वर्तते। तथाहि— तात्पर्यं ज्ञानवृत्तिज्ञानकारणतायां विषयतया अवच्छेदकं, ज्ञाययमानकरणनिष्ठत्वे सति ज्ञानोपयोगिव्यभिचारिवैलक्षण्यत्वाद् इति भवदुक्तमनुमानम्। तत्र ज्ञानविषयतया व्याप्तिज्ञानजन्यतत्प्रमितिजनकतावच्छेदकत्वमुपाधिः। यत्र ज्ञाननिष्ठयज्ज्ञानकारणतायां विषयतया अवच्छेदकत्वं तत्र तज्ज्ञानविषयतया व्याप्तिज्ञानजन्यतत्प्रमितिजनकतावच्छेदकत्वं यथा व्याप्तौ इति साध्यव्यापकत्वमुपाधेः। पक्षे च तात्पर्ये व्याप्तिज्ञानजन्यप्रमितिजनकतावच्छेदकत्वविरहात् पक्षान्तर्भावेण साधनाव्यापकत्वम्।

न च शक्तौ पदे योग्यतायाम् आकाङ्क्षायां च ज्ञानवृत्तिशाब्दबोधकारणतायां विषयतयावच्छेदकत्वरूपसाध्यमस्ति, व्याप्तिज्ञानजन्यतत्प्रमितिजनकतावच्छेदकत्वरूपोपाधिर्नास्तीति कथमुपाधेः साध्यव्यापकत्वमिति वाच्यम्। व्याप्तितात्पर्यान्यतरत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वमस्तीत्याशयात्।

न च शब्दस्यापि व्याप्यत्वेन ज्ञायमानस्यैव शाब्दधीजनकतया पक्षेऽपि ज्ञानविषयतया व्याप्तिज्ञानजन्यशाब्दधीकारणतावच्छेदकत्वसत्त्वात् न तस्य साधनाव्यापकत्वमिति वाच्यम्। शब्दस्यापि अर्थव्याप्यतया ज्ञातस्य शाब्दधीजनकत्वे तस्यानुमानान्तर्गतत्वापत्तेः।

अत्र मणिग्रन्थस्तावद् अयम्—

"तस्मात् यत् अर्थाव्यभिचारित्वेन ज्ञातं करणं तत्र व्यभिचारिवैलक्षण्यज्ञानमुपयुज्यते"

इति। तस्यायमर्थः—यत्-व्यभिचारिवैलक्षण्यं यत्र प्रमिताविति शेषः। अर्थाव्यभिचारित्वेन-अर्थाव्यभिचारित्वज्ञानसहकारेण, व्याप्तिज्ञानसहकारेणेति यावत्, ज्ञातं सत् करणम् तत्र प्रमितौ व्यभिचारिवैलक्षण्यज्ञानमुपयुज्यते। व्यभिचारिवैलक्षण्यमिति स्वरूपकथनं, तस्यैव ज्ञानमुपयुज्यत इत्येव प्रकृतम्। तथा च यत् व्याप्तिज्ञानसहकारेण प्रमितौ ज्ञातं सत् करणं तदेव तत्प्रमितौ ज्ञातमुपयु-

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्यते-ज्ञाननिष्ठतत्प्रमिति-जनकतायां विषयतयावच्छेदक मिति यावत्। अनेन उपाधेः प्रकृतानुमाने यत् साध्यं तत्प्रयोजकत्वमुक्तम्। एतादृशोपाधिर्नास्ति चेत् साध्यमपि न भवतीति यावत्। तेन साध्यव्यापकत्वमुपाधेः प्रदर्शितं भवति अनेन ग्रन्थेन।

अत्राहुः—अनाप्तोक्तवाक्ये-जलकरणकपाकाभिप्रायेण प्रयुक्ते 'जलेन सिञ्चति' इति वाक्ये बाधकेन = सेकविशेष्यकजलकरणकत्वप्रकारकशाब्दबोधजनकसामग्रीविरहेण (तात्पर्यविरहेण) अर्थाभावदर्शनात् = जलकरणकत्ववत्सेकादिप्रतीतिजनकत्वाभावदर्शनात् अन्यत्रापि सदर्थकत्वबाधितार्थकत्वरूपकोटिद्वयसहचरितत्वेन गृहीतो यो धर्मः आकाङ्क्षादिमद्वाक्यत्वं तेन सदर्थकं बाधितार्थकं वा (जलकरणकत्ववत्सेकप्रतीतिजनकं तादृशप्रतीत्यजनकं वा) इति संशयात् तावन्मात्राद् आकाङ्क्षादिमत्त्वज्ञानमात्रात् न अर्थनिश्चयात्मकः शाब्दबोधः। (न हि संशायकमेव निश्चायकम्) तस्मात् तादृशसंशयरूपप्रतिबन्धनिरसनाय अधिकं कारणान्तरमपेक्षणीयम्। तच्च जलकरणकत्ववत्सेकादिप्रतीतिजनकत्वरूपाबाधितार्थकत्वनिश्चयरूपम्। एवं च तादृशनिश्चयवेलायामेव वाक्यार्थस्य निश्चितत्वात् शब्दः अनुवादक इत्याहुः।

तन्न। यत्र संशयो जातः तत्र तन्निरसनार्थमबाधितार्थकत्वनिश्चयस्यापेक्षितत्वेऽपि यत्र संशयो न जातः तत्र तस्यानपेक्षिततया तत्र शब्दस्यानुवादकत्वाभावेन प्रमाणत्वात्।

अपि च अर्थसंशयस्य तद्बाधसंशयस्य वा ग्राह्यसंशयरूपतया न प्रमां प्रतिबन्धकत्वम्। वह्नि-तदभावयोः संशयदशायां प्रत्यक्षानुमानादिनार्थनिश्चयात्। अन्यथा प्रमाणमात्रोच्छेदप्रसङ्गः। प्रमाणप्रवृत्तेः पूर्वमर्थ-तद्बाधसंशयात्।

निगमनम्

तस्माद् आप्तोक्तत्वं, भ्रमाद्यजन्यत्वम्, यथार्थवाक्यार्थ-प्रतीतिपरत्वं वा अनुगतमपि ज्ञातं सत् न हेतुः। शाब्दबोधात् पूर्वं ज्ञातुमशक्यत्वात्। किं तु तात्पर्यग्राहकत्वेनाभिमतानां न्यायजन्यज्ञान-प्रकरणादिज्ञानानामन्यतरत् तात्पर्यव्याप्यविषयकत्वेनानुगतं, तथा आकाङ्क्षा-आसत्त्योर्निश्चयश्च शाब्दबोधहेतुः। आकाङ्क्षासत्त्योरभावनिश्चये आकाङ्क्षासत्त्योः संशये च शाब्दबोधाभावात्। तथा च यस्य संशये यद्व्यतिरेकनिश्चये च यस्यानुत्पादः तन्निश्चयः तत्र कारणमिति व्याप्तिबलाद् आकाङ्क्षासत्त्योर्निश्चयः शाब्दबोधकारणम्। योग्यतायाश्च ज्ञानमात्रं

Digitization by Arya Samaj Charitable Foundation, Chennai

हेतुः। योग्यतायाः संशये योग्यताभ्रमे योग्यताप्रमायां च सत्यां वाक्यार्थज्ञानोत्पत्तेः। तथा विभक्त्यादिपदज्ञानम्, (आदिपदेन नामधात्वात्मकपदानि) पदानां सम्भूयोच्चारणं च शाब्दज्ञानसामान्ये कारणानि।

नानार्थकहर्यादिपदे श्लिष्टे च श्ववेतो धावतीत्यादौ अनेकार्थोपस्थितावपि प्रकरणादिवशाद् एकमर्थमादाय अन्वयबोधः। लक्षणा च न तात्पर्यानुपपत्त्या शक्यार्थयष्टेरपि प्रवेशनसम्भवात् अन्वयानुपपत्त्यभावात् कथं यष्टिधरे लक्षणेति वाच्यम्। प्रकरणवशात् भोजनानुकूलत्वेन अवगते प्रवेशने कर्मतया यष्टेरन्वयानुपपत्तिसद्भावात्। छत्रिणो यान्तीत्यादावजहत्स्वार्थायां लक्षणायामपि प्रकरणादेव छत्रितदितरसमूहस्य गमनकर्तृत्वमवगतम्, तदन्वयानुपपत्तिश्च केवलच्छत्रिणि।

एवं चैत्रोक्तस्य पचतीत्यस्य नान्योक्तेन कलायमिथ्यनेन सममर्थप्रत्यायकत्वम्, समभिव्याहाराभावात् = परस्परसहकारेण एकान्वयबुद्धिजनकत्वज्ञानाभावात्, न तु यथार्थतात्पर्यग्रहाभावात्।

न च तत्र परस्परसहकारेण एकान्वयबुद्धिजनकत्वज्ञानसत्त्वेऽपि नान्वयबोध इष्ट इति तदापत्तिरिति वाच्यम्। तव मतेऽपि परस्परसहकारेण एकान्वयबुद्धिजनकत्वज्ञानस्य तात्पर्यग्रहहेतुत्वस्वीकारात् तादृशज्ञानसत्त्वे तात्पर्यग्रहस्यापि सत्त्वात् शाब्दबोधस्य दुर्वारत्वात्। सम्भूय एकान्वयबुद्धिजनकत्वेन ज्ञातानामेव पदानां परस्परसहकारेणान्वयबोधे जनकतायाः यत्संशयेत्यादिव्याप्तिसिद्धत्वात्। तथा च तात्पर्यस्य प्रकरणादेर्वा ज्ञानकालेऽपि "एतानि पदानि न सम्भूय एकान्वयबुद्धिजनकानि" इति ज्ञाने, "एतानि पदानि सम्भूयैकान्वयबोधजनकानि न वा" इति संशये च शाब्दबोधाभावात् "यत्संशयव्यतिरेकानिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयः तद्धेतुः" इति नियमबलेन सम्भूयैकान्वयबुद्धिजनकत्वज्ञानस्य अन्वयबोधहेतुत्वमिति नोक्तदोषः।

पदार्थतात्पर्यग्रहस्यैव शाब्दधीहेतुत्वं न तु वाक्यार्थतात्पर्यग्रहस्येति मतोपन्यासः

अन्ये तु—गृहीतनानार्थवृत्तिकपदे = गृहीतनानार्थशक्तिपदे गृहीतनानार्थलक्षणकपदे गृहीतनानार्थशक्तिलक्षणकपदे च वृत्तिज्ञानस्याविशिष्टित्वेऽपि

Digitization by Arya Samaj Charitable Foundation, Chennai

कस्यचिदेवार्थस्य उपस्थित्यर्थं पदार्थे तात्पर्यग्रहस्य हेतुत्वम्, पदार्थे तात्पर्यग्रहं विना नियतोपस्थितेरसम्भवात्। वृत्त्या गृहीतनानार्थवृत्तिकपदजन्यतदर्थस्मृतिं प्रति तदर्थप्रतीतीच्छयोच्चरितत्वग्रहो हेतुरिति कार्यकारणभावः।

न च तात्पर्यग्रहात् पूर्वं तत्पदार्थानुपस्थितौ कथं तात्पर्यग्रहः, तात्पर्यस्यार्थघटितत्वादिति वाच्यम्। वृत्त्या तादृशपदजन्यतदुपस्थितेरसम्भवेऽपि शक्तिवत् प्रकारान्तरेण तदुपस्थितिसम्भवात्। एवं च वाक्यार्थबोधे न वाक्यार्थतात्पर्यग्रहापेक्षा। वाक्यार्थतात्पर्याज्ञानेऽपि प्रकरणादिना "सैन्धवपदं तुरगपरम्" "काकपदं उपघातकपरम्" इति पदार्थतात्पर्यं जानन्ति हि। ततः वाक्यार्थं प्रतियन्ति च।

अन्यत्र-गृहीतनानार्थवृत्तिकपदभिन्नपदे अन्वयप्रतियोगिपदार्थोपस्थितिः तात्पर्यग्रहं विनापि भवतीति न तात्पर्यग्रहापेक्षा।

नन्विदमयुक्तम्—पदार्थस्मृतिं प्रति तात्पर्यग्रहस्य हेतुत्वे मानाभावात्। गृहीतनानावृत्तिकस्थले नियतोपस्थितेरेवासिद्धत्वात्। गृहीतवृत्तिकानां सर्वेषामेवार्थानां तत्र स्मरणस्यानुभवसिद्धत्वात्। सर्वेषां शाब्देबोधाभावस्तु शाब्दानुभवं प्रति तात्पर्यग्रहस्य तात्पर्यग्राहकप्रकरणादिविशेषस्य वा हेतुतया तदभावात्। अन्यथा गृहीतनानार्थवृत्तिकपदजन्यत्वांशमपहाय लाघवाद् वृत्त्या पदजन्यपदार्थस्मृतिमात्रं प्रत्येव पदार्थतात्पर्यग्रहस्य हेतुत्वं कुतो नोपेयते। पदार्थतात्पर्यग्रहं विनाप्यन्यत्र वृत्त्या पदार्थस्मरणस्यानुभवसिद्धत्वात् तत्परित्यागे प्रकृतेऽपि तुल्यत्वाद् इत्यस्वरसादाह—वस्तुतस्त्विति।

वस्तुतस्तु — एकपदस्य अवरपदार्थसंसर्गज्ञानपरत्वं तात्पर्यम्। तत् शाब्दबोधप्रयोजकम्। तत्संसर्गेण तद्विशेष्यकतत्प्रकारकशाब्दबोधं प्रति तत्संसर्गकतद्विशेष्यकतत्प्रकारकशाब्दबोधेच्छयोच्चरित्वं प्रयोजकमिति फलितम्। उक्त तात्पर्यं वेदे न्यायादवधार्यते, लोके तु न्यायात् प्रकरणादेर्वाअवधार्यते। अत एव एतादृशतात्पर्यस्य शाब्दधीप्रयोजकत्वादेव शाब्दबोधस्य नानियतहेतुकत्वम्। प्रकरणादेः प्रयोजकत्वे चानियतहेतुकत्वापत्तिः। तच्च अपरपदार्थसंसर्गज्ञानं वाक्यार्थज्ञानमेवेति सामान्यकारेण तत्परत्वग्रहः हेतुः, घटपदमम्पदं च आधेयत्वसंसर्गक-कर्मत्वविशेष्यकघटप्रकारप्रतीतिपरमित्याकारेण हेतुरिति यावत्। न तु विशिष्यष्ट तप्तरत्वग्रहो हेतुः। घटवत्कर्मत्वप्रतीतिपरमित्याकारेण न हेतुरिति यावत्। यदि

Digitization by Arya Samaj Charitable Foundation, Chennai

विशिष्य हेतुः स्यात् तदा शाब्दबोधात् पूर्वं संसर्गानुभवेन भाव्यम्। तथा च कर्मत्वादौ घटादिमत्त्वानुभवोत्पत्तिं विना घटवत्कर्मत्वप्रतीतित्वेन घटवत्कर्मत्वप्रतीतिपरत्वज्ञानस्यासम्भवात् शाब्दबोधात् पूर्वं तादृशानुभवाभावात् न विशिष्य हेतुः इत्युक्तं भवति।

अत एव-उक्तरीत्या तात्पर्यज्ञानस्य हेतुत्वादेव नानार्थस्थले विनिगमनाकदाचिदेकमर्थमादायैव अन्वयबोध इति व्यवस्था। तात्पर्यानुपपत्तिरेव च लक्षणाबीजम्। तात्पर्याभावादेव च पचति इति पदे प्रयुक्ते अन्योक्तकलायपदात् स्मृतस्यान्वयबोधो न भवति। तथा च सिद्धं शब्दस्य प्रमाणान्तरत्वम्-अनुमानभिन्नत्वे सति अगृहीतग्राहित्वार्थानुभवजनकत्वम्-इत्याहुः।

नन्वेतादृशतात्पर्यनिश्चयस्य शाब्दधीहेतुत्वे किम् आकाङ्क्षायोग्यतासत्तिज्ञानस्य हेतुत्वेनेत्याशङ्कायामुक्तं मणौ—

"तस्य च निराकाङ्क्षादौ संसर्गज्ञानाजनकत्वाद् आकाङ्क्षादिकं सहकारि" इति। तस्य निरुक्ततात्पर्यनिश्चयस्य, निराकाङ्क्षादौ-आकाङ्क्षाद्यभाववत्त्यानिश्चिते संसर्गज्ञानाजनकत्वात्-शाब्दबोधाजनकत्वात् आकाङ्क्षादिकं-आकाङ्क्षादिज्ञानं सहकारि।

अनेनैतत् सिद्धं वाक्यघटकपदानां ज्ञानेन पदार्थोपस्थितिद्वारा शाब्दबोधे जननीये तात्पर्यनिश्चयः सहकारी। तात्पर्यनिश्चयस्य च आकाङ्क्षादिज्ञानं सहकारीति।

मथुरानाथीये विशेषाः (पृ.१८२-१८३)

एतन्मणिग्रन्थोपरि मथुरानाथतर्कवागीशैरपरोऽपि विषयो विचारितः। प्रकृतोपयोगित्वात् स विचारोऽत्र प्रस्तूयते।

अत्राभिनववैशेषिकैकदेशिनः—

लाघवात् तत्तत्पदार्थवत्तत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यस्य घटत्वकर्मत्वत्वादिना विशेषतो धीरेव लोकवेदसाधारणशाब्दधीसामान्यहेतुः। वह्निना सिञ्चतीत्यादौ वह्निकरणकत्ववत्सेकप्रतीतेरप्रसिद्धावपि खण्डशः प्रसिद्ध्या वह्निकरणकत्ववत्सेकप्रतीतिपरम् इति भ्रमरूपतात्पर्यज्ञानसम्भवात्।

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्विशेष्यकतत्प्रकारकप्रतीतीच्छयोच्चरितत्वधीस्तु न कारणम्। विशेष्यता-तत्तत्सम्बन्धावच्छिन्नप्रकारितादिप्रवेशे गौरवात्।

न वा वेदस्थले त्रित्ववत्कपिञ्जलपदार्थपरम् इत्यादिक्रमेण सामान्यतस्तन्निश्चयो हेतुः, लोके च घटवत्कर्मत्वपरमित्यादिक्रमेण विशेषतस्तन्निश्चयो हेतुरिति मीमांसकाभिमतकार्यकारणभेदः युक्तः। कार्यकारणभावद्वयकल्पने गौरवात्, लोकस्थले विशेषतस्तादृशनिश्चयहेतुत्वसाधक-पूर्वोक्तयुक्तेः (पृ.९४) उक्तक्रमेण वेदस्थलेऽप्यविशेषाच्च। तथा च लोकवेदसाधारणं शब्दमात्रमेवानुवादकम्। तात्पर्यावच्छेदकतया वाक्यार्थस्य पूर्वमेव गृहीतत्वात्।

न चैवं वेदस्यानुवादकत्वादप्रामाण्यापत्तिरिति वाच्यम्। अगृहीतग्राह्यनुभवजनकत्वरूपप्रामाण्याभावेऽपि क्षतिविरहात्। तावतापि यथार्थानुभवजनकत्वरूपस्य प्रामाण्यस्यानपायात्।

न च शाब्दधीतः पूर्वं तत्पदार्थे तत्पदार्थवत्त्वज्ञानाभावात् तादृशतात्पर्यं दुर्ग्रहमिति वाच्यम्। लाघवात् तादृशतात्पर्यज्ञानस्य हेतुत्वे सिद्धेऽवगत्या व्यभिचारिणा अव्यभिचारिणा वा पक्षधर्मेण अपक्षधर्मेण वा येन केनापि लिङ्गेन, जन्मान्तरीयोद्बुद्धसंस्कारेण मनसा वा येन केनापि प्रकारान्तरेण च तत्पदार्थे तत्पदार्थवत्त्वज्ञानस्यापि अवश्यं कल्पनीयत्वात्। तादृशविरहदशायां तात्पर्यज्ञानवैकल्येन शाब्दानुभवः— प्रसिद्धः।

अन्यथा तवापि सर्वत्र प्रथमं तद्विशेष्यकतत्प्रकारकप्रतीतेरज्ञानात् कथं तद्घटिततात्पर्यनिर्णयः इत्याक्षेपः दुस्समाधेयः—इति प्राहुः। तदसत्। तत्तत्सम्बन्धावच्छिन्नप्रकारितादिव्यक्तीनां स्वरूपतः संसर्गविधया प्रवेशेन गौरवाभावात्। भवदुक्त-तत्पदार्थवत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यग्रहस्यैव हेतुत्वे "कर्मत्वविशेष्यकघटप्रकारकप्रतीतीच्छया उच्चरितं न वा" इत्यादिसंशये "तादृशप्रतीतीच्छयोच्चरितं न" इत्यादिव्यतिरेकनिश्चये वा घटवत् कर्मत्वमित्यादिशाब्दबोधप्रसङ्गाच्च।

किं च तात्पर्यज्ञानं न शाब्दबोधहेतुः इति तात्पर्यवादे निरूपयिष्यते। शुकादिवाक्यात् तात्पर्याभावनिश्चयेऽपि शाब्दबोधोत्पत्तेः। न चेश्वरतात्पर्यज्ञानं तत्र हेतुरिति वाच्यम्। ईश्वराभावनिश्चयेऽपि वेदेऽन्वयबोधाद् इति संक्षेपः।

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्सिद्धं शब्दः प्रमाणान्तरमिति ।

न्यायशास्त्रोपदेष्टणा परया कृपया सुधीः ।
श्रीरामानुजतातार्यः चतुःशास्त्रशिरोमणिः ॥
प्रौढनानाविधग्रन्थपर्यालोडनपूर्वकम् ।
शब्दप्रमाणपार्थक्यं संविमर्शं न्यरूपयत् ॥

शुभमस्तु

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

अनुशीलितग्रन्थानां सूची

ग्रन्थनाम	प्रकाशनस्थानम्	प्रकाशनवर्षम्
अद्वैततत्त्व प्रदीपिका	Nirnaya Sagar press	१९१५
खण्डनखण्डखाद्यम्	षड्दर्शनप्रकाशनप्रतिष्ठानम्	१९७९
तत्त्वचिन्तामणिः	Chaukhamba Sanskrit Series (Reprint)	१९९०
तर्कताण्डवम्	Mysore Oriental Research Institute	१९३२
तर्कसंग्रहः	Chaukhamba Sanskrit Series (Reprint)	१९६९
तर्कसंग्रहव्याख्या वाक्यवृत्तिः	Chaukhamba Sanskrit Series (Reprint)	
तात्पर्यटीका	Mithila Institute of Sanskrit Research	१९६७
तात्पर्यटीकापरिशुद्धिः	Mithila Institute of Sanskrit Research	१९६७
दीपिकाव्याख्या नीलकण्ठप्रकाशिका	Chaukhamba Sanskrit Series (Reprint)	१९६९
दीपिकाव्याख्या नृसिंहप्रकाशिका	Chaukhamba Sanskrit Series (Reprint)	१९६९
दीपिकाव्याख्या रामरुद्री	Chaukhamba Sanskrit Series (Reprint)	१९६९
न्यायकन्दली	Chaukhamba Sanskrit Series (Reprint)	
न्यायकुसुमाञ्जलि व्याख्या विस्तरः	Chaukhamba Sanskrit Series (Reprint)	
न्यायकौस्तुभः	Tanjore Saraswati Mahal	१९८२
न्यायदर्शनम्	Mithila Institute of Sanskrit	१९६७

Digitization by Arya Samaj Charitable Foundation, Chennai

न्यायपरिशुद्धिः	P.B. Annangaracharya Edn	१९४०
न्यायभाष्यम्	Mithila Institute of Sanskrit	१९६७
न्यायभूषणम्	षड्दर्शनप्रकाशनप्रतिष्ठानम्	१९६८
न्यायमञ्जरी	Mysore Oriental Research Institute	१९७०
न्यायलीलावती	Chaukhamba Sanskrit Series (Reprint)	
न्यायवार्तिकम्	Mithila Institute of Sanskrit	१९६७
प्रकरणपञ्चिका	B.H.U. Dharma vijnana Sankaya Publication	
प्रकाशः रुचिदत्तीयः	Jadaupur University reproduction	
प्रशस्तपादभाष्यम्	Sampurnananda Sanskrit University	१९७७
मथुरानाथीयम् शब्दखण्डः	Chaukhamba Sanskrit Series	१९९०
मीमांसावार्तिकम्	Ananda Asrama Puna	१९७६
लघुमञ्जूषा	Chaukhamba Sanskrit Series	१९८९
वेदान्तपरिभाषा	Venkateswara Steem press Saka	१८५०
वैशेषिकदर्शनम्	T.Veeraraghavach arya Edn.	
शब्दशक्तिप्रकाशिका	Chaukhamba Sanskrit Series	१९३४
शाबरभाष्यम्	Anandasrama, Puna	१९७६
शास्त्रदीपिका	Nirnaya Sagar Press	१९१५
श्लोकवार्तिकम्	Vidya Vilas Press, Varanasi	१८९८
सांख्यकारिका	Nirnaya Sagar Press	
सांख्यतत्त्वकौमुदी	Nirnaya Sagar Press	

Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya ★ Bharatiya Vidya
२०५

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai